तत्त्वचिन्तामणौ

अनुमानखण्डः ।



श्रीमद्गङ्गेशोपाध्यायविरचितः ।



बि, ए उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण

संस्कृतः ।



कलिकातराजधान्यां

नूतनसंस्कृत यन्त्रे मुद्रितः ।

इं० १८७२ ।



तत्त्वचिन्तामणौ

अनुमानखण्डः ।



प्रत्यक्षोपजीवकत्वात् प्रत्यक्षानन्तरं बहुवादिसम्मत-
दुपमानात् प्रागनुमानं निरूप्यते ।

तत्र व्याप्तिविशिष्टपक्षधर्म्मताज्ञानजन्यं ज्ञानमनुमिति-
करणमनुमानं तच्च लिङ्गपरामर्शो न तु परामृश्यमानं
ङ्गमिति वक्ष्यते ।

अथानुमानं न प्रमाणं योग्योपाधीनां योग्यानुपलब्ध्या-
वनिश्चयेऽप्ययोग्योपाधिशङ्कया व्यभिचारसंशयात् शत-
सहचरितयोरपि व्यभिचारोपलब्धेश्च लोके धूमादि-
नानन्तरं वह्न्यादिव्यवहारस्य सम्भावनामात्रात् संवा-
च प्रामाण्याभिमानादिति नाप्रत्यक्षं प्रमाणमिति
अप्रमाणसाधर्म्येणाप्रामाण्यसाधने दृष्टसाधर्म्यस्यानुमा-
नात् एतद्वाक्यस्य सन्दिग्धविपर्यस्तान्यतरं प्रत्यर्थवत्त्वात्
श्च परकीययोरप्रत्यक्षत्वात् अनुमानमप्रमाणमिति
स्य प्रामाण्याप्रामाण्ययोर्व्याघाताच्च । अपिचानुमा-
प्रामाण्ये प्रत्यक्षस्याप्यप्रमाणत्वापत्तेः प्रामाण्यस्यानुमे-

यस्मात् स्वतश्च प्रामाण्यग्रहे तत्संशयानुपपत्तेः। व्याप्ति ग्रहोपायश्च वक्ष्यते।

नन्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः न तावदव्यभिचरितत्वं तद्धि न साध्याभाववदवृत्तित्वम् साध्यवद्भिन्न साध्याभाववदवृत्तित्वं साध्यवत्प्रतियोगिकान्योऽन्याभावास मानाधिकरण्यं सकलसाध्याभाववन्निष्ठाभावप्रतियोगि साध्यवदन्यावृत्तित्वं वा केवलान्वयिन्यभावात्। नापि स ध्यासामानाधिकरण्यानधिकरणत्वं साध्यवैयधिकरण्यान धिकरणत्वं वा तदुभयमपि साध्यानधिकरणानधिकरणत तच्च तत्र यत्किञ्चित्साध्यानधिकरणाधिकरणे धूमे चासि द्धम्।

अथेदं वाच्यं ज्ञेयत्वादित्यत्र समवायितया वाच्यत्वा भावोघटएव प्रसिद्धः व्यधिकरणधर्मावच्छिन्नप्रतियोगिता काभावस्य केवलान्वयित्वात्। नचैवं घटएव व्यभिचार साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववदवृत्तित्वं व्यभिचारः न च वाच्यत्वाभावस्ताद्दशोघटवृति चेन्न ताद्दशसाध्याभावसामानाधिकरण्याभावोव्याप्तिः। तथाच प्रसिद्धिः प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदक तद्विशिष्टज्ञानस्याभावधीहेतुत्वात् अन्यथा निर्विकल्पाद घटोनास्तीति प्रतीत्यापत्तेः गवि शशशृङ्गं नास्तीतिप्रती तेरप्रसिद्धेः शशशृङ्गं नास्तीति च शशे शृङ्गाभावइत्यर्थः अथ साध्यासामानाधिकरण्यानधिकरणत्वे सति सा

प्तिकरणत्वं व्याप्तिः केवलान्वयिनि साध्यासामानाधिकरण्यं निरधिकरणे आकाशादौ प्रसिद्धमिति चेन्न साध्यासामानाधिकरण्यं हि न साध्यानधिकरणाधिकरणत्वं साध्यानधिकरणानधिकरणत्वं वा केवलान्वयिनि यत्किञ्चित्साध्याधिकरणानधिकरणे धूमे चाव्याप्तेः । नापि स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं पर्वतीयवह्नेर्महानसीयधूमसमानाधिकरणात्यन्ताभावप्रतियोगित्वात् द्रव्यत्वादेरव्याप्यवृत्त्यव्याप्यतापत्तेश्च । न च प्रतियोगिविरोधित्वं व्याप्यवृत्तित्वं वा अभावविशेषणं देयं संयोगादौ साध्ये सत्त्वादेरनैकान्तिकत्वाभावप्रसङ्गात् । न हि प्रतियोगिविरोधी संयोगादेरपरोऽत्यन्ताभावोऽस्ति अधिकरणभेदेनाभावभेदाभावात् । नापि साधनवन्निष्ठान्योऽन्याभावाप्रतियोगिसाध्यवत्त्वं व्याप्तिः मूले वृक्षः कपिसंयोगवानित्यबाधितप्रतीतेः तदन्योऽन्याभावस्यापि तत्र सत्त्वात् । नचैवं भेदाभेदः अवच्छेदकभेदेन तत् सत्त्वाभ्युपगमात् साधनवन्निष्ठान्योऽन्याभावाप्रतियोगिसाध्यवद्वृत्त्येति वाच्यं: व्याप्यव्यापकभावानिरूपणात् साध्यसाधनयोर्व्याप्तेनिरूप्यत्वात् वह्निमत्पर्वतस्य धूमवन्महानसनिष्ठान्योन्याभावप्रतियोगित्वाच्च विशेषाभावकूटादेवाभावव्यवहारोपपत्तौ सामान्याभावे मानाभावात् । नापि साधनसमानाधिकरण यावद्धर्मनिरूपितवैयधिकरण्यानधिकरणसामानाधिकरण्यं साधनसमानाधिकरणस्य प्रमेयत्वादेर्वैय-

धिकरणाप्रसिद्धेः महानसादौ समवायितया वह्निवह्निमतोरत्यन्तान्योऽन्याभावयोः सत्त्वात् धूमादावप्युक्तलक्षणाभावाच्च। अथानौपाधिकः सम्बन्धो व्याप्तिः उपाधिश्च साध्यव्यापकत्वे सति साधनाव्यापकः व्यापकत्वन्तु तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं व्यभिचारे चावश्यमुपाधिः प्रतियोगित्वं न विरोधित्वं सहानवस्थाननियमलक्षणं गोत्वाश्वत्वयोरतथात्वात् अन्योऽन्याभावप्रतियोगिन्यसत्त्वाच्च किन्तु यथाधिकरणाभावयोः स्वरूपविशेषः सम्बन्धः तथा प्रतियोगित्वमनुयोगित्वमपि अभावविरहात्मत्वं वेति चेत् यत्किञ्चित्साध्यव्यापकसाधनाव्यापकधर्मनिषेधो न धूमादौ प्रकृतसाध्यव्यापकसाधनाव्यापकधर्मश्च सिद्ध्यसिद्धिभ्यां न निषेद्धुं शक्यः यावत्साध्यव्यापके प्रमेयत्वादौ साधनाव्यापकत्वं यावत्साधनाव्यापके च घटत्वादौ साध्यव्यापकत्वं निषिध्यतइति चेन्न व्यधिकरणत्वात् यावत्साधनाव्यापकमव्यापकं यत्साध्यस्य यावत्साध्यव्यापकं व्यापकं वा यस्य तत्त्वं तदिति चेन्न सोपाधेरपि तथात्वात् तथाहि साधनस्य वह्नेरव्यापकं यावदार्द्रेन्धनन्तत् प्रत्येकमव्यापकं साध्यधूमस्य द्वितीये साध्यधूमस्य व्यापकमार्द्रेन्धनं तद्व्यापकं महानसीयवह्नेः। नापि साध्यं यावद्व्यभिचारि तदव्यभिचारित्वमनौपाधिकत्वं साध्याव्यभिचारित्वस्यैव गमकत्वसम्भवात् तच्च दूषितम्। नापि कार्त्स्न्येन सम्बन्धो व्याप्तिः एकव्यक्तिके तदभावात् नानाव्यक्तिकेऽपि सकलधूमसम्ब-

न्धस्य प्रत्येकवह्न्यभावात् अतएव न कात्स्न्र्येन साध्येन सम्बन्धोव्याप्तिः विषमव्याप्ते तदभावाच्च। नच यावत् साधनाश्रयाश्रितसाध्यसम्बन्धः साधनाश्रये महानसादौ सकले प्रत्येकं वह्नेराश्रितत्वाभावात्। नापि साधनसमानाधिकरणयावद्धर्म्मसमानाधिकरणसाध्यसामानाधिकरण्यं यावद्धर्मसामानाधिकरण्यं हि यावत्तद्धर्म्माधिकरणाधिकरणत्वं तच्चाप्रसिद्धं साधनसमानाधिकरणसकलमहानसत्वाद्यधिकरणाप्रतीतेः। नापि स्वाभाविकः सम्बन्धो व्याप्तिः स्वभावजन्यत्वे तदाश्रितत्वादौ वा व्याप्त्यतिव्याप्तेः। नाप्यविनाभावः केवलान्वयिन्यभावात्। अथ सम्बन्धमात्रं व्याप्तिः व्यभिचारिसम्बन्धस्यापि केनचित् सह व्याप्तित्वात् धूमादिव्याप्तिस्तु विशिष्यैव निर्व्वक्तव्येति तन्न लिङ्गपरामर्शविषयव्याप्तिस्वरूपनिरूपणप्रस्तावे लक्षणाभिधानस्यार्थान्तरत्वात्। नच सम्बन्धमात्रं तथा तद्बोधादनुमित्यनुत्पत्तेः। नापि व्याप्तिपदप्रवृत्तिनिमित्तमिदं सम्बन्धज्ञानेऽपि व्याप्तिपदाप्रयोगात्। केवलान्वयिनि केवलान्वयिधर्मसम्बन्धो व्यतिरेकिणि साध्यवदन्यावृत्तित्वं व्याप्तिः एतयोरनुमितिविशेषजनकत्वं अनुमितिमात्रे पक्षधर्म्मतैव प्रयोजिका। नचातिप्रसङ्गः विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः कार्य्यजनकत्वनियमादिति केचित् तदपि न साध्यवदन्यावृत्तित्वस्य धूमेऽसत्त्वात् वह्निमत्पर्व्वतान्यस्मिन् धूमसत्त्वात्। नच सकलसाध्यवदन्यावृत्तित्वं वह्नि-

मतां प्रत्येकं तथात्वात् सर्व्वत्र लक्षणे साध्यत्वसाधनत्व-तदभिमतत्वानां व्याप्तिनिरूप्यत्वेनात्माश्रय: साध्यत्वं हि न सिद्धिकर्मत्वं सिषाधयिषाविषयत्वं वा महानसीयवह्नौ तदभावात्। नच सामान्यतो व्याप्त्यवगमोऽस्त्येव परस्य कथमन्यथा दूषणे नासाधकतां साधयेदिति वाच्यं स्वार्थानुमानोपयोगिव्याप्तिस्वरूपनिरूपणं विना कथायामप्रवेशादिति।

अत्रोच्यते। प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः अन्यनिष्ठवह्नेर्धूमवत्यवृत्तेरत्यन्ताभावप्रतियोगित्वेऽपि तत्प्रतियोगिता न वह्नित्वेनावच्छिद्यते धूमवति वह्निर्नास्तीत्यप्रतीतेः सामान्यावच्छिन्नप्रतियोगिताकाभावः पृथगेव अन्यथा सकलप्रसिद्धरूपाभावे प्रसिद्धरूपवदन्यत्वे चावगते वायौ रूपं न वा वायू रूपवान्नवेति संशयो न स्यात् विशेषाभावकूटस्य निश्चितत्वात्।

यद्वा प्रतियोगिव्यधिकरणस्वसमानाधिकरणात्यन्ताभावाप्रतियोगिना सामानाधिकरण्यं यत्समानाधिकरणान्योऽन्याभावप्रतियोगि यद्यन्न भवति तेन समं तस्य सामानाधिकरण्यं वा स्वसमानाधिकरणान्योऽन्याभावाप्रतियोगियद्वत्त्वकत्वं वा। अन्यवृत्तिवह्नितद्वतोरन्यवृत्तिधूमवन्निष्ठात्यन्ताभावान्योऽन्याभावप्रतियोगित्वात् अधिकरणवह्निधूमयोर्न-

व्याप्तिः किन्तु तत्तद्धूमस्य समानाधिकरणतत्तद्वह्निना। नचैवं धूममात्रे न व्याप्तिरिति वाच्यं सर्व्वधूमव्यक्तेस्तथात्वेन धूममात्रस्य व्याप्यत्वात् धूमसम्बन्धिवह्निस्तद्याप्यएव युगपदुत्पन्नविनष्टयोश्च व्याप्तिरेव कर्म्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरणः। यद्वा प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वमत्यन्ताभावविशेषणं कर्म्मणि च संयोगाभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वमेव। नचान्योऽन्याभावस्याव्याप्यवृत्तित्वम् अभेदस्याबाधितप्रत्यभिज्ञानात्। व्याप्यव्यापकभावाज्ञानेऽपि वस्तुतस्तथात्वनाज्ञायमानस्य सम्बन्धत्वेनैव भातस्य षष्ठ्यर्थत्वं नचैवमननुगमो दोषाय कस्य का व्याप्तिरित्यननुगतस्यैव लक्ष्यत्वात्। अथ धूमवति वह्निह्रदौ नस्तः धूमवान् वह्निमद्ध्रदो न भवतीति प्रतीतेर्व्यासज्यवृत्तिप्रतियोगिकौ वह्निवह्निमतोरत्यन्तान्योऽन्याभावौ धूमवति विद्येते इति कथमेते लक्षणे इतिचेन्न तादृशाभावानभ्युपगमात् अभ्युपगमे वा तत्र तदुभयं प्रतियोगि न वह्निर्वह्निमन्तौ। अथवानौपाधिकत्वं व्याप्तिः तच्च यावत्स्वसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यत् तत्प्रतियोगिकात्यन्ताभावसमानाधिकरणं यत् तेन समं सामानाधिकरण्यम्। नत्त्वेवं सोपाधिः तत्र साधनसमानाधिकरणात्यन्ताभावप्रतियोगिन आर्द्रेन्धनवत्त्वादेरुपाधेर्योऽत्यन्ताभावस्तेन समं साध्यस्य धूमादेः सामानाधिकरण्याभावात् उपाधेः साध्यव्या-

पकत्वात् एतदेव यावत्स्वव्यभिचारिव्यभिचारिसाध्यसामानाधिकरण्यमनौपाधिकत्वं गीयते । यद्वा यावद्व्यत्समानाधिकरणात्यन्ताभावाप्रतियोगिप्रतियोगिकात्यन्ताभावासामानाधिकरण्यं यस्य तस्य तदेवानौपाधिकत्वं सोपाधौ तु साध्यवन्निष्ठात्यन्ताभावाप्रतियोगिनउपाधेर्यो ऽत्यन्ताभावस्तेन समं हेतोः सामानाधिकरण्यम् उपाधेः साधनाव्यापकत्वात् । यद्वा यत्सम्बन्धितावच्छेदकरूपवत्त्वं यस्य तस्य सा व्याप्तिः । तथाहि धूमस्य वह्निसम्बन्धित्वे धूमत्वमवच्छेदकं धूममात्रस्य वह्निसम्बन्धित्वात् वह्नेस्तु धूमसम्बन्धेन वह्नित्वमनवच्छेदकं धूमासम्बन्धिनि गतत्वात् नह्यतिप्रसक्तमवच्छेदकं संयोगादौ तथात्वादर्शनात् किन्तु वह्नावार्द्रेन्धनप्रभववह्नित्वं धूमसम्बन्धितावच्छेदकं तादृशश्च व्याप्यमेव । अथवा यत्सामानाधिकरण्यावच्छेदकावच्छिन्नं यस्य स्वरूपं तत्तस्य व्याप्यं वह्निसामानाधिकरण्यं हि धूमे धूमत्वेनावच्छिद्यते सोपाधौ तूपाधिना । अतएव साधनतावच्छेदकाभिन्नेन येन साधनताभिमते साध्यसम्बन्धोऽवच्छिद्यते स एव तत्र साधने विशेषणमुपाधिरिति वदन्ति । अतएव च साधनाव्यापकत्वे सति साधनावच्छिन्नसाध्यव्यापकत्वं लक्षणं ध्रुवं व्यभिचारिणि साधने एकत्र साध्यतदभावयोर्विरोधेनावच्छेदकभेदं विना तदुभयसम्बन्धाभावादवश्यं साध्यसम्बन्धितावच्छेदकमस्ति तदेव च साधनावच्छिन्नसाध्यव्यापकं साधनाव्यापकं तत्रोपाधिः अतएव व्यभिचारे चावश्यमुपा-

धिरिति सङ्गच्छते अन्यथा व्यभिचारादेव तत्रागमकत्वेन व्यभिचारित्वेन न तदनुमानमप्रयोजकत्वात् अतएव च तस्य साध्यसम्बन्धितावच्छेदकरूपलक्षणा व्याप्तिः साधनताभिमते च कास्तीति स्फटिके जवाकुसुमवदुपाधिरसावुच्यते लक्षणन्तु साध्यसाधनसम्बन्धव्यापकत्वे सति साधना व्यापकत्वं विषमव्याप्तस्तु नोपाधिपदवाच्यः प्रवृत्तिनिमित्ताभावात् दूषकता च तस्य व्यभिचारोन्नायकतया नच व्यभिचारोन्नायकत्वमेवोपाधित्वं अप्रयोजकसाध्यव्यापकव्यभिचारिणोरप्युपाधित्वापत्तेरिति ।

सेयं व्याप्तिर्न भूयोदर्शनगम्या दर्शनानां प्रत्येकमहेतुत्वात् आशुविनाशिनां क्रमिकाणां मेलकाभावात् नच तावद्दर्शनजन्यसंस्कारा इन्द्रियसहकृता व्याप्तिधीहेतवः प्रत्यभिज्ञायामिन्द्रियस्य तथात्वकल्पनादितिवाच्यं समानविषये स्मरणे प्रत्यभिज्ञाने च संस्कारोहेतुरतः कथं संस्कारेण व्याप्तिज्ञानं जन्येत अन्यथातिप्रसङ्गः । किञ्च सम्बन्धभूयो दर्शनं भूयःसु स्थानेषु दर्शनं भूयसां वा दर्शनं भूयांसि वा दर्शनानि न तथा एकत्र रूपरसयोर्द्रव्यत्वघटत्वयोश्च व्याप्तिग्रहात् एकत्रैव धारावाहिके तद्धीप्रसङ्गात् भूयस्त्वस्य त्रिचतुरादित्वेनाननुगमाच्च । अपि च पार्थिवत्वलोहलेख्यत्वादौ शतशो दर्शनेऽपि व्याप्त्यग्रहात् तर्कसहकृतं तथेति चेत्तर्हि सहचारदर्शनव्यभिचारादर्शनसहकृतः स एव व्याप्तिग्राहकोऽस्तु आवश्यकत्वात् किं भूयोदर्शनेन नच तेन

विना तर्कएव नावतरति प्रथमदर्शने व्युत्पन्नस्य तर्कसम्भ-वात् नचैवमेवास्तु तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्थानात् जातमात्रस्य प्रवृत्तिनिवृत्तिहेत्वनुमितिजनकव्याप्तिज्ञानं तर्कं विनैवातोनानवस्थेति चेत्तर्हि व्यभिचारात् सोऽपि नव्याप्तिग्रहे हेतुः नचैतद्धूमत्वावान्तरजातिरस्ति सामान्य-प्रत्यासत्त्या सर्व्वोपसंहारादविनाभावग्रहः सामान्यरूपता च सकृद्दर्शनगम्येतिभूयोदर्शनापेक्षेति चेन्न सामान्यस्य हि प्रत्यासत्तित्वं लाघवात् नतु सामान्यतया ज्ञातस्य तदन-भ्युपगमाच्च। नच काकतालीयत्वादिशङ्काव्युदासार्थं द्वितीयादिदर्शनापेक्षेति वाच्यं द्वितीयादिदर्शनेऽपि शङ्कातादव-स्थ्यात्। नत्वनौपाधिकत्वज्ञानं व्याप्तिज्ञाने हेतुः तद्दे-शकालतत्रावस्थितघटादीनामुपाधित्वशङ्कानिरासः कस्य-चित् साधनव्यापकत्वज्ञानेन कस्यचित् साध्याव्यापकत्व-ज्ञानेन स्यात् तच्च भूयोदर्शनं विना नावतरतीति चेन्न अयोग्योपाधिव्यतिरेकस्यानुमानाधीनज्ञानत्वेनानवस्थापा-तात्। अथ साध्यसाधनसहचरितधर्म्मान्तराणामुपा-धित्वसंशये न व्याप्तिग्रहः अतस्तेषामनुपाधित्वज्ञानं भूयो दर्शनाधीनसाध्याव्यापकत्वज्ञाने सतीत्येतदर्थं भूयोदर्शना-पेक्षा अतएव यावता दर्शनेन तद्विषयसावक्षयोदर्शनं हेतुरिति न वारसंख्यानियमो नं वाऽननुगमः यद्यपि चान्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वसंशयो नाव्यव्या-प्तिग्रहप्रतिबन्धकस्तथापि तदाहितव्यभिचारसंशयः प्रति-

बन्धकइति तद्विधूननमावश्यकमिति चेन्न अयोग्योपाधि संशयाधीनव्यभिचारसंशयस्य तथाप्यनुच्छेदात् स च न भूयोदर्शनाद्याप्यनुमानादित्युक्तम्। अपि च भूयोदर्शना-हितसंस्कारो न बहिरिन्द्रियसहकारी तद्यापारं विनापि च सहचारादिज्ञानवतो व्याप्तिग्रहात् नापि मनस इन्द्रि-यादिवद्भूयोदर्शनजन्यसंस्कारस्य तज्जन्यस्मरणस्य वा प्रमा-णान्तरत्वापत्तेः तस्मात् परिशेषेण सकृद्दर्शनगम्या सा तथा ह्युपाध्यभावो व्याप्तिः अभावश्च केवलाधिकरणं तत्काल-सम्बन्धो वा स्वप्रकाशरूपं तज्ज्ञानं वा तच्च प्रथमदर्शनेनाव-गतमेव चक्षुरादिना न चाधिकस्तदभावोऽस्ति न च प्रति-योगिज्ञानमधिकरणादिज्ञानजनकं येनोपाधिज्ञानं विना तन्नस्यात् एवमुपाध्यभावे ज्ञाते किञ्चिन्न ज्ञातमवशिष्यते उपाध्यभावव्यवहारस्तु तद्धि यमपेक्षते दीर्घत्वादिव्यवहार-इवावधिज्ञानं नन्वेवं रासभसम्बन्धतुल्यवह्निधूमसम्बन्धज्ञा-नादेवानुमितिः स्यादिति वाच्यम् उपाधिस्मरणे सत्युपाधि-तद्व्याप्येतरसकलतदुपलम्भकसमवधाने चोपाध्यनुपलम्भस-हितस्य केवलाधिकरणज्ञानस्यानुमितिहेतुत्वात् व्यवहा-रहेतुत्वाच्च। नन्वेवं प्रथमदर्शनेन व्याप्तिनिश्चयाद्विशेषद-र्शने सति रासभादिसंशयवत् तत्संशयो न स्यादिति चेत् व्याप्तिज्ञानानन्तरं किं विद्यमान एवोपाधिर्मयोपाधित्वेन न ज्ञात इतिशङ्कया गृहीतव्याप्तावपि संशयः अतस्तत्र भूयोदर्शनेनोपाधिनिरासद्वारा व्याप्त्यभावशङ्कापनीयते।

यद्वा ज्ञानप्रामाण्यसंशयाद्व्याप्तिसंशयः यथा घटज्ञानसामग्र्यां सत्यां घटज्ञाने सति तत् प्रामाण्यसंशयाद्धितस्तत् संशयो न त्वग्रिमसंशयानुरोधेन तत्र घटज्ञानमेव न हन्तमिति कल्प्यते तथेहाप्युपाध्यभावस्य व्याप्तित्वात् तस्य च केवलाधिकरणरूपस्य प्रथमदर्शनेऽपि निश्चितत्वात् व्याप्तिग्राहकान्तरस्याभावाच्च परिशेषेण सकृद्दर्शनस्य व्याप्तिग्राहकत्वात् तन्निश्चये प्रामाण्यसंशयादेव तत् संशयः। नचैवं रासभेऽपि प्रथमं व्याप्तिपरिच्छेदः स्यादिति वाच्यं तत्र व्याप्तेरभावात् प्रत्यक्षज्ञाने विषयस्य हेतुत्वात् क्वचिदसंसर्गाग्रहात् तथाव्यवहारो दोषमाहात्म्यात् नचात्रापि तथारोपे सति निमित्तानुसरणं नत् निमित्तमस्तीत्यारोप इत्यभ्युपगमात्। केचित्तु साधनवन्निष्ठात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं साधनवन्निष्ठान्योऽन्याभावाप्रतियोगिसाध्यवत्कत्वं वा व्याप्तिस्तदुभयमपि योग्यं प्रत्यक्षेण वह्निधूमसम्बन्धानुभवेन प्रथममवगतमेव। महानसे योऽत्यन्ताभावोऽन्योऽन्याभावोवावगतस्तस्य प्रतियोगी न वह्निर्न वा वह्निमानित्यनुभवात् रासभे तथावगमेऽप्यग्रे स बाध्यतइति तन्न एवं हि तद्वह्नितद्धूमयोरेव व्याप्तिः स्यात् नतु धूमत्ववह्नित्वावच्छेदेन नच तदनुमानोपयोगिवह्नित्वं वह्निमत्त्वं वा न प्रतियोगितावच्छेदकमिति प्रथमतो ज्ञातुमशक्यमेवेतिमैवं प्रकृतसाध्यव्यापकसाधनाव्यापकोवा साधनत्वाभिमतेन समं प्रकृतसाध्यसम्बन्धितावच्छेदकं

विशेषणं वोपाधिः उभयथापि तदभावो न व्याप्तिः सिद्धसिद्धिभ्यां तन्निषेधानुपपत्तेः किन्तु यावत्स्वव्यभिचारिव्यभिचारि साध्यसामानाधिकरण्यमनौपाधिकत्वं तस्य च प्रथमं ज्ञातुमशक्यत्वात्। किञ्च न वस्तुगत्या व्याप्तेर्ज्ञानं हेतुः किन्तु व्याप्तित्वेन तच्च उपाध्यभावत्वं नच उपाधेर्ज्ञाने तदभावत्वेन ज्ञानं सम्भवति विशेषणज्ञानसाध्यत्वाद्विशिष्टज्ञानस्य नच नियमतः प्रथममुपाधिधीरस्ति। यच्चोक्तं प्रतियोगिज्ञानं व्यवहारहेतुः नाभावज्ञानहेतुस्तु तावदेवं तथापि तदभावो मा व्यवहारि उपाध्यभावज्ञानाधीनानुमितिः स्यादेव उपाधिज्ञानं विनापि नचैवं। वस्तुतस्तु विशेषादर्शने सहचारादिसाधारणधर्मदर्शनाद्व्यभिचारसंशयात् प्रथमदर्शनेन न व्याप्तिनिश्चयः। अथ व्यभिचारसंशयो नाव्यभिचारनिश्चयप्रतिबन्धकः ग्राह्यसंशयस्य निश्चयाप्रतिबन्धकत्वात् अन्यथा संशयोत्तरं क्वापि निश्चयो न स्यादिति चेन्न व्यभिचारसंशयः प्रतिबन्धक इति ब्रूमः किन्तु विशेषादर्शने सति सहचारादिसाधारणधर्मदर्शनात् संशयः स्यात् नतु संशयसामग्रीतोनिश्चय इति। किञ्च यद्धीसामग्री यत्र प्रतिबन्धिका विशेषादर्शने तत्र तद्धीरपीति व्यभिचारसंशयोऽपि प्रतिबन्धकः एवं भूयोदर्शनमपि संशायकं तर्कस्त्वनवस्थाग्रस्त एवेति कथं व्याप्तिग्रहः।

अत्रोच्यते व्यभिचारज्ञानविरहसहकृतं सहचारदर्शनं व्याप्तिग्राहकं ज्ञानं निश्चयः शङ्का च सा च क्वचिदुपाधि-

सन्देहात् क्वचिद्विशेषादर्शनसहितसाधारणधर्म्मदर्शनात् तद्विरहस्य क्वचिद्विपक्षबाधकतर्कात् क्वचित् स्वतः सिद्धएव तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्थेति चेत् न यावदाशङ्कं तर्कानुसरणात् यत्र च व्याघातेन शङ्कैव नावतरति तत्र तर्कं विनैव व्याप्तिग्रहः तथाहि धूमो यदि वह्निसमवहिताजन्यत्वे सति वह्निसमवहिताजन्यः स्यान्नोत्पन्नः स्यादित्यत्र किं धूमोऽवह्नेरेव भविष्यति क्वचिद्वह्निं विनापि भविष्यति अहेतुकएव वोत्पत्स्यत इति शङ्का स्यात् सर्व्वत्र स्वक्रियाव्याघातः स्यात् यदि हि गृहीतान्वयव्यतिरेकं हेतुं विना कार्य्योत्पत्तिं शङ्केत तदा स्वयमेव धूमार्थं वह्नेः तृप्त्यर्थं भोजनस्य परप्रतिपत्त्यर्थं शब्दस्य चोपादानं नियमतः कथं कुर्य्यात् तेन विनापि तत्सम्भवात् तस्मात्तत्तदुपादानमेव तादृशशङ्का प्रतिबन्धकं शङ्कायां न नियतोपादानं नियतोपादाने च न शङ्का तदिदमुक्तं तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातो न भवतीति नहि सम्भवति स्वयं वह्न्यादिकं धूमादिकार्य्यार्थं नियमत उपादत्ते तत् कारणं तन्नेत्याशङ्क्यते चेति एतेन व्याघातो विरोधः सच सहानवस्थाननियमइति तत्राप्यनवस्थेति निरस्तं स्वक्रियायाएवशङ्काप्रतिबन्धकत्वात् अतएव व्याघातो यदि शङ्कास्ति न चेच्छङ्का ततस्तराम् । व्याघातावधिराशङ्का तर्कः शङ्कावधिः कुतइतिखण्डनकारमतमप्यपास्तम् । नहि व्याघातः शङ्काश्रितः किन्तु स्वक्रियैव

शङ्काप्रतिबन्धिकेति न वा विशेषदर्शनात् क्वचित् शङ्का-निवृत्तिरेवं स्यात् न चैतादृशतर्कावतारो भयोदर्शनं विनेति भूयोदर्शनादरः ननु स स्वतएव प्रयोजकः अतएव न तदाहित संस्कारो न मानान्तरं तर्कस्याप्रमात्वात् तच्च प्रत्यक्षव्याप्तिज्ञाने हेतुः तदभावेऽपि शब्दानुमानाभ्यां तद्ग्रहात्। ननु सहचारदर्शनव्यभिचारादर्शनवद्व्यभिचार-शङ्काविरहानुकूलतर्कयोर्ज्ञानं व्यभिचारिसाधारणमिति न ततोऽपि व्याप्तिनिश्चय इति चेन्न स्वरूपसतोरेव तयोर्व्याप्तिग्राहकत्वात् सत्तर्काद्व्याप्तिप्रमा तदाभासात्तदप्रमा विशेषदर्शनसत्यत्वासत्यत्वाभ्यां पुरुषज्ञानमिव। अपरे तु यत्र तर्के व्याप्त्यनुभवोमूलं तत्र तर्कान्तरापेक्षा यत्र तु व्याप्तिस्मरणं हेतुः तत्र न तर्कान्तरापेक्षेति नानवस्था अस्ति च जातमात्राणामिष्टानिष्टसाधनतानुमितिहेतु-व्याप्तिस्मरणं तदानीं व्याप्त्यनुभावकाभावात् तन्मूलानुभवमूलाचार्येऽपि व्याप्तिस्मरणपरम्परेति। यत्त्वनादि-सिद्धकार्यकारणभावविरोधादिमूलाः केचित्तर्का इति तन्न तत्र प्रमाणानुयोगेऽनुमानएव पर्य्यवसानात्। नच व्याप्ति-ग्रहान्यथानुपपत्त्यैव तर्कस्यानादिसिद्धव्याप्तिकत्वज्ञानमिति वाच्यम् अनुपपत्तेरप्यनुमानत्वात्। अन्ये तु विपक्षबाधक तर्कादनौपाधिकत्वग्रहएव तदधीनो व्याप्तिग्रह इति तदपि न तर्कस्याप्रमाणत्वात्। व्यभिचारादिशङ्कानिरासद्वारा प्रत्यक्षादिसहकारी स इति चेन्न अनवस्थाभयेन तर्कं

विना व्याघातात् यत्र शङ्काविरहस्तत्र व्याप्तिग्रहे तर्कस्य व्यभिचारात्। यत्तु योग्यानामुपाधीनां योग्यानुपलब्ध्या-भावग्रहः अयोग्यानान्तु साध्याव्यापकत्वसाधनव्यापकत्व-साधनादभावग्रह इत्यनौपाधिकत्वं सुग्रहमिति तत्तुच्छम् अनुमानेन तत्साधनेऽनवस्थानात् प्रमाणान्तरस्याभावात्। ये चानुकूलतर्कं विनैव सहचारादिदर्शनमात्रेण व्याप्ति-ग्रहं वदन्ति तेषां पक्षेतरत्वस्य साध्यव्यापकत्वग्रहेऽनुमान-मात्रमुच्छिद्येत अनुमानमात्रोच्छेदकत्वादेव पक्षेतरोऽनो-पाधिरिति चेत् भ्रान्तोऽसि नहि वयमुपाधित्वेन तस्य दोषत्वमाचक्ष्महे साध्यव्यापकत्वेन तद्व्यतिरेकात् पक्षे साध्यव्यावर्त्तकतया व्यापकव्यतिरेके व्याप्यव्यतिरेकस्य वज्रलेपाच्च अपि च करवह्निसंयोगः शक्त्यतिरिक्तातीन्द्रिय-धर्मसमवायी जनकत्वादित्यत्राप्रयोजकत्वान्न साधकं तत्र व्याप्तस्य पक्षधर्मत्वे किमप्रयोजकं नाम तस्माद्विपक्षबाधक-तर्काभावान्न तत्र व्याप्तिग्रह इत्यप्रयोजकत्वमिति।

उक्तव्याप्तिप्रकारेष्वन्योऽन्याभावगर्भैव व्याप्तिरनुमिति-हेतुर्लाघवात् अतोनानुगमः। अनौपाधिकत्वं तल्लक्षणं नन्वेवमुपाधिरसिद्ध्युपजीव्यत्वेन व्यभिचारवत् हेत्वाभासा-न्तरं स्यात् ननु व्याप्यभावत्वेनासिद्धिरिति चेत् तज्ज्ञान-मुपजीव्यमपि न स्वतोदूषकं नान्यस्य साध्यव्यापकत्वसाध-नाव्यापकत्वज्ञानमन्यस्य साध्यव्याप्यत्वज्ञाने प्रतिबन्धकम-तिप्रसङ्गः व्यभिचारज्ञानस्य तद्धेतुत्वात् तद्वीस्तथा 'नचा-

नौपाधिकत्वज्ञानं व्याप्तिज्ञानेहेतुरित्युक्तम् । तथाच व्यभिचारज्ञानद्वारा सदूषकः एवञ्च परमुखनिरीक्षकतयासिद्धसाधनवन्न पृथक् नचैवमव्यभिचारस्य व्याप्तित्वे व्यभिचारस्तदभावत्वेनासिद्धिः स्यादिति वाच्यम् । साध्याभाववद्वृत्तित्वं हि व्यभिचारः तदभावश्च नाव्यभिचारः केवलान्वयिन्यभावात् । किन्तु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसामानाधिकरण्यं न चानयोः परस्परविरुद्धत्वमिति ।

व्याप्तिग्रहश्च सामान्यलक्षणाप्रत्यासत्त्या सकलधूमादिविषयकः कथमन्यथा पर्व्वतीयधूमे व्याप्त्यग्रहे तस्मादनुमितिः सा चेन्द्रियसम्बद्धविशेषणतातिरिक्तैव वा तद्विशेष्यकप्रत्यक्षे तदिन्द्रियसन्निकर्षस्य हेतुत्वेनानागतादौ संयोगादेरभावादिति वदन्ति तदपरे न मन्यन्ते तथाहि धूमत्वावच्छिन्ना व्याप्तिः सन्निकृष्टधूमविषये धूमत्वेन प्रत्यक्षेण ज्ञायते ततः स्मृता सा तृतीयलिङ्गपरामर्शे पक्षनिष्ठधूमवृत्तितया ज्ञायते ततोऽनुमितिः तदनभ्युपगमेऽपि सन्निकृष्टधूमविषये धूमत्वेन धूमोवह्निव्याप्यइत्यनुभवस्तथैव व्याप्तिस्मरणं ततो धूमवानयमिति व्याप्तिस्मृतिप्रकारेण धूमत्वेन पक्षवृत्तिधूमज्ञानादनुमितिः व्याप्त्यनुभवतत्स्मरणपक्षधर्म्मताज्ञानानामेकप्रकारकत्वेनानुमितिहेतुत्वात् । गवादिपदेष्वपि शक्त्यनुभवतत्स्मरणवाक्यार्थानुभवानामेकप्रकारकत्वेन हेतुहेतुमद्भाव इत्यपूर्व्वं वक्ष्यते तत्र योग्यतादिबलादपूर्व्व-

व्यक्तिलाभोऽनुमाने तु पक्षधर्मताबलात् धूमोवह्निव्याप्य-इत्यनुभवो न तु सर्व्वोधूमो वह्निव्याप्यइति येन सर्वभानार्थं तत्स्वीकारः ।

अथ वह्निमानयमित्यनुमितिर्विशेषणज्ञानसाध्याविशिष्टज्ञानत्वादिति पर्वतीयवह्निभानार्थं तत्कल्पने धूमेऽपि तथा क्वचिद्धूमस्यापि व्यापकत्वादिति चेन्न विशिष्टवैशिष्ट्यज्ञाने विशेषणतावच्छेदकप्रकारकज्ञानस्यावश्यकत्वेन हेतुत्वात् तच्च वृत्तमेव न तु विशेषणज्ञानमपि तथा गौरवात् गौरवमिति विशिष्टज्ञाने युगपद्विशेष्ये विशेषणे सन्निकर्ष एव कारणं न तु निर्विकल्पकं मानाभावात् विशिष्टज्ञानत्वमेव मानमिति चेन्न दृष्टान्ताभावात् दण्डी पुरुष इत्यत्र विशेषणधीजन्यत्वानभ्युपगमात् विशिष्टवैशिष्ट्यज्ञानत्वात् अपि च प्रमेयत्वेन व्याप्तिं परिच्छिन्दन् सर्वज्ञः स्यात् तथा च परकीयज्ञानविषये घटत्वं नवेति संशयो न स्यात् प्रमेयत्वेन तदन्यतरनिश्चयात् । प्रमेयत्वेन घटं जानात्येव घटत्वं तस्य न जानाति इति चेन्न तत् किं घटत्वं न प्रमेयं येन तन्न जानीयात् सकलघटवृत्तिधर्मस्य प्रमेयत्वेन तज्ज्ञानासम्भवात् ।

उच्यते यदि सामान्यलक्षणा नास्ति तदानुकूलतर्कादिकं विना धूमादौ व्यभिचारसंशयो न स्यात् प्रसिद्धधूमे वह्निसम्बन्धावगमात् कालान्तरीयदेशान्तरीयधूमस्य मानाभावेनाज्ञानात् सामान्येन तु सकलधूमोपस्थितौ धमा-

न्तरे विशेषादर्शनेन संशयो युज्यते। यत्तु पाकादौ चिकीर्षा सुखादौ इच्छा न स्यात् सिद्धे इच्छाविरहात् असिद्धस्याज्ञानात् तस्मात् सुखत्वादिना ज्ञातेषु सर्वेषु सिद्धं विज्ञायासिद्धे इच्छा भवतीत्यभ्युपेयं तन्न असिद्धस्याज्ञानेऽपि सिद्धगोचरज्ञानादेव इच्छाप्रवृत्तिस्वाभाव्यादसिद्धे तयोरुत्पत्तेः न चातिप्रसङ्गः समानप्रकारकत्वेन ज्ञानेच्छाकृतीनां कार्य्यकारणभावात् नतु समानविषयत्वेनापि क्वचिदप्यकल्पनात् समानविषयकत्वे सत्यपि समान प्रकारकज्ञानाभावेनेच्छाकृत्योरभावात् तस्यावश्यकत्वेन गौरवाच्चेति परसिद्धान्तात्। नच सर्वज्ञत्वे संशयो न स्यादिति दोषः घटः स इति घटत्वप्रकारकं हि ज्ञानं संशयविरोधि तच्च न वृत्तं स्वसामग्रीविरहात् अतो घटत्वादि सकलविशेषज्ञानेऽपि स घटो न वेति संशयइति।

उपाधिज्ञानाद्व्यभिचारज्ञाने सति न व्याप्तिनिश्चयइत्युपाधिर्निरूप्यते।

तत्रोपाधिः साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापकः अनौपाधिकत्वज्ञानञ्च न व्याप्तिज्ञाने हेतुरतो व्यापकत्वादिज्ञानेनान्योऽन्याश्रयः। यद्वा व्यापकत्वं तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं तत्प्रतियोगित्वञ्चाव्यापकत्वं प्रतियोगित्वञ्च तदधिकरणानधिकरणत्वमिति वदन्ति तन्न साधनपक्षधर्म्मावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तेः नच तयोरनुपाधित्वं दूषकताबीजसाम्यात् मित्रातनयत्वेन

श्यामत्वसाधने शाकपाकजत्वस्य प्रत्यक्षस्पर्शाश्रयत्वेन वायोः प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य च शास्त्रे प्रयोजकत्वेनोपाधित्वस्वीकाराच्चेति पक्षेतरेऽतिव्याप्तिश्च नच व्यतिरेके पर्वतेतरान्यत्वादित्यत्र इतरान्यत्वस्यासिद्धिवारणार्थं पर्वतपदं विशेषणमिति व्यतिरेके व्यर्थविशेषणत्वान्न स उपाधिः बाधोन्नीतस्याप्यनुपाधितापत्तेः न चेष्टापत्तिः इतरान्यत्वस्याप्रसिद्ध्या विशेषणं विना व्याप्यग्रहेण तत्सार्थकत्वात्। वस्तुगत्या साध्यव्यापकः पक्षेतर उपाधिरिति चेत् अस्तु तथा तथापि पक्षातिरिक्ते साध्यव्यापकताग्रहादुपाधेर्दूषकत्वं तच्च तत्राप्यस्ति अन्यथा पक्षे साध्यसन्देहादनुपाधित्वे उपाधिमात्रमुच्छिद्येत विपक्षाव्यावर्त्तकविशेषणशून्यत्वं विशेषणं तेन बाधोन्नीतपक्षेतरस्य परिग्रहः तत्र पक्षस्यैव विपक्षत्वात् नतु पर्वतेतरत्वादेरिति चेन्न नहि वस्तुविपक्षव्यावर्तकविशेषणशून्यं सर्वत्र प्रमेयत्वादेः सत्त्वात्तत्रोपात्तेति विशेषणे सिद्ध्यसिद्धिव्याघातः तथापि च साध्यव्यापकत्वसाधनाव्यापकत्वे तत्र स्त इति तद्व्यावृत्त्या पक्षे साध्यव्यावृत्तिरतो हेतोर्व्यभिचार एव व्यभिचारे चावश्यमुपाधिरिति पक्षेतरएव तत्रोपाधिः स्यात् तावन्मात्रस्यैव दूषकत्वाच्च व्यर्थं विशेषणम्। अतएवानुमानमात्रोच्छेदकतया जातित्वान्न पक्षेतरउपाधिरित्यपास्तं दूषणसमर्थत्वेन जातित्वाभावात् एतेन पक्षेतरव्यावृत्त्यर्थं प्रकारान्तरमपि निरस्तम् उपाधित्वाभावेऽपि दूषणसमर्थ-

त्वात्। अथोपाधिः स्वव्यतिरेकेण सत्प्रतिपक्षोत्थापकतया दूषणं पक्षेतरत्वव्यतिरेकश्च न साध्याभावसाधकोऽसाधारण-त्वात् ननु व्यभिचारोन्नायकतया दूषणं यथाहि साध्यव्याप-कोपाध्यव्याप्यतया हेतोः साध्याव्याप्यत्वं तथा साध्यव्याप्य-हेत्वव्यापकतयोपाधेर्न साध्यव्यापकत्वमपि सिध्येत् व्याप्ति-ग्राहकस्योभयत्रापि साम्येन विनिगमकविरहात् तस्माद्यथा साध्यव्याप्येन हेतुना साध्यं साधनीयं तथा साध्यव्यापको-पाधिव्यावृत्त्या साध्याभावोऽपि साधनीयो व्याप्तिग्रहतौल्या-दिति दूषकतावीजं सोऽयं सत्प्रतिपक्ष एवेति मैवं एवं हि सत्प्रतिपक्षउपाध्युद्भावनं न स्यात् सत्प्रतिपक्षान्तरवत् किञ्चैवं बाधोन्नीतोऽपि पक्षेतरो नोपाधिः स्यात् व्यति-रेकेऽसाधारण्यात्। ननु बाधे नोपाधिनियमः धूमेन ह्रदे वह्निसाधने तदभावात् ननु हेतुमति पक्षे बाधे पक्षेतरो-पाधिनियमः प्रत्यक्षे वह्नौ कृतकत्वेनानुष्णत्वे साध्येऽतेज-स्त्वादेरुपाधित्वसम्भवादिति चेत् न तेजोमात्र पक्षत्वे-ऽतेजस्त्वं विनान्यस्य उपाधेरभावात् किञ्च पर्वतावयववृत्त्य-न्यत्वं पर्वतेतरद्रव्यत्वं ह्रदपर्वतसंयोगानाधारत्वं ह्रदपर्वता-न्यत्वादिकमुपाधिः स्यादेवव्यतिरेकेऽसाधारण्याभावात् व्य-तिरेकिणा सत्प्रतिपक्षसम्भवाच्च न चासाधारण्यं तस्यापि सत्प्रतिपक्षोत्थापकतया दोषत्वात् तस्मादुभयोरपि व्याप्ति-ग्राहकसाम्ये विरोधान्न व्याप्तिनिश्चयः किन्तूभयत्र व्यभि-चारसंशयः तथाच व्यभिचारसंशयाधायकत्वेनोपाधेर्दूषकत्वं

तच्च पक्षेतरेऽप्यस्ति तदुक्तमुपाधेरेव व्यभिचारशङ्केति । भवतु वोक्तन्यायेन सकलानुमानभङ्गभिया पक्षेतरोऽनुपाधिः तथापि लक्षणमतिव्यापकम् । नापि साध्यसमव्याप्तत्वे सति साधनाव्यापकत्वमुपाधित्वं दूषकतावीजस्य व्यभिचारोन्नयनस्य सत्प्रतिपक्षस्य वा साध्येन विषमव्याप्तस्याप्युपाधित्वात् तथा दूषकतायां साध्यव्याप्यत्वस्याप्रयोजकत्वाच्च । अथ साध्यप्रयोजकोधर्म्म उपाधिः प्रयोजकत्वञ्च न न्यूनाधिकदेशवृत्तेः तस्मिन् सत्यभवतस्तेन विनापि भवतस्तदप्रयोजकत्वात् अन्यथा पक्षेतरस्याप्युपाधित्वप्रसङ्ग इति चेत् न दूषणौपयिकं हि प्रयोजकत्वमिह विवक्षितं तच्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमेवेति तदेव प्रयोजकं नत्वधिकं व्यर्थत्वात् । अथोपाधिः स उच्यते यद्धर्म्मोऽन्यत्र प्रतिविम्बते यथा जवाकुसुमं स्फटिकलौहित्य उपाधिः तथा चोपाधिवृत्तिव्याप्यत्वं हेतुत्वाभिमते चकास्ति तेनासावुपाधिः नच व्याप्यत्वमात्रेण दूषकत्वमिति साध्यव्यापकतापीष्यते तथाच समव्याप्त एवोपाधिरिति चेत् तत् किं विषमव्याप्तस्य दूषकतावीजाभावान्नोपाधिशब्दवाच्यत्वं तथात्वेऽप्युपाधिपदप्रवृत्तिनिमित्ताभावाद्वा नाद्यः तस्यापि व्यभिचाराद्युन्नायकत्वात् नापरः नहि लोके समव्याप्तएवान्यत्र स्वधर्म्मप्रतिविम्बजनकएवोपाधिपदप्रयोगः लाभाद्युपाधिना कृतमित्यादौ लाभादावुपाधिपदप्रयोगात् । किञ्च न शास्त्रे लौकिकव्यवहारार्थमुपाधिव्युत्पादनं किन्त्वनुमान-

दूषणार्थं तच्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमात्र-मिति शास्त्रे तत्रैवोपाधिपदप्रयोगः । अन्ये तु यदभावोव्य-भिचारविरोधी स उपाधिः नच विषमव्याप्तस्याभावोव्यभि-चारं विरुणद्धि तस्याभावेऽपि व्यभिचारात् अस्ति ह्यनि-त्यत्वव्यापकं प्रमेयत्वं तद्व्याप्यञ्च गुणत्वं न चानित्यत्वगुणत्व-योर्व्याप्तिरस्ति समव्याप्तिकस्य च व्यतिरेकस्तथा नहि सा-ध्यव्यापकव्याप्यीभूतस्य व्याप्यं यत्तत् साध्यं व्यभिचरतिव्यभि चारे चान्ततः साध्यमेवोपाधिः अभेदेऽपि व्याप्यव्यापकत्वात् साधनाव्यापकत्वादिति स्वीचक्रुस्तन्न तवापि ह्यव्यभिचारे साध्यव्याप्यव्याप्यत्वं तन्त्रमावश्यकत्वाल्लाघवाच्च न साध्य-व्यापकव्याप्यत्वमपि भवतैव व्यभिचारस्य दर्शितत्वात् नच साध्यव्याप्यव्याप्यत्वमेवानौपाधिकत्वं साध्यव्याप्यमित्यत्रापि ह्यनौपाधिकत्वं तदेव वाच्यं तथा चानवस्थेति अनौपाधि-कत्वे च व्याप्तिलक्षणे यावदिति पदं साध्यव्यापके विशेषणं दत्तमेव किञ्च यस्मिन् सत्यनुमितिर्न भवति तदेव तत्र दूषणं नतु यद्व्यतिरेके भवत्येवेत्येतद्गर्भं विरुद्धत्वादेरप्य-दोषत्वापत्तेः नापि पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वं साधनावच्छिन्नसाध्यव्यापकोपा-ध्यव्यापनात् । शब्दोऽभिधेयः प्रमेयत्वादित्यत्राश्रावणत्वस्यो-पाधित्वापत्तेश्च शब्दधर्मगुणत्वावच्छिन्नाभिधेयत्वं यत्र रूपादौ तत्राश्रावणत्वं व्यापकं पक्षे प्रमेयत्वस्य साधनस्या-व्यापकं हि तत् । आर्द्रेन्धनवत्त्वादावुपाधौ पक्षनियत

तादृशधर्म्माभावाच्च। अथ साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः तेन ध्वंसस्य जन्यत्वेन ध्वंसप्रतियोगित्वे साध्ये साधनावच्छिन्नसाध्यव्यापकं भावत्वमुपाधिः श्यामत्वे शाकपाकजत्वमुपाधिरिति तन्न पक्षधर्म्मावच्छिन्नसाध्यव्यापकोपाध्यव्यापनात् जलं प्रमेयं रसवत्त्वादित्यत्र रसवत्त्वावच्छिन्नसाध्यव्यापकपृथिवीत्वस्योपाधित्वप्रसङ्गात् सोपाधित्वादसाधकमित्यत्र साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वे साधनावच्छिन्नेत्यस्य व्यर्थत्वप्रसङ्गाच्च। किञ्च पक्षद्वयेऽपि विशिष्टसाध्यव्यभिचारं विशिष्टसाध्यव्यतिरेकं वा प्रसाध्य पश्चात् केवलसाध्यव्यभिचारः केवलसाध्यव्यतिरेको वा साधनीयस्तथा चार्थान्तरं केवलसाध्ये हि विवादो ननु विशिष्टे। अथ प्रकृतसाध्यव्यभिचारसिद्ध्यर्थं विशिष्टसाध्यव्यभिचारः साध्य इति चेन्न अप्राप्तकालत्वात् प्रथमं साध्यव्यभिचारएवोद्भाव्यस्तत्रासिद्धावुपाधिरिति चेत् तर्हि प्रकृतानुमाने नोपाधिदूषणं स्यात् किञ्च साध्यव्यभिचारहेतुत्वेन पक्षधर्मावच्छिन्नसाध्यव्यापकव्यभिचारएवोपन्यसनीयोनोपाधिः। स्यादेतत्पर्य्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकउपाधिः पर्य्यवसितं साध्यं पक्षधर्मताबललभ्यं यथा शब्दोऽनित्यत्वातिरिक्तशब्दधर्म्मातिरिक्तधर्मवान् मेयत्वादित्यत्र पर्य्यवसितं यत्साध्यम् अनित्यत्वं तस्य व्यापकं कृतकत्वमुपाधिः यदि च तथैव कृतकत्वमपि शब्दे साध्यते तदा अनित्यत्वमुपाधिः

तदुक्तं वाद्युक्तसाध्यनियमच्युतोऽपि कथकैरुपाधिरुद्भाव्यः पर्य्यवसितं नियमयन् दूषकताबीजसाम्राज्यादिति । अनेन पक्षधर्म्मसाधनावच्छिन्नसाध्यव्यापकोपाधिः संगृह्यते तादृश साध्यस्य पर्य्यवसितत्वादिति तन्न एवं हि द्व्यणुकस्य सावयवत्वे सिद्धे द्व्यणुकमनित्यद्रव्यासमवेतं अन्यमहत्त्वानधिकरणद्रव्यत्वादित्यत्र निरवयवद्रव्यसमवेतत्वमुपाधिः स्यात् भवति हि नित्यद्रव्यसमवेतत्वं पर्य्यवसितं साध्यं तस्य व्यापकं साधनाव्यापकञ्च किञ्च पक्षधर्म्मताबललभ्यसाध्यसिद्धौ निष्फल उपाधिः तदसिद्धौ च कस्य व्यापकः नहि सोपाधौ पक्षधर्म्मताबलात् साध्यं सिध्यति यस्य व्यापक उपाधिः स्यादिति । अतोच्यते यद्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वं स उपाधिः लक्षणन्तु पर्य्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वं यद्धर्म्मावच्छेदेन साध्यं प्रसिद्धं तदवच्छिन्नं पर्य्यवसितं साध्यं स च धर्म्मः क्वचित् साधनमेव क्वचिद्द्रव्यत्वादि क्वचिन्महानसत्वादि तथाहि समव्याप्तस्य विषमव्याप्तस्य वा साध्यव्यापकस्य व्यभिचारेण साधनस्य साध्यव्यभिचारः स्फुटएव व्यापकव्यभिचारिणस्तद्व्याप्यव्यभिचारनियमात् साधनावच्छिन्नपक्षधर्म्मावच्छिन्नसाध्यव्यापकयोर्व्यभिचारित्वेन साधनस्य साध्यव्यभिचारित्वमेव यथा ध्वंसस्यानित्यत्वे साध्ये भावत्वस्य वायोः प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य च विशेषणाव्यभिचारिणि साधने विशिष्टव्यभिचारस्य विशेष्यव्यभिचारित्वनियमात् अतएव

नार्थान्तरं विशेषणाव्यभिचारित्वेन ज्ञाते साधने विशिष्ट-व्यभिचारः सिध्यन् विशेष्यसाध्यव्यभिचारमादायैव सिध्यति पक्षधर्म्मताबलात् अन्यथा प्रतीतेरपर्य्यवसानात् न च पक्षधर्म्मताबलात् प्रकृतसिद्धावर्थान्तरम्। यद्वा प्रत्यक्ष-स्पर्शाश्रयत्वं प्रत्यक्षत्वव्यभिचारि द्रव्यत्वाव्यभिचारित्वे सति द्रव्यप्रत्यक्षत्वव्यापकव्यभिचारित्वान्महत्त्ववत् तथा मित्रा-तनयत्वं श्यामत्वव्यभिचारि मित्रातनयत्वाव्यभिचारित्वे सति श्याममित्रातनयत्वव्यापकव्यभिचारित्वात् अघटत्ववत् अव्यभिचारश्च तत्सामानाधिकरण्यात्यन्ताभावाप्रतियोगित्वं तच्चाभेदेऽपि। यद्वा यः साधनव्यभिचारी साध्यव्यभि-चारोन्नायकः स उपाधिः तत्त्वञ्च साक्षात् परम्परया वेति नार्थान्तरम्। किञ्च अर्थान्तरस्य पुरुषदोषत्वादाभासा-न्तरस्य तत्राभावादुपाधिरेव भावत्वादिकं दोषः नचैवं शब्दोऽभिधेयः प्रमेयत्वादित्यत्राश्रावणत्वं जलं प्रमेयं रस-वत्त्वादित्यत्र पृथिवीत्वमुपाधिः स्यात् केवलान्वयित्वसाधक-प्रमाणेन तत्र साध्यसिद्धेरुपाधेर्विशिष्टाव्यापकत्वात् न च पक्षेतरे स्वव्याघातकत्वेनानुपाधावतिव्याप्तिः तत्रानुकूल-तर्काभावेन साध्यव्यापकत्वानिश्चयात् सहचारदर्शनादेस्तेन विना संशायकत्वादित्युक्तं बाधोन्नीते चानुकूलतर्कोऽस्त्ये-वेति एवं पर्व्वतावयववृत्त्यन्यत्वादेरपि नोपाधित्वं पक्षमात्र व्यावर्त्तकविशेषणवत्त्वात् अतएव धूमे आर्द्रेन्धनप्रभववह्नि-मत्त्वं द्रव्यवह्निरिन्द्रियप्रत्यक्षत्वे उद्भूतरूपवत्त्वं मित्रातन-

यथामत्वे शाकपाकजत्वं जन्यानित्यत्वे भावत्वमुपाधिः तदुत्कर्षेण साध्योत्कर्षात् अनन्यथासिद्धान्वयव्यतिरेकतो वैद्यकात् कारणतावगमेन घटोन्मज्जनप्रसङ्गेन साध्यव्यापकतानिश्चयात् तत् किं कार्य्यकारणयोरेव व्याप्तिः तथा च बहुधा व्याकुलीस्यादिति चेन्न तदुपजीव्यान्येषामप्यनुकूलतर्केण व्याप्तिग्रहात् यत्र साध्योपाध्योर्हेतुसाध्ययोर्वा व्याप्तिग्राहकसाम्यान्नैकत्र व्याप्तिनिश्चयस्तत्र सन्दिग्धोपाधित्वं व्यभिचारसंशयोपधायकत्वात् यदा च तादृश्यैकत्रानुकूलतर्कावतारस्तदा हेतुत्वमुपाधित्वं वा निश्चितं पक्षेतरस्य स्वव्याघातकत्वेन न हेतुव्यभिचारसंशायकत्वमतो न सन्दिग्धोपाधिरपि सः । यत्तु पक्षेतरस्य यथा साध्यव्यापकत्वं तथा साध्याभावव्यापकत्वमपि ग्राहकसाम्यात् तथा चोभयव्यापकनिवृत्त्या साध्यतदभावाभ्यां पक्षे निवर्त्तितव्यम् न चैवं । तथा च पक्षेतरः साध्यव्यापकतासंशयेन सन्दिग्धः कथं परं दूषयेदिति तन्न तथापि हि साध्यव्यापकता पक्षमालम्ब्य हेतुव्यभिचारसंशयाधायकत्वेन दूषणं स्यादेव । ननु यत्रोपाधिस्तत्रानुकूलतर्कोयदि नास्ति तदा तदभावेनैव व्याप्तेरग्रहः अथास्ति तदा साध्यव्याप्याव्यापकत्वेनोपाधिः साध्याव्यापकत्वनिश्चयान्नोपाधिरित्युभयथापि नोपाधिर्दूषणं न च व्याप्यभावव्याप्यमुभयमतउपाधिरपि तदभावोन्नयनेन दोषइति वाच्यं उपाधेरात्मलाभार्थमनुकूलतर्काभावोपजीवकत्वेन तस्यैव दोषत्वादिति चेन्न सोपा-

धावेकत्र साध्यतदभावसम्बन्धस्य विरुद्धत्वादवच्छेदभेदेन तदुभयसम्बन्धो वाच्यः तथाच साधने साध्यसम्बन्धितावच्छेदकरूपमनुकूलतर्काभावोपजीवनमन्तरेणोपाधिरावश्यकस्तथानुकूलतर्काभावोऽप्यावश्यकइति उभयोरपि विनिगमकाभावाद्दूषकत्वम्। अन्ये तु यद्व्यावृत्त्या यस्य साधनस्य साध्यं निवर्त्तते न धर्म्मस्तत्र हेतावुपाधिः सच धर्म्मोयस्याभावात् पक्षे साध्यसाधनसम्बन्धाभावः यथा आर्द्रेन्धनवत्त्वं व्यावर्त्तते हि तद्व्यावृत्त्या धूमवत्त्वमयोगोलके अतएव तत्र साध्यसाधनसम्बन्धाभावः पक्षे एवं भावत्वव्यावृत्त्या ध्वंसे जन्यत्वानित्यत्वयोः सम्बन्धोनिवर्त्तमानः पक्षधर्म्मताबलादनित्यत्वाभावमादाय सिध्यति तथा वायावुद्भूतरूपवत्त्वं निवर्त्तमानं बहिर्द्रव्यत्वे सति प्रत्यक्षत्वं निवर्त्तयत् प्रत्यक्षत्वाभावमादाय सिध्यति तथा चोभयत्रापि पक्षे साध्याभावसिद्ध्या साध्यसाधनसम्बन्धाभावोऽस्तीति अतएव बाधानुन्नीतपक्षेतरस्यानुपाधित्वं स्वव्याघातकत्वेन तद्व्यतिरेकस्य साध्याव्यावर्त्तकत्वादिति। यत्तूपाधिमात्रस्य लक्षणं व्यतिरेकिधर्म्मत्वं पक्षेतरोऽपि क्वचिदुपाधिः तत्तदुपाधेस्तु तत्तत्साध्यव्यापकत्वे सति तत्तत्साधनाव्यापकत्वं नच धूमवह्निसम्बन्धोपाधिः पक्षेतरत्वं स्यादिति वाच्यम् आपाद्याप्रसिद्धेरिति तन्न अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकमुपाधित्वमिह निरूप्यं तच्च न व्यतिरेकित्वमतिप्रसङ्गात् विशेषलक्षणे वह्निधूमसम्बन्धे पक्षेतरत्वस्योपाधित्वप्रस-

ङ्गाच्च । केचित्तु साधनव्यापकोऽप्युपाधिः क्वचिद्यत्र पक्षावृत्तिर्हेतुः यथा करका पृथिवी कठिनसंयोगात् इत्यत्रानुष्णाशीतस्पर्शवत्त्वं नच तत्र स्वरूपासिद्धिरेव दोषः सर्व्वत्रोपाधेर्दूषणान्तरसङ्करादित्याहुः । साध्यश्च नोपाधिः व्यभिचारसाधने साध्याविशिष्टत्वात् अनुमितिमात्रोच्छेदप्रसङ्गाच्च । स चायं द्विविधः निश्चितः सन्दिग्धश्च साध्यव्यापकत्वेन साधनाव्यापकत्वेन च निश्चितोव्यभिचारनिश्चयाधायकत्वेन निश्चितोपाधिः यथा वह्निमत्त्वेन धूमवत्त्वे साध्ये आर्द्रेन्धनप्रभववह्निमत्त्वं यत्र साधनाव्यापकत्वसन्देहः साध्यव्यापकत्वसंशयोवा तदुभयसन्देहो वा तत्र हेतुव्यभिचारसंशायकत्वेन सन्दिग्धोपाधिः यथा मित्रातनयत्वेन श्यामत्वे साध्ये शाकाद्याहारपरिणतिजत्वं न च तेनैव हेतुना शाकपाकजत्वमपि साध्यं तत्र श्यामत्वस्योपाधित्वादुभयस्यापि साधने अर्थान्तरं श्यामत्वमात्रे विवादो नतूभयत्र नचैवं धूमाद्वह्न्यनुमानेऽपि वह्निसामग्र्युपाधिः स्यात् तत्र वह्निनेव तत्सामग्र्यापि समं धूमस्यानौपाधिकत्वनिश्चयात् अत्र तु मित्रातनयत्वव्याप्यश्यामसामग्र्या स्यातव्यमित्यत्र कार्य्यकारणभावादीनां व्याप्तिग्राहकाणामभावात् अतएव साध्यसामग्र्या सह हेतोरपि यत्र व्याप्तिग्राहकमस्ति तत्र सामग्री नोपाधिः यत्र तु तन्नास्ति तत्र साप्युपाधिरित्यभिसन्धाय सामग्री च क्वचिन्नोपाधिर्नतु सर्वत्र इत्युक्तं यथा तुल्ययोगक्षेमयोरुपाधे-

व्यापकतासन्देहे ईश्वरानुमाने शरीरजन्यत्वाणुत्वादिः यथा च शाकपाकजत्वस्य साध्यव्यापकतासन्देहे मित्रातनयत्वे। यत्तु उपाधिसन्देहो नोपाधिर्न वा हेत्वाभासान्तरमिति तदुद्भावने निरनुयोज्यानुयोगइति तन्न सन्दिग्धानैकान्तिकवद्व्यभिचारसंशयाधायकत्वेन दूषणत्वादुपाधेरिव व्यभिचारनिश्चयाधायकतया। 96253

इदानीमुपाधेर्दूषकतावीजं निरूप्यते।

नाप्यस्य व्यतिरेकद्वारा सत्प्रतिपक्षत्वेन दूषकत्वं तदा हि सत्प्रतिपक्षे सत्प्रतिपक्षान्तरवदुपाधेरुद्भावनं न स्यात् न च प्रतिपक्षबाहुल्ये नाधिकबलार्थमुद्भावनं शतमप्यन्धानां न पश्यतीति न्यायात् एकेनापि बहूनां प्रतिबन्धाच्च व्याप्तिपक्षधर्म्मतेति बलं तच्च तुल्यमेव नतु भूयस्त्वमपि एकस्मादनुमितिदर्शनात् सन्दिग्धोपाधेरदूषकतापाताच्च तद्व्यतिरेकस्य पक्षे सन्दिग्धत्वात्। अपि चैवं बाधोन्नीतपक्षेतरस्योपाधित्वं न स्यात् व्यतिरेकेऽसाधारण्यात् पक्षधर्मस्योपाधिर्न स्यात् यथा घटोऽनित्यो द्रव्यत्वादित्यत्र कार्य्यत्वं अन्धकारो द्रव्यं स्वातन्त्र्येण प्रतीयमानत्वादित्यत्राश्रावणत्वं तद्व्यतिरेकस्य पक्षावृत्तित्वात् न च नायमुपाधिः तल्लक्षणसत्त्वात् अन्यथा दूषकत्वसम्भवाच्च। किञ्च साध्यव्यापकव्याप्यत्वेनोपाधेः साध्याव्यापकत्वे तद्व्यतिरेकेण कथं सत्प्रतिपक्ष नह्यव्यापकव्यतिरेकादव्याप्यव्यतिरेकः नापि व्याप्तिविरहरूपतया असिद्धत्वेनानौपाधिकत्वस्य व्याप्तित्वनिरासात्।

नाप्यनौपाधित्वज्ञानस्य व्याप्तिधीहेतुत्वस्य तत्त्वेन व्याप्तिज्ञानकारणविघटकतया व्याप्यत्वासिद्धावन्तर्भावः । नह्यन्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानमन्यव्याप्तिज्ञानं प्रति प्रतिबन्धकमित्युक्तम् । न च साध्यव्यापकत्वसाध्यव्याप्यत्वज्ञाने विद्यमाने साधनस्य साध्यव्यापकज्ञानं नोत्पत्तुमर्हतीति वाच्यं नहि साध्यव्यापकव्याप्यत्वज्ञानं व्याप्तिज्ञानकारणं येन तत्प्रतिबन्धकं स्यात् किन्तु साध्यव्यापकव्यभिचारित्वेन साध्यव्यभिचारित्वज्ञानद्वारा नापि व्यभिचारोन्नायकत्वेन यथाहि साध्यव्यापकव्यभिचारितया साधनस्य साध्यव्यभिचारित्वमनुमेयं तथा साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमुपाधेरप्यनुमेयं व्याप्तिग्राहकसाम्यात् नापि साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतया साध्यव्याप्याव्यापकत्वेनोपाधेरेव साध्याव्यापकत्वसाधनात् तस्मादुपाधिर्हेत्वाभासान्तरमिति ।

उच्यते आर्द्रेन्धनवत्त्वादेस्तर्कादिना साध्यव्यापकत्वसाधने व्यापकत्वे निश्चिते दूषकताबीजचिन्तनं यदि हि साध्यसाधनसहचारदर्शनेनोपाधौ साध्यव्यापकतानिश्चयएव नास्ति तदोपाधित्वनिश्चयाभावात् दूषकतैव नास्तीति क्व वह्निर्भावान्तर्भावचिन्ता । किञ्च सत्प्रतिपक्षतया व्याप्यत्वासिद्धतया स्वातन्त्र्येण वा यदि दोषत्वं सर्व्वथा साध्यव्यापकतानिश्चयोवाच्यः तेन विना तेषामभावात् । तस्मादुपाधिनिश्चयाद्व्यभिचारनिश्चयः तत्संशयात्तत्संशयइति व्यभि-

चारज्ञानद्वारा साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्ना-यकतया वोपाधेर्दूषकत्वम् ।' यद्वा साध्यव्यापकाभाववद्वृ-त्तितया साध्यव्यभिचारित्वमुन्नेयं न च साधनाभाववद्वृ-त्तित्वमुपाधिरिति वाच्यम् उपाधिमात्रोच्छेदप्रसङ्गात् सत्प्रतिपक्षे पूर्व्वसाधनव्यतिरेकवत् अवृत्तिगगनादौ साध्या-व्यापकत्वात् संयोगादौ हेतौ साधनव्यापकत्वाच्च ।

अथोपाध्याभासाः । असाधारणविपर्ययो यथान्वय-व्यतिरेकिणि साध्ये बाधोन्नीतान्यपक्षेतरत्वम् । अप्रसिद्ध-साध्यविपर्ययो यथा केवलान्वयिनि साध्ये पक्षेतरत्वादिः । बाधितसाध्यकविपर्ययो यथा वह्निरुष्णस्तेजस्त्वादित्यत्राकृत-कत्वम् । पक्षाविपर्ययो यथा क्षित्यादिकं सकर्तृकं कार्यत्वा-दित्यत्राणुव्यतिरिक्तत्वम् अत्राणुव्यतिरेकव्यतिरेकस्य क्षि-त्यादेरेकदेशवृत्त्या भागासिद्धेः । पूर्व्वसाधनव्यतिरेकोयथा शर्करारसोऽनित्योऽनित्यवृत्तिगुणत्वात् रसोनित्यो रसने-न्द्रियजन्यनिर्व्विकल्पकविषयत्वात् रसत्ववदित्यादौ पूर्वसाध-नतायाः प्रयोगानुरोधित्वेनाव्यवस्थितत्वात् कदाचिन्नित्य-त्वसाधनव्यतिरेकस्योपाधित्वं कदाचिदनित्यत्वसाधनव्यति-रेकित्वस्येति वस्तुव्यवस्था न स्यात् उपाधेर्नित्यदोषत्वाच्च । नहि यद्येन सोपाधिसम्बद्धं तत्तेनानुपाधित्वसम्बद्धं सम्भति नतु सत्प्रतिपक्षोच्छेदः पूर्व्वसाधनव्यतिरेकस्यानुपाधित्वे वीजं स्थापनाया यत्राभासत्वं तत्र पूर्वसाधनव्यतिरेकस्य साध्याव्यापकत्वेनानुपाधित्वात् न च पूर्वहेतोस्तत एवासाध-

कत्वात् सत्प्रतिपक्षवैयर्थ्यं तत्रेति वाच्यम् अगृह्यमाणविशेष-दशायां सत्प्रतिपक्षसम्भवात्। पूर्वसाधनव्याप्यव्यतिरेको यथा अकार्यत्वानुमाने नित्यत्वादिः। पक्षविपक्षान्यतरान्यो यथा प्रसिद्धानुमाने पर्वतजलह्रदान्यतरान्यत्वम्। पक्षेतर-साध्याभावो यथात्रैव पर्वतेतराग्निमत्त्वं नचात्र व्यर्थविशे-षणत्वं दूषणं सत्त्वेप्युपाधेराभासत्वात्। तत्तुल्यस्य यथा-त्रैव पर्वतेतरेन्धनवत्त्वम्। एवं वह्निसामग्र्यादिकमूह्यम्।

व्याप्त्यनन्तरं पक्षधर्म्मता निरूप्यते।

तत्र न तावत् सन्दिग्धसाध्यधर्म्मत्वं पक्षत्वम् सन्देहो हि न विशेषणं परामर्शपूर्व्वं लिङ्गदर्शनव्याप्तिस्मरणादिना तस्य नाशात् नोपलक्षणम् अव्यावर्त्तकतापत्तेः नापि साधकबाधकप्रमाणाभावः उभयाभावस्य प्रत्येकसत्त्वेऽपि सत्त्वात् नाप्यभावद्वयं तथा बाधकप्रमाणाभावस्य व्यर्थत्वात् ह्रदादेः पक्षत्वेऽपि बाधहेत्वसिद्ध्यादेरावश्यकत्वेनानुमि-त्यनुत्पादात् नापि साधकप्रमाणाभावः श्रोतव्योमन्तव्य इति श्रुत्या समानविषयकश्रवणानन्तरं मननबोधनात् प्रत्य-क्षदृष्टेऽप्यनुमानदर्शनात् एकलिङ्गावगतेऽपि लिङ्गान्तरेण तदनुमानाच्च मन्तव्यश्चोपपत्तिभिरिति स्मरणात्। अथ सिषाधयिषितसाध्यधर्म्मा धर्म्मी पक्षः तथाहि मुमुक्षोः शब्दादात्मावगमेऽपि मननस्य मोक्षोपायत्वेन सिद्धिविशे-षानुमितीच्छयात्मानुमानम् अतएव प्रत्यक्षपरिकलितम-प्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः नहि करिणि दृष्टे

चोत्कारेण तमनुमिमतेऽनुमातार इति वाचस्पतिवचन योरविरोधः अनुमित्सातद्विरहाभ्यां तदुपपत्तेरिति चेन्न सन्देहवत्परामर्शपूर्वं सिषाधयिषाया अप्यभावात् योग्यतायाश्चानिरूपणात् सिषाधयिषाविरहेऽपि घनगर्ज्जितेन मेघानुमानात् स्वकारणाधीनतृतीयलिङ्गपरामर्शबलेनानपेक्षितानुमानदर्शनाच्चेति । उच्यते सिषाधयिषाविरहसहकृतसाधकप्रमाणाभावो यत्रास्ति स पक्षः तेन सिषाधयिषाविरहसहकृतं साधकप्रमाणं यत्रास्ति स न पक्षः यत्र साधकप्रमाणे सत्यसति वा सिषाधयिषा यत्र वोभयाभावस्तत्र विशिष्टाभावात् पक्षत्वं यद्यपि पक्षत्वस्य केवलान्वयित्वात् नास्य भेदकत्वं तथापि पक्षपदप्रवृत्तिनिमित्तमुक्तम् ।

पक्षधर्मस्य व्याप्तिविशिष्टज्ञानमनुमितिहेतुः । नतु व्याप्यत्वावच्छेदकप्रकारेण व्याप्तिस्मरणं पक्षधर्मताज्ञानं तथा लाघवात् परामर्शहेतुत्वेनावश्यकत्वाच्च एवञ्च धूमो वह्निव्याप्यो धूमवांश्चायमिति ज्ञानद्वयादेवानुमितिरस्तु । न चानुमितिं प्रति व्याप्यत्वज्ञानमेव हेतुर्लाघवात् उपजीव्यत्वाच्चेति वाच्यं तस्यानुमितेः पूर्वमसिद्धौ युगपदुपस्थित्यभावात् । अथ यथा तत्ताविशिष्टस्मरणे सतीन्द्रियसन्निकृष्टे स एवायमित्यभेदप्रत्ययो भवति तथेन्द्रियसन्निकृष्टे धूमे वह्निव्याप्यधूमस्मरणे धूमत्वासाधारणधर्मदर्शनाद्व्याप्योऽयमित्यभेदप्रत्ययः स्यात् सामग्र्याः सत्त्वादिति स एवानुमितिहेतुरिति चेत् न प्रत्यक्षसामग्रीतोऽनुमिति-

सामग्र्या बलवत्त्वात् अनुमितिरेवोत्पद्यते न तु व्याप्याभेदप्रत्ययः अन्यथा तत्रापि परामर्शानन्तरं परामर्शान्तरम् तदनुव्यवसायो वा भवेन्नत्वनुमितिः। अथ धूमोवह्निव्याप्यइति स्मरतः पर्वतीयधूमेन्द्रियसन्निकर्षे प्रथमत एव व्याप्तिधूमत्वयोर्वैशिष्ट्यं यत्र भासते विशेषणज्ञानस्य पूर्वं इत्तत्वात् तत्र यत्र चाप्तवाक्याद्वह्निव्याप्यवानयमिति ज्ञानं तत्रोभयत्रापि लाघवात् पक्षधर्मव्याप्यत्वज्ञानस्य हेतुत्वकल्पनादन्यत्रापि तथेति चेत् न इन्द्रियासन्निकृष्टेऽतीन्द्रिये च लिङ्गे प्रत्यक्षविशिष्टज्ञानसामग्रीविरहात्तेन विनानुमित्यनुत्पादापत्तेः। अस्मदुक्तसामग्र्याश्च तत्रापि सत्त्वात् न चानुमानात् तत्र परामर्शोऽनवस्थानात् अथ यथा स देवदत्तो गौरो न वा परमाणुरूपाधिकरणं न वेति संशयो वह्निरस्वतन्त्रेणापि मनसा कोटिस्मरणविशेषादर्शनादिसहकारिवशाज्जन्यते यथा वा निद्रासहकारेण वाह्यस्वप्नानुभवः तथेहापि ज्ञानान्तरोपनीतविशेष्ये व्याप्तिस्मरणसहकृतेन मनसा परामर्शो जन्यते तदनन्तरमनुमितिदर्शनादिति चेत् न व्याप्तिस्मरणादेः प्रमाणान्तरतापत्तेः तदेव हि प्रमाणान्तरं यदसाधारणं सहकारि समासाद्य मनोवह्निर्गोचरां प्रमां जनयति यथेन्द्रियादि संशयस्वप्नौ तु न प्रमे इति न निद्रादेः प्रमाणान्तरत्वम्। नच तत्रापि कथं स धूमो वह्निव्याप्य इति व्यवहारः तदानीं तद्व्याप्यत्वानुभावकाभावादिति वाच्यं तत्र स्मृतधूमे धूमत्वेन वह्नि-

व्याप्यवानुमानात् न च तन्मते धूमत्वेन व्याप्त्यनुभवः सम्भवति अतएव योवह्निव्याप्यवान् सोऽवश्यं वह्निमान् इति व्याप्तिज्ञानवतोऽनुमितिर्नान्यथा। अथ पर्वतीयधूमे धूमत्वेन ज्ञाते वह्निव्याप्योऽयं न वेति संशयेऽप्यनुमितिः स्यादिति चेन्न धूमो वह्निव्याप्यइति स्मरणे विद्यमाने धूमत्वज्ञानस्य विशेषदर्शनत्वेन संशयाभावात् अन्यथा परामर्शेऽपि कुतो न स्यात् संशयेन प्रतिबन्धादिति चेत्तुल्यं न च सामान्यनिश्चयस्य सामान्यसंशयनिवर्तकत्वाद्धूमसामान्ये एव संशयो माभूत् विशेषसंशयस्य विशेषनिश्चयनिवर्तनीय इति धूमविशेषे संशयनिरासार्थं पृथग्व्याप्तिनिश्चयो वाच्य इति वाच्यं यत्र हि यद्व्यावर्तकधर्मदर्शनं तत्र न तत्संशयः तच्च सामान्ये विशेषे वेति। वस्तुतस्तु धूमत्वपुरस्कारेण व्याप्तिस्मरणे पक्षधर्मताज्ञाने चानुमितिर्भवत्येव। ननु भावोऽभावो वा उभयथापि प्रमेयमित्यत्र भावत्वाभावत्वयोर्व्याप्यत्वावच्छेदकयोरग्रहादनुमानं न स्यात् तदन्यान्यत्वरूपस्यान्यतरत्वस्य लिङ्गत्वाभावादिति चेत् न भावत्वाभावत्वान्यान्यधर्मवत्त्वस्य तत्र लिङ्गत्वात् एवं धूमालोकान्यतरत्वमपि लिङ्गम्। अथ यद्व्यतिरेकज्ञानं यदुत्पत्तिप्रतिबन्धकं तत्तन्निश्चयसाध्यं यथा च पक्षधर्मस्य व्याप्यभेदज्ञानमनुमितिप्रतिबन्धकम् अतो व्याप्याभेदज्ञानं तद्धेतुः सिध्यतीति चेन्न धूमत्वपुरस्कारेण व्याप्तिस्मरणे पक्षधर्मताज्ञाने च सति

विशेषदर्शनान्न धूमे व्याप्यभेदज्ञानं किन्तु अनुमितेरेवोत्पत्तिः तत्सामग्रीसत्त्वात् अतो व्याप्यभेदज्ञानं नानुमितिप्रतिबन्धकं येन व्याप्याभेदज्ञानं तद्धेतुः स्यात् न च धूमत्वप्रकारेण व्याप्तिस्मरणपक्षधर्मताग्रहे इयं धूमव्यक्तिर्वह्निव्याप्या नेति भ्राम्यतोऽनुमित्यापत्तिरतोविशिष्टज्ञानं हेतुरिति वाच्यं धूमत्वस्य विशेषस्य दर्शनेन तादृशभ्रमानुत्पत्तेः तत्रानुमितिसद्भावादेव अन्यथा निश्चयसामग्र्यां सत्यां भ्रमानन्तरं परामर्शएव कुतो न भवति अस्तु वा व्याप्यतया पक्षधर्मतया चावगतस्य भेदाग्रहएवानुमितिहेतुः परामर्शहेतुतया तस्यावश्यकत्वात् अतएवासन्निकृष्टधूमज्ञानादप्यनुमितिः। न चैवं गौरवं तदा विशिष्टज्ञानानुपस्थितेः। न च जनकज्ञानाविरोधिनोज्ञानस्याप्रतिबन्धकत्वात् भेदग्रहो न प्रतिबन्धक इति वाच्यम् अभेदज्ञानस्याजनकत्वात् त्वयापि लिङ्गपरामर्शे तादृशस्य प्रतिबन्धकत्वस्वीकाराच्च। अथ गोत्वं मधुरत्वावान्तरजातिर्वा लिङ्गं न स्यात् तद्गतधर्म्मान्तरस्याभावात् अतएव तस्य विलक्षणत्वात् इति चेन्न व्यक्तेरेव तत्र प्रकारत्वात् नहि गौर्गोत्वमिति ज्ञानयोरविशेषः अन्यथा गोत्वमितिज्ञानस्य निर्व्विकल्पकत्वापत्त्या व्याप्यत्वग्रहे परामर्शे चानुपयोगात् गवेतरावृत्तित्वे सति सकलगोवृत्तित्वं गोत्वत्वमित्यनुभवाच्च न चैवमनवस्था तदितरावृत्तित्वे सति तद्वृत्तित्वस्यानुभवेनापलापासम्भवात्।

अत्रोच्यते अयमालोको धूमो वा उभयथापि वह्नि-व्याप्य इति ज्ञानं ततोऽनुमितिः न च धूमत्वेनालोकत्वेन वा तत्र निश्चयः। अथ तदन्यान्यत्वमेव तत्र लिङ्गं न च तद्-ज्ञानदशायामनुमितिदर्शनात् न तथेति वाच्यं धूमालोका-न्यान्यत्वज्ञानं विना तत्रापि तत्र व्याप्यत्वानिश्चयेन तदर्थं तद्बोधावश्यकत्वादिति चेन्न नहि धूमालोकान्यान्यत्वं धूमा-न्यान्यत्वं वा व्याप्यतावच्छेदकं गौरवात् व्यभिचारावारक-विशेषणवत्वाच्च किन्तु धूमत्वादिकं तच्च तत्र सन्दिग्ध-मेव। ननु तदन्यान्यद्वह्निव्याप्यमेव व्यभिचाराभावेन व्याप्तिविरहसाधनस्य बाधितत्वात् पुरुषस्तु तत्र नीलधूम-वत्त्वादित्यत्रेवाधिकेन निगृह्यते न तु व्याप्यत्वासिद्धेति चेन्न तदन्यान्यद्धूमालोकस्वरूपमेव तच्च व्याप्यमिति सत्यं न च वस्तुगत्या व्याप्यज्ञानादनुमितिः अतिप्रसङ्गात् किन्तु व्याप्यतावच्छेदकप्रकारकज्ञानात् न च तदन्यान्यत्वं वह्नि-व्याप्यतावच्छेदकमित्युक्तम्। न चैवं तदन्यान्यत्वाद्वह्नि-व्याप्यत्वमपि तत्र नानुमेयं व्यर्थविशेषणत्वादिति वाच्यं प्रत्यक्षं हि तदन्यान्यत्वविशेषदर्शनाद्व्याप्यत्वज्ञानं जनयति विशेषणज्ञानविशेषणविशेष्यसम्बन्धविशेषणविशेष्येन्द्रियस-न्निकर्षतदसंसर्गाग्रहविशेषदर्शनानां सत्त्वेन वह्निव्याप्य-त्वप्रत्यक्षसत्त्वात् न चैवं न प्रत्यक्षेऽपि तदन्यान्यत्वज्ञानं सहकारीति वाच्यम् अन्वयव्यतिरेकाभ्यां गुरोरपि तस्य विशेषदर्शनत्वेन प्रत्यक्षसहकारित्वात् तस्मात्तदन्यान्यत्व-

ज्ञानं तत्र व्याप्यताज्ञानोपक्षीणं नतु साक्षादनुमितिहेतु-रिति किञ्च वह्निव्याप्यवानयमिति शाब्दज्ञाने व्याप्यत्वज्ञानं कारणमित्यन्यत्रापि तथा। अथ वह्निव्याप्यत्वमपि वह्नि-व्याप्यतावच्छेदकं तथाहि वह्निनिरूपिता धूमादिप्रत्येक-वृत्तिरेव व्याप्तिर्व्याप्तित्वेन सकलधूमादिवृत्तिव्याप्यवच्छे-दिका आश्रयभेदेनावच्छेदकभेदेन च व्याप्तिभेदादिति चेन्न सकलधूमादिवृत्तिव्याप्तौ मानाभावात् यत्र वह्निव्याप्यस्तत्र वह्निरिति व्याप्तिबुद्धौ शाब्दव्याप्यत्वबुद्धौ च प्रत्येकवृत्ति-व्याप्त्याश्रयत्वस्यैव विषयत्वात् प्रत्येकवृत्तिव्याप्तिज्ञानं विना तद्बोधाभावात्। अपि च यत्र धूमत्वव्याप्योर्वैशिष्ट्यं प्रथम-मेव प्रत्यक्षेण युगपत्पक्षधर्म्मे भासते तत्र लाघवात् व्याप्य-त्वज्ञानत्वमेव कारणतावच्छेदकं न चैवमतिरिक्तविशिष्टज्ञा-नकारणत्वे गौरवं दोषाय सप्रमाणकत्वात् कारणताग्रह-दशायां फलमुखगौरवस्य सिद्धासिद्धिभ्यामदोषत्वात् न चा-सन्निकृष्टे धूमे तदभावः भवन्मतानुमितिहेतुव्याप्तिस्मरण-धूमत्वज्ञानसहितेन मनसा तदुत्पादात् यथा परमाणुर्निर-वयवद्रव्यं नित्यपरिमाणवत्त्वात् आकाशवदित्यादौ प्रत्येका-नुमानोपनीतातीन्द्रियसाध्यसाधनयोराकाशवृत्तितया स्म-रणे व्यभिचाराज्ञाने मनसा व्याप्त्यनुभवः। अनुमानयोः प्रत्येकतदुभयसहचाराविषयत्वेन व्याप्तिग्राहकत्वात् न चाती-न्द्रियव्याप्यत्वमतीन्द्रियेऽनुमेयं तत्रापि व्याप्तिग्राहकाभावात् नच तदुपनयसहितस्य मनसोबहिरर्थप्रमाहेतुत्वे उपनयस्य

प्रमाणान्तरत्वम् इन्द्रियादेः सन्निकर्षवदुपनयस्य नियत-व्यापाराभावेन प्रमायामकरणत्वात् सहकारिता च तद-भावेऽपि भवति वह्निरिन्द्रियलिङ्गसादृश्यादिव्यापारं विना-पि चिन्तोपनीतपदार्थानां बाधकानवतारे मनसा संस-र्गानुभवस्य सकलजनसिद्धात् कथमन्यथा कविकाव्यादिक-मिति। स्यादेतत् पक्षधर्मस्य व्याप्यताज्ञानं नेन्द्रियेण वह्नेरसन्निकर्षे तन्नियतसामानाधिकरण्यस्य व्याप्यत्वस्या-योग्यत्वात्। न च धूमत्वेन सकलधूमव्याप्यतावगमात् धूम-विशेषे संस्कारात् स्मरणाद्वोपनीतव्याप्याभेदग्रहः प्रत्यभि-ज्ञाने तत्ताविशिष्टस्येवेति वाच्यम् एवं हि धूमवत्त्वेन वह्नि-मत्त्वज्ञानात् धूमवद्विशेषे पर्व्वते संस्कारवशात् प्रत्यक्षेण व्याप्तिज्ञानापेक्षेण वह्निमद्भेदग्रहोवह्निमत्त्वसंसर्गग्रहो वास्तु किमनुमानेन पृथक् वह्निमत्त्वस्मरणं तत्र नास्ति किन्तु व्याप्यवच्छेदकतयेति चेन्न वह्निमान्न वेति संशया-नुरोधेन स्वतन्त्रवह्निमत्त्वस्मरणात्। न च विशिष्टज्ञाने स्वतन्त्रविशेषणज्ञानत्वेन हेतुत्वं गौरवात्। अथ योयत्र विशिष्य पूर्व्वमवगतः स तत्र संस्कारवशाद्यथार्थप्रत्यक्षे भासते यथा तत्ताप्रत्यभिज्ञाने न च पर्वते विशिष्य पुरा वह्निरवगतः यत्र चन्दने सौरभमुपलब्धं तत्र संस्कारवशा-च्चक्षुषा सुरभि चन्दनमिति ज्ञानमन्यथानुमितिरिति चेत् तर्हि पक्षधर्म्मधूमेऽपि न पुरा विशिष्य व्याप्तिरवगतेति कथं संस्कारवशात्तद्गतव्याप्तिबोधः प्रत्यक्षेण। न च सहचार-

दर्शनजन्यसंस्कारसहितेनेन्द्रियेण व्यभिचारज्ञानाभावे सति महानसीयधूमवत्पर्वतीयधूमे व्याप्यवगमो वह्नेस्तु न प्रत्यक्षसामग्री सन्निकर्षाभावादिति वाच्यं हेतुसाध्य-साक्षात्कारं विना प्रत्यक्षेण व्याप्यग्रहात्। न च पर्वते वह्निसाक्षात्कारः न च पक्षधर्मस्य साध्यसामानाधिकरण्य-विशेषोव्याप्तिः पक्षे साध्यग्रहं विनेत्युक्तम्। उच्यते विशे-षणज्ञानं तस्य विशेष्ये सम्बन्धस्तयोरसंसर्गाग्रहोविशेष-दर्शनं विशेषणविशेष्येन्द्रियसन्निकर्षो गौरयमित्यादियथा-र्थविशिष्टप्रत्यक्षकारणम् अस्ति चात्रापि व्याप्तिस्मरणं स्मृत-व्याप्तेः पक्षवृत्तिधूमे सत्त्वम् एकैव हि सा व्याप्तिः तयोर-संसर्गाग्रहोधूमत्वविशेषदर्शनं व्याप्तिविशिष्टधूमेन्द्रियसन्नि-कर्षश्च व्याप्तिविशिष्टज्ञानकारणं न च वह्निविशिष्टज्ञान-सामग्री वह्नेरसन्निकर्षात्। कश्चित्तु धूमत्वे परम्परा-सम्बन्धेन वह्निव्याप्यत्वं पूर्वं गृहीतं तथा च संस्कारोपनीतं वह्निव्याप्यत्वं परम्परासम्बन्धेन पक्षवृत्तिधूमत्वे प्रत्यभिज्ञा-यते तद्वृत्तित्वेन पूर्वमनुभवात् एवञ्च धूमत्वव्याप्यत्वपरा-मर्शादेवानुमितिरिति प्राह। भवतु तावदेवं तथापि जातिरेव लिङ्गं स्यात् न तु व्यक्तिः तथा च सर्व्वोपसंहा-रेण व्यक्तौ व्याप्तिग्रहार्थं सामान्यलक्षणप्रत्यासत्त्युपादान-मफलं स्यात् दृश्यते च परम्परासम्बन्धज्ञानं विना जाति-व्याप्तिमविदुषोऽपि धूमाद्वह्न्यनुमानं नहि व्याप्यतावच्छेद-कतया भासमानस्यावश्यं व्याप्यताग्रहः मानाभावात्

तस्मात् पक्षधर्मे व्याप्तिविशिष्टज्ञानं तदनन्तरविशिष्टवैशिष्ट्य ज्ञानं पक्षे वा तृतीयलिङ्गपरामर्शः। अन्ये तु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं व्यापकत्वं तत्सामानाधिकरण्यञ्च व्याप्यत्वं तथा च लाघवात् व्यापकताज्ञानमनुमितिहेतुः साध्यस्य पक्षधर्मव्यापकताज्ञानञ्च परामर्शः नतु साध्यव्याप्तस्य पक्षधर्मताज्ञानं साध्यव्याप्यवत्पक्षधर्मताज्ञानं वा गौरवात् अतएव योयोधूमवान् सोऽग्निमानित्युदाहरणवाक्ये साध्यायोगव्यवच्छेदेन धूमव्यापकता वह्नेरुपदर्श्यते अन्यथा वह्निमानेव धूमवानित्यन्ययोगव्यवच्छेदेनोदाहरणशरीरं स्यात् दोषोऽपि व्यभिचारादिर्न पक्षधर्मव्यापकं साध्यमित्येवोन्नाव्यः। अथ पर्वतवृत्तिधूमव्यापको वह्निरितिपरामर्शो यदि तदा पर्वतीयधर्मं प्रति व्यापकतायाः पर्वतधूमसामानाधिकरण्यनैयत्यात् पर्वतवह्निः परामर्शविषयएवेति किमनुमेयमिति चेत् तर्हि पवतीयधूमे नियतसाध्यसामानाधिकरण्यस्य व्याप्यत्वस्य भानं साध्यसामानाधिकरण्यभाननियतमिति व्याप्यत्वभानेऽपि तुल्यम्। यदि च स्मृता व्याप्तिर्धूमेऽवगम्यते तदा व्यापकत्वेऽपि समानं वस्तुतस्तु व्यापकत्वं तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं नतु धूमसामानाधिकरण्यं व्याप्यत्वन्तु सामानाधिकरण्यविशेषइति तवैवानुमितिरफला स्यात्। न चैवं परामर्शस्य चाक्षुषत्वं न स्याद्व्यापकस्य विशेष्यस्येन्द्रियासन्निकर्षादिति वाच्यम् इष्टत्वात् असन्निकृष्टधूमादाविव मानसएव हि

सर्वत्र परामर्शः तत्तदन्वयव्यतिरेकानुविधानञ्च पक्षवृत्ति-धूमोपनयोपक्षीणम्। अथ जनकज्ञाने उपसर्ज्जनतया भातस्य पक्षस्य पर्वतादेरनुमितौ प्राधान्येन भानं न स्यात् नहि जनकज्ञाने उपसर्ज्जनतयावगतं जन्यज्ञाने प्राधान्येन भासते तथादर्शनात् न चानुमितेस्तथात्वमसिद्धं पर्वतोऽयं वह्निमानित्यनुमितेर्लौकिकसिद्धत्वादिति चेन्न पुरुषस्य दण्ड-वृत्ति ज्ञानानन्तरं दण्डी पुरुषवृत्तिज्ञानजन्यज्ञानदर्शनात् अन्यथा तवापि कथं पक्षविशेष्यकत्वनियमः नहि कारणी-भूतज्ञाने यद्विशेष्यतया भासते तत्कार्य्यीभूतेऽपि तथा दृष्ट-भूतले घटो नास्तीति ज्ञानजन्ये घटाभाववद्भूतलमितिज्ञाने तत्र च व्यभिचारात् तस्मात् पक्षवृत्तिलिङ्गपरामर्शस्यायं स्वभावो यत्स्वाश्रयविशेष्यिकामनुमितिं जनयति नातथा-भूतामेवं ममापि तुल्यमिति।

एवं लिङ्गपरामर्शः कारणं ननु परामृश्यमाणं लिङ्गम्। अथ परामर्शमात्रं न हेतुरपि तु लिङ्गपरामर्शः तथाच लिङ्गमपि हेतुः विशिष्टकारणताग्राहकमानेन बाधकं विना विशेषणस्यापि हेतुत्वग्रहात् न च लिङ्गं परामर्श-परिचायकत्वे नान्यथासिद्धं परिचये विशेषणान्तराभावेन लिङ्गमेव विशेषकं तथाचानन्यथासिद्धत्वात् तदपि हेतुः अन्यथा परिचायकतया संयोगेनान्यथासिद्धमिन्द्रियमपि कारणं न स्यात् अपि च धूमवान् वह्निमानिति धूम-समानकालवह्निविषया धमविशेषणिकानुमितिः न्याय-

मानविशेषणजन्या विशेषणसमानकालतया विशेष्यविषयेऽप्यबाध्दविशिष्टज्ञानत्वात् दण्डी पुरुष इति प्रत्ययवत् अतएव ज्ञायमानविशेषणजन्यत्वेन विशेषणकालवृत्तितया विशेष्यभाननैयत्यं यथा दण्डी पुरुषइतिप्रत्यक्षे तेन धूमसमानकालीनवह्निसिद्धिः अन्यथा तत्तद्धूमकालवृत्तिवह्नग्रनुमानं न स्यात् समयविशेषमन्तर्भाव्य व्याप्त्यग्रहात्। किञ्च लिङ्गकारणत्वपक्षे परामर्शएव तद्व्यापारः परामर्शस्य तु न व्यापारान्तरमस्ति चरमकारणत्वादिति न तत् कारणम्।

अत्रोच्यते।

अतीतानागतधूमादिज्ञानेऽप्यनुमितिदर्शनान्न लिङ्गं तद्धेतुः व्यापारपूर्व्ववर्त्तितयोरभावात् न च विद्यमानं लिङ्गान्तरमेव तद्धेतुः तदा तस्यापरामर्शात् परामर्शाविषयस्य कारणताग्राहकाभावात् भाविनि पक्षे व्यक्त्यैक्यमेव वा यत्र लिङ्गं तत्र लिङ्गान्तराभावाच्च यदि च वर्त्तमानमेव तत्र लिङ्गं तदा वर्त्तमानवह्नग्रनुमानोपपत्तिः अथ भाविभूतं वा धूमादि न लिङ्गं किन्तु तत्प्रागभावप्रध्वंसश्च वर्त्तमानएव तयोरपि वह्निसमानदेशत्वनियमादिति चेन्न अतीतभाविदिनवृत्तितया निश्चितात् वर्त्तमानतया सन्दिग्धात् धूमादनुमितौ हि न प्रागभावध्वंसौ लिङ्गे तयोः सन्दिग्धत्वात् नापि धूमस्तस्यावर्त्तमानत्वात् किञ्च भूतभाविवर्त्तमानत्वाविषयात् पर्व्वते धूमइति ज्ञाना-

द्यतानुमानं तत्र का गतिः सर्व्वत्र प्रागभावाद्यन्यतमत्वं धूमाद्यत्यन्ताभावाभावत्वं वा लिङ्गमिति चेत् न व्यर्थविशेषणत्वेन तेषामलिङ्गत्वात् अन्यतमत्वाद्यज्ञानेपि धूमज्ञानादनुमितिसत्त्वाच्च। अपि च न धूमप्रागभावादिलिङ्गं न वा तज्ज्ञैरनुमितिकारणं प्रागभावादीनां व्यर्थत्वात् आवश्यकधूमज्ञानादेवानुमितिसम्भवाच्च । किञ्च लिङ्गं नानुमितिमात्रे हेतुः लिङ्गं विनापि धूलीपटलात् लिङ्गभ्रमेणानुमित्युत्पत्तेः नापि लिङ्गं प्रमानुमितौ परामर्शोऽनुमितिमात्रे हेतुः तद्विशेषप्रमात्वाप्रमात्वाभ्यामेवानुमितितथात्वात् यत्सामान्ये यत्सामान्यं प्रयोजकं तद्विशेषे तद्विशेषस्य प्रयोजकत्वात्। अथ परामर्शस्य प्रमात्वं विद्यमानलिङ्गविषयत्वं तथाचायातं लिङ्गस्य प्रमानुमितिहेतुत्वमिति चेन्न भाविनाभूतेन वा यदाकदाचिद्विद्यमानेनापि लिङ्गेन परामर्शप्रमात्वसम्भवान्नानुमितिपूर्व्वसमये तत्प्रमात्वानुरोधेन लिङ्गस्य सत्त्वं कारणत्वं वा धूमकालीनवह्न्यनुमानञ्च यदा यत्र धूमस्तदा तत्र वह्निरितिव्याप्तिज्ञानादेव। अथवा धूमकालः पक्षतावच्छेदकः पक्षतावच्छेदकधर्म्मसमानाधिकरणश्च पक्षधर्म्मवलात् साध्यं सिध्यतीति धूमकालीनवह्निसिद्धिः। यत्तु व्यापारभावान्न परामर्शः कारणमिति तथैव किन्तु व्याप्तिज्ञानं कारणं परामर्शोव्यापारः। न च परामर्शस्य संस्कारोव्यापारः परामर्शस्य च चरमकारणत्वेन संस्कारो-

त्पादनसमयेऽनुमित्युत्पादनात् नापि तर्कः व्याप्तिग्राहकस्य विषयपरिशोधकस्य वा तस्य तदजन्यत्वादिति ।

तच्चानुमानं त्रिविधं केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिभेदात् । तत्रासद्विपक्षं केवलान्वयि तथाहि केवलान्वयिनोऽभिधेयत्वस्य न विपक्षः अभिधानेऽनभिधाने च विपक्षत्वव्याघातात् । अथ यथा आकाशशब्दाच्छब्दाश्रयत्वमनभिधेयमप्युपतिष्ठते तथाभिधेयत्वविपक्षस्यानभिधेयत्वेऽपि पदादुपस्थितिः स्यात् एवञ्चाभिधेयत्वं कुतोऽपि व्यावृत्तं धर्म्मत्वात् गोत्ववदिति चेन्न व्यावृत्तत्वस्याव्यावृत्तत्वे व्यावृत्तत्वमेव केवलान्वयिव्यावृत्तत्वे यतएव व्यावृत्तं व्यावृत्तत्वं तदेव केवलान्वयीति धर्म्मत्वस्यानैकान्तिकत्वात् एवमत्यन्ताभावप्रतियोगित्वस्यात्यन्ताभावाप्रतियोगित्वे अत्यन्ताभावप्रतियोगित्वमेव केवलान्वयि अत्यन्ताभावप्रतियोगित्वे यन्निष्ठात्यन्ताभावप्रतियोग्यत्यन्ताभावप्रतियोगित्वं तदेव केवलान्वयि नचात्यन्ताभावप्रतियोगित्वं व्यावृत्तत्वञ्च नानेति वाच्यम् अनुगतप्रतीतिबलेन गोत्ववत्तयोः सिद्धेः तत्र न तावद्व्याप्यवृत्त्यत्यन्ताभावः केवलान्वयी तस्य प्रतियोग्यवच्छिन्नेप्यत्यन्ताभावात् अत्यन्ताभावप्रतियोगिनश्च केवलान्वयित्वात् नाप्याश्रयनाशजन्य गुणनाशात्यन्ताभावः तस्य नाशस्य सर्व्वत्रात्यन्ताभावादिति वाच्यं यत्र हि प्रतियोगिप्रागभावौ वर्त्तेते तत्र न तदत्यन्ताभावो वर्त्तते तथाच नाशस्य प्रागभावो यत्र नाशप्रति-

योगिसमानदेशे वर्त्तते तत्र कथं नाशात्यन्ताभावो वर्त्ततां तर्हि नाशस्य तत्र वृत्तिः स्यादिति चेन्न पूर्व्वं तत्र नाश-प्रागभावस्यैव सत्त्वादुत्तरकाले चाश्रयस्यैवाभावात् । नाप्याकाशात्यन्ताभावः केवलान्वयी तस्यापि प्रतियोगि-रूपात्यन्ताभावप्रतियोगित्वात् अभावात्यन्ताभावस्य भाव-त्वात् । अथाभावात्यन्ताभावो न प्रतियोगिरूपस्तथासत्य-न्योऽन्याभावात्यन्ताभावः प्रतियोगिरूप इति प्रतियोगि-समानदेशोऽन्योऽन्याभावो न स्यादिति चेन्न अत्यन्ताभा-वात्यन्ताभावः प्रतियोग्येव अन्योऽन्याभावात्यन्ताभावस्तु प्रतियोगिवृत्तिरसाधारणो धर्मइति । उच्यते वृत्तिमदत्य-न्ताभावाप्रतियोगित्वं केवलान्वयित्वं आकाशात्यन्ताभावो यद्यपि प्रतियोगिरूपात्यन्ताभावप्रतियोगी तथापि स न वृत्तिमानित्याकाशात्यन्ताभावएव केवलान्वयी तथाप्रमेय-त्वाभिधेयत्वादि केवलान्वयि वृत्तिमतोऽत्यन्ताभावस्याप्रति-योगित्वात् । ननु प्रमेयत्वं प्रमाविषयत्वं तच्च न केवला-न्वयि प्रमायाविषयत्वस्य चाननुगमादिति वाच्यं प्रमात्व-मेव हि परम्परासम्बन्धात् घटादौ प्रमेयत्वमनुगतं प्रमा-जातीयविषयत्वं वा तथापि केवलान्वयिनि संशयाभावात् कथमनुमितिः प्रमेयत्वमत्र वर्त्तते न वेति संशयश्च न प्रमे-यपक्षकः किन्तु प्रमेयत्वपक्षको भिन्नविषयकः प्रमेयत्वपक्षके चाखिलसाध्यस्यान्वयव्यतिरेकित्वं तथाच घटः प्रमेयो न वेति संशयो मृग्यते स च नास्त्येव । अथ पक्षः साध्यवाञ्च

वा पक्षे साध्यमस्ति न वेति संशयौ समानविषयकावेव तदस्यास्त्यस्मिन्निति मतुपोविधानादिति चेन्न विशेषणविशेष्यभावभेदेनार्थभेदात् मैवं य एव हि संशयः पक्षे साध्यसिद्धिविरोधी स एवानुमानाङ्गमावश्यकत्वात् लाघवाच्च न तु समानविषयकत्वमपि तत्र तन्त्रं गौरवात् प्रमेयत्वं घटनिष्ठात्यन्ताभावप्रतियोगि न वेति संशयश्च घटः प्रमेय इति साध्यसिद्धिविरोधी भवत्येव यद्वा संशययोग्यतैवानुमानाङ्गं संशयस्य तदानीं विनाशात् न च सापि साधकबाधकप्रमाणाभावः प्रमेयत्वाभावासिद्धौ तत्प्रमाणासिद्धेस्तदभावासिद्धिरिति वाच्यं पक्षनिष्ठात्यन्ताभावाप्रतियोगित्वज्ञानस्यैव साध्यसाधकत्वेन तदभावस्यैव योग्यतात्वात् प्रमेयत्वमत्यन्ताभावप्रतियोगीति भ्राम्यतः संशय इत्यन्ये। नन्वेकरूपविकलमिदं कथं गमकं तत्त्वे वा व्यतिरेकविकलवत् रूपान्तरविकलमपि गमकं स्यादिति चेन्न अन्वयव्यतिरेकव्याप्त्योरन्यतरनिश्चयेनानुमित्यनुभवात् युगपदुभयव्याप्त्युपस्थितौ विनिगमकाभावेन उभयोरपि प्रयोजकत्वे व्यतिरेकोपासना व्यतिरेकस्य विपक्षवृत्तित्वशङ्कानिवृत्तिद्वारा व्यतिरेकव्याप्तावुपयुज्यते अत्र तु विपक्षाभावेन शङ्कैव नोदेति।

केवलव्यतिरेकी त्वसत्सपक्षो यत्र व्यतिरेकसहचारेण व्याप्तिग्रहः। ननु व्यतिरेकी नानुमानं व्याप्तिपक्षधर्मताज्ञानस्य तत्कारणत्वात् अत्र व्यतिरेकसहचारात् तत्र

व्याप्तिरन्वयस्य पक्षधर्मता न च व्याप्तपक्षधर्मत्वं साध्याभावव्यापकाभावप्रतियोगित्वसत्त्वमुभयमप्यनुमितिप्रयोजकमिति वाच्यम् अननुगमात् नचान्यतरत्व तथा एकप्रमाणपरिशेषापत्तेः न च तृणारणिमणिन्यायेनानुमितिविशेषे तद्धेतुत्वमिति वाच्यं व्यतिरेकिसाध्येऽनुमितित्वासिद्धेः उभयसिद्धक्लृप्तत्कारणस्याभावात् न च साध्याभावव्यापकाभावप्रतियोगित्वमेवानुमितिप्रयोजकमिति वाच्यं गौरवात् केवलान्वयिन्यभावाच्च । अथ साध्याभावव्यापकाभावप्रतियोगित्वेन साध्यव्याप्यत्वमनुमेयम् एवं व्यतिरेकव्याप्त्यान्वयव्याप्तिमनुमाय यत्रानुमितिः सएव व्यतिरेकीत्युच्यते तत्र अन्वयव्याप्तेर्गमकत्वे व्यतिरेकव्याप्त्युपन्यासस्यार्थान्तरतापत्तेः अन्वयव्याप्त्यनुकूलतया च तदुपन्यासे अन्वयव्याप्तिमनुपन्यस्य तदुपन्यासस्याप्राप्तकालत्वमिति । उच्यते निरुपाधिव्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते प्रतियोग्यनुयोगिभावस्य नियामकत्वात् अन्वयव्यतिरेकवत् । नन्वेवं व्याप्तिग्रहएव पृथिवीतरभिन्नेति भासितं नियतसामानाधिकरण्यरूपत्वाद्व्याप्तेरिति सत्यं गन्धवत्त्वावच्छेदेनेतरभेदस्य साध्यत्वात् अतएवाचार्य्यैः पक्षतावच्छेदकस्य न हेतुत्वमनुमेने पृथिवीत्वमितरभेदव्याप्यमितिप्रतीतावपि सर्व्वा पृथिवीतरभिन्नेऽति पृथिवीविशेष्यकबुद्धेर्व्यतिरेकिसाध्यत्वाच्च । यद्वा व्यतिरेकव्याप्तेरेवान्वयेन गम्यगमकभावः साध्याभावव्यापकसाधनाभावाभावेन साधनेन सा-

प्याभावाभावस्य साध्यस्य साधनात् व्यापकाभावेन व्याप्याभावस्यावश्यम्भावात्। अथैवं न सानुमितिः ज्ञातहेतुलिङ्गपरामर्शाभावादन्यथाननुगम इति चेन्न अनुमितिमात्रे व्याप्तिज्ञानस्य प्रयोजकत्वात् नचैवमतिप्रसङ्गः अनुमितिसामान्यसामग्र्यां सत्यामप्यनुमितिविशेषसामग्रीविरहादनुमित्यनुत्पत्तेः विशेषसामग्रीसापेक्षायाएव सामान्यसामग्र्या जनकत्वात् अन्वयिव्यतिरेकिविशेषद्वयसामग्री च नास्त्येव। ननु पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादिति-व्यतिरेकिणि साध्यमसिद्धं तथा च न व्यतिरेकिनिरूपणं न वा पक्षत्वं न वा लिङ्गजन्यसाध्यविशिष्टतज्ज्ञानं तेषां साध्यज्ञानजन्यत्वात्। अथ साध्यं प्रसिद्धं तदा यत्र प्रसिद्धं तत्र हेतोरवगमेऽन्वयित्वं अनवगमे असाधारण्यम्। किञ्च इतरभेदो न स्वरूपं अधिकरणप्रतियोगिनोः पृथिवीजलाद्योरनुमानात् प्रागेव सिद्धेः नापि वैधर्म्यं जलादिनिष्ठात्यन्ताभावप्रतियोगिमत्त्वं तद्धि पृथिवीत्वादिकं तच्च सिद्धमेव न च जलादिनिष्ठात्यन्ताभावप्रतियोगित्वेन पृथिवीत्वं न सिद्धमिति वाच्य जलादौ पृथिवीत्वात्यन्ताभावग्रहदशायां पृथिवीत्वेऽपि तत्प्रतियोगित्वग्रहात् अन्योऽन्याभावस्तु भेदो यद्यपि साध्यं सम्भवति वैधर्म्यज्ञानसाध्यत्वादन्योऽन्याभावग्रहस्य तथापि जलादिप्रतियोगिकान्योऽन्याभावस्याप्रसिद्धिः न च जलादिप्रत्येकान्योऽन्याभावः साध्योऽसाधारण्यप्रसङ्गात्। अथ पृथिवी तेजोभिन्ना न वेतिसंश·

येन तेजोभिन्नत्वेऽवगते पृथिवी तेजोभिन्ना सती जलादि-द्वादशभिन्ना न वेति संशये तेजोभिन्नत्वे सति जलादि-द्वादशभिन्नत्वं प्रसिद्धं तदेव साध्यम् एकविशेषणविशिष्टे विशेषणान्तरबुद्धेरेव विशिष्टवैशिष्ट्यज्ञानात् एवञ्च संशय-प्रसिद्धं साध्यमादाय व्यतिरेकादिनिरूपणम् । यद्वा पृथिवी इतरभिन्ना नवेति प्रत्येकं त्रयोदशसंशयविषयाणां त्रयो-दशान्योऽन्याभावानां समुदायः पृथिव्यामवगतो व्यतिरेका-दिनिरूपकः नचैवं पृथिव्यामेव साध्यप्रसिद्धेर्व्यतिरेकि-वैयर्थ्यं साध्यनिश्चयार्थं व्यतिरेकिप्रवृत्तेः न चासाधारण्यं समुदितान्योऽन्याभावानां साध्यत्वे सपक्षाभावादिति चेन्न साध्यनिश्चये हि साध्यव्यतिरेकनिश्चयोभवत्येव साध्यसन्देहे तद्व्यतिरेकसंशयस्य वज्रलेपत्वात् तथा च संशयरूपासाध्य-सिद्धिरिति शिष्यबन्धनम् एतेन पृथिवी जलादिभ्योभिन्नेति विप्रतिपत्तिरूपवादिवाक्यादाकाङ्क्षादिमतोऽपूर्व्वार्थप्रतिपा-दकत्वात् साध्यप्रसिद्धिरिति परास्तम् वाक्यादेव पृथिव्यां साध्यसिद्धेर्व्यतिरेकिवैयर्थ्यात् । न च तद्बुद्धौ वादिवाक्य-जन्यत्वेनाप्रामाण्यसंशयात् निश्चयेऽपि संशयइति तन्निश्च-यार्थं व्यतिरेकीति वाच्यं तर्हि संशयप्रसिद्धं साध्यं तस्य च न व्यतिरेकनिश्चायकत्वमित्युक्तत्वात् स्वार्थानुमाने तद-भावाच्च ।

उच्यते घटादावेवेतरसकलभेदस्य प्रत्यक्षः प्रसिद्धिः घटो न जलादिरितिप्रतीतेः । नन्वयमन्योऽन्याभावो न

प्रत्यक्षः अतीन्द्रियप्रतियोगिकाभावत्वात् परमाणुसंसर्गाभाववत् योग्यानुपलब्धेरभावग्राहकत्वात् नयनोन्मीलनानन्तरं स्तम्भः पिशाचो न भवतीति प्रतीतेर्बाधकबलेन वायुर्वातीतिवल्लिङ्गग्रहोपक्षीणत्वादिति चेन्न योग्यानुपलम्भोऽधिकरणे प्रतियोगिसत्त्वविरोधी सोऽभावं ग्राहयति न तु योग्यानुपलब्धिमात्रम् अन्यथा वायौ रूपाभावप्रतीतिवत् जलपरमाणौ पृथिवीत्वाभावग्रहप्रसङ्गात् अधिकरणे प्रतियोगिसत्त्वञ्च तर्कितं यदि हि स्तम्भः पिशाचः स्यात् स्तम्भवदुपलभ्येतेति पिशाचानुपलम्भः स्यात् न च पृथिवी जलादिभ्द्यते जलाद्यवृत्तिधर्म्मवत्त्वात् तेजोवत् एवमन्येभ्योऽपि भेदसिद्धौ द्वादशभिन्नेतिविशेषणदलासमवायभेदसाधनादन्वयिन एव पृथिव्यां त्रयोदशभेदसिद्धिरिति किं व्यतिरेकिणेति वाच्यं जलादिभिन्ना सती समवायभिन्नेति बुद्धावपि त्रयोदशभिन्नेतिबुद्धेर्व्यतिरेकिसाध्यत्वात् न च घटस्यापि पक्षत्वादंशतः सिद्धसाधनं सर्व्वा पृथिवीतरभिन्नेत्युद्देश्यप्रतीतेरभावात् पक्षतावच्छेदकनानात्वे हि तत् अतएवानित्ये वाङ्मनसे दूत्यत्रानित्या वागितिबुद्धेरुद्देश्याया: सिद्धत्वादंशतः सिद्धसाधनम् अन्यथानुमानमात्रोच्छेदात् पक्षस्य सिद्धस्यैव साध्यत्वात् न च घटः कथं पक्षः साध्यनिश्चयेन संशयसिषाधयिषयोरभावादिति वाच्यं सर्व्वा पृथिवी इतरभिन्ना न वेति संशयस्य तत्प्रकारकसिषाधयिषयोश्च सामान्यतो घटविषयत्वात् घटत्वेन विशेष-

दर्शनं सिद्धिर्वा अतस्तेन संशयसिषाधयिषे न स्तः पृथिवीत्वेन ते भवतः एवं धूमवान् वह्निमानिति धूमत्वेन वह्निनिश्चयेऽपि पर्व्वते वह्निसंशयवत् यद्वा सर्व्वत्वेन रूपेण न पक्षता सर्व्वत्राविप्रतिपत्तेः घटाद्येकदेशे इतरभेदस्य प्रत्यक्षसिद्धत्वात् तथाचैकदेशे विप्रतिपत्तौ सामान्ये इतरभेदसाधने अर्थान्तरं किन्तु सामान्येन पृथिवीत्वेन यावदेव विप्रतिपत्तिविषयस्तावतामेव पक्षता विशेषानुगमात्। तर्हि पृथिवी इतरभिन्ना पृथिवीत्वाद्घटवदित्यन्वयिनैवेतरभेदस्य सिद्धत्वात् किं व्यतिरेकिणा घटसाधारणपक्षत्वेऽप्यभेदानुमानवत् पक्षस्यापि दृष्टान्तत्वाविरोधात् पक्षान्यत्वं हि तत्रातन्त्रं किन्तु साध्यवत्तया निश्चितत्वं प्रयोजकं न च पृथिवीत्वाग्रहे पूर्व्वं गृहीतं यत्र साध्यं पश्चात् स्मर्य्यते तत्र हेतुसाध्यसामानाधिकरण्याग्रहाद्व्यतिरेक्यवतार इति वाच्यं हेतोरेव पक्षतावच्छेदकत्वेन घटे पृथिवीत्वग्रहदशायामितरभेदसामानाधिकरण्यग्रहावश्यम्भावादिति चेत् सत्यं अन्वयितुल्यतया व्यतिरेकिणोऽपि सामर्थ्यादन्वयाप्रतिसन्धानदशायां व्यतिरेक्युपन्यासस्यापि पर्य्यनुयोज्यत्वात् तदुक्तमास्तां तावदयं सुहृदुपदेशः केवलव्यतिरेकिलक्षणं तावन्निर्व्यूढम्। अथ वा जलादीनां त्रयोदशान्योऽन्याभावाः त्रयोदशसु प्रसिद्धाः पृथिव्यां साध्यन्ते अतएवाकाशे व्यतिरेकिणा जलादिमिलितप्रतियोगिकान्योऽन्याभावाप्रतीतावपि त्रयोदशान्योऽन्याभावाः साध्या-

इति नान्वयित्वासाधारण्ये। यद्वा जलं तेजःप्रभृति द्वाद-
शभिन्नप्रतियोगिकान्योऽन्याभाववत् द्रव्यत्वात्तेजोवदित्य-
नुमानात्त्रयोदशभिन्नस्य सामान्यतः सिद्धौ पृथिव्यां त्रयो-
दशभिन्नत्वं साध्यं न चान्वयित्वसाधारण्यं वा पश्चादन्यत्र
साध्याप्रसिद्धेः वस्तुगत्या पृथिव्यामेव साध्यसिद्धिः किं
व्यतिरेकिणेति चेन्न पृथिवी त्रयोदशभिन्नेति व्यतिरेकिणं
विना अप्रतीतेः। नन्वेवं पृथिवी जलादित्रयोदशभिन्न-
प्रतियोगिकान्योऽन्याभाववती द्रव्यत्वादिति पृथिवीभिन्न-
तद्भिन्नादिसिद्धिः स्यादिति चेन्न अप्रयोजकत्वात् प्रकृते
चानुभूयमान जलादिवैधर्म्यस्य पृथिवीत्वाश्रयगन्धाश्रयत्वा-
देरतिरिक्तं विनानुपपत्तेः। नन्वितरभेदो यद्यन्योऽन्या-
भावस्तदा भावाद्भेदो न सिद्ध्येत अभावस्याभावान्तराभा-
वात् यदि च तेन समं स्वरूपभेदएव साध्यः तदाननुगमा-
दनुमानाप्रवृत्तिः भावोऽभावो न भवतीत्यबाधितप्रतीति-
बलादभावस्यापि अन्योऽन्याभावोऽस्तीति केचित् तन्न अप-
सिद्धान्तात् नन्वतिप्रसक्ताधिकरणस्वरूपमात्रेणैवाभावप्र-
तीत्युपपत्तौ बाधिकाभावेमानाभावाच्च इति चेन्न इतर-
भावान्योऽन्याभावस्य साध्यत्वात् न चैवमभावादविवेकता-
दवस्थ्यं तेन समं स्वरूपभेदस्यान्वयिना व्यतिरेकिणा वा
साध्यत्वात्। अन्ये तु पृथिवीत्वभिन्नधर्मात्यन्ताभावएव
साध्यः जलत्वादिप्रतियोगिकास्तावन्तोऽत्यन्ताभावा वा
तत्तदसाधारणतत्तद्धर्मात्यन्ताभावयोगो वा एते चाभावा

जलत्वं न घटादौ घटादिजलात्यन्ताभाववदिति प्रत्ययादेः क्वचित्तत्तद्वैधर्म्यादेव प्रसिद्धा इति नाप्रसिद्धिः तावता-मभावानां वैशिष्ट्यं न प्रसिद्धमिति चेत् किमेतावता नहि तावद्वैशिष्ट्यमत्र साध्यते किन्तु जलत्वादीनां यावन्तोऽभावा इह साध्यास्ते च तत्र तत्र प्रसिद्धाएव तावद्वैशिष्ट्य-धीस्तु फलम् अन्यथा सिद्धसाधनात् मिलितानामपि साध्यत्वेनाप्रसिद्धिः किञ्चिदेकधर्म्मावच्छेदो हि वत्वादिवन्मे-लकार्थः सच नासिद्धः न च हेतोरसाधारण्यं तावदभाव-योगीत्यत्र सपक्षो भवति न तु तदेकदेशकतिपयाभाववान् साध्यतायास्तावत्यपर्य्याप्तेः । यद्वा जलत्वात्यन्ताभावस्तेज-स्त्वात्यन्ताभावाधिकरणवृत्तिः अत्यन्ताभावत्वात् घटा-त्यन्ताभाववत् एवमत्यन्ताभावान्तरसामानाधिकरण्यमपि साध्यमिति क्वाप्रसिद्धिः । किञ्चेतरे तावत् प्रसिद्धाएव ते च भेदप्रतियोगिनो मेयत्वादितीतरभेदोऽपि ग्रह एव । ननु पृथिवी नेतरभेदवती गुरुत्वादिभ्यो जलवदिति चेन्न इतरभेदनिषेधो हीतराभेदः न च तेजःप्रभृत्यभेदोजल इति दृष्टान्तस्य साध्यवैकल्यात् चतुर्द्दशाभेदानां चैकत्र विरो-धेनासम्भवात् चतुर्द्दशभेदानां चैकत्र वृत्तौ न विरोधः । यत्तु साध्यप्रसिद्धौ पृथिवीतरभिन्ना तत्साध्याधिकरणपृथि-व्यन्यतरत्वात्तदधिकरणवत् पृथिव्यां तत् साध्यमन्वयिनएव सेत्स्यतीति तन्न अन्यतरत्वस्यालिङ्गत्वादित्युक्तत्वात् लिङ्गत्वे वा जलादावपि तत्सिद्धिप्रसङ्गात् एवं तर्हि पृथिवी जलं

पृथिवीत्वात् यन्न जलं तन्न पृथिवी यथा तेज इति सत्प्रति पक्षोऽस्त्विति चेत् न अजलस्य घटादेः प्रत्यक्षतएव पृथिवीत्वनिश्चये व्यतिरेकव्यभिचारादस्य न्यूनत्वात् तदनवधारणे तु सत्प्रतिपक्षत्वमिष्टमेव। ननु जीवच्छरीरं सात्मकं प्राणादिमत्त्वात् इच्छादिकार्य्यवत्त्वाद्वेति व्यतिरेकिणि साध्याप्रसिद्धौ कथं व्यतिरेकादिनिरूपणं नैरात्म्यञ्च घटस्य न प्रत्यक्षवेद्यं तत्र तत्रासामर्थ्यात् नानुमानगम्यं नैरात्म्याप्रतीतावन्वयिनोऽभावात् सात्मकत्वप्रतीतिं विना व्यतिरेकिणोऽनुपपत्तिः। अथेच्छा समवायिकारणजन्या कार्य्यत्वात् तच्च समवायिकारणं पृथिव्याद्यष्टद्रव्यभिन्नं पृथिव्यादित्वे बाधकसत्त्वादिति पृथिव्यादिभिन्नात्मसिद्धौ तद्वत्त्वं जीवच्छरीरे साध्यत इति चेत् यदि सात्मकत्वमात्मसंयोगवत्त्वन्तदा घटादौ तदस्तीति ततो हेतुव्यावृत्तावसाधारण्यं ज्ञानसमानाधिकरणज्ञानकारणीभूतसंयोगाश्रयकार्य्यत्वं सात्मकत्वं शरीरात्मसंयोगस्य ज्ञानकारणत्वात् आत्ममनसोस्तथात्वेऽप्यकार्य्यत्वादिति चेत् न शरीरादन्यत्रासिद्धेः तत्र प्रसिद्धौ सिद्धसाधनात् इच्छाया असमवायिकारणसंयोगावच्छेदकत्वस्याभावो घटादौ दृष्टः तद्व्यतिरेकः शरीरेसाध्यत इति चेन्न इच्छाया असमवायिकारणसंयोगावच्छेदकत्वस्य शरीरएव प्रसिद्धेः सिद्धसाधनात् अन्यथा असिद्धिव्यतिरेकाद्यनिरूपणात् अप्रसिद्धसाध्यसंसर्गमिव साध्यमप्रसिद्धं साधयति व्यतिरेकीति चेत् न व्यतिरेकाद्यनिरूपणात्

असाधारणधर्मेणाप्रतीतपदार्थानुमाने घटत्वादिनापि स्वेच्छाकल्पितभित्याद्यनुमानप्रसङ्ग इति । उच्यते इच्छाया असमवायिकारणसिद्धाविच्छात्वं संयोगासमवायिकारणकवृत्ति नित्येन्द्रियग्राह्यविशेषगुणवृत्तिगुणत्वसाक्षाद्व्याप्यजातित्वात् शब्दत्ववत् सचासमवायिकारणं संयोगः किञ्चिदवच्छिन्नः संयोगत्वात् आत्मसंयोगमात्रस्येच्छाजनकत्वेऽतिप्रसङ्गादितीच्छाऽसमवायिकारणसंयोगावच्छेदकत्वं सात्मकत्वं शरीरे साध्यते । यद्वा आत्मनीच्छाधारता आत्मसंयोगावच्छेद्या जन्यविभुविशेषगुणाधारतात्वात् वाय्वादिसंयोगाद्यवच्छेद्यशब्दाधारत्ववदिति सामान्यतः सिद्धमिच्छाधारताघटकेच्छासमवायिकारणद्रव्यसंयोगवत्त्वं सात्मकत्वम् अतएव ज्ञानसमानाधिकरणज्ञानकारणीभूतसंयोगाश्रयकार्य्यत्वं वा सात्मकत्वं स्वशरीरे प्राणादिमत्त्वस्य इच्छादिमत्त्वस्य च चेष्टावयवोपचयादिव्याप्यत्वग्रहात् घटादौ चेष्टादिविरहेण प्राणादिमत्त्वेच्छादिमत्त्वविरहानुमानमिच्छादिविरहात् इच्छादिप्रयोजकेच्छाद्याधारताघटकेच्छाद्यसमवायिकारणसंयोगविरहानुमानं कार्य्याभाववति कारणाभावनियमात् । न च सात्मकत्वं शरीरवृत्ति शरीरे बाधकाभावात् शरीरत्ववदित्यन्वयिनैव साध्यसिद्धेः किं व्यतिरेकिणेति वाच्यं शरीरं सात्मकमिति शरीरविशेष्यकबुद्धेर्व्यतिरेकिणं विनानुपपत्तेः उपायान्तरस्योपायान्तरादूषकत्वाच्च यद्वा चेष्टा संयोगासमवायिकारणिका संस्का-

राजन्यक्रियात्वादिति चेष्टाया असमवायिकारणसंयोग-सिद्धौ प्रयत्नवदात्मसंयोगएव पर्य्यवस्यति प्रयत्नान्वयव्यति-रेकानुविधायित्वात् एवं चेष्टाया असमवायिकारणसंयो-गाश्रयत्वे सति शरीरत्वं सात्मकत्वं जीवच्छरीरे साध्यं चेष्टावत्त्वादितिहेतुः चेष्टाविरहश्च घटादौ प्रत्यक्षसिद्धः चेष्टा विरहात्तदसमवायिकारणसंयोगविरहोऽपि सुग्रहः। यद्वा जीवच्छरीरं तदवयवो वा आत्मभिन्नत्वे सत्यात्मविशे-षगुणकारणभोगानधिकरणाहत्तिसंयोगवत् प्राणान्यत्वे सति ज्ञानकारणीभूतप्राणसंयोगवत्त्वात् यन्नैवं तन्नैवं यथा घटः आत्मप्राणसंयोगः प्राणमनःसंयोगो वा शरीरप्राण-संयोगेनैवान्यथासिद्धौ न कारणं भोगाधारवत्त्वं भोगसम-वायिकारणातिरिक्तहत्तिसकलभोगाधिकरणहत्तित्वात् प्र-मेयत्वादिवदिति तार्किकनीतिः। अथेच्छाष्टद्रव्यातिरिक्त-द्रव्याश्रिता अष्टद्रव्यानाश्रितत्वे सति गुणत्वात् यन्नैवं तन्नैवं यथा नाश्रितमष्टद्रव्याश्रितं वेति कथं व्यतिरेको अष्टद्रव्याति-रिक्तद्रव्यस्य तद्दृत्तित्वस्य चाप्रतीतेर्व्यतिरेकाद्यनिरूपणात्। स्यादेतत् इच्छाया द्रव्याश्रितत्वेऽनुमिते पृथिव्यादौ बाधान-वतारदशायां विप्रतिपत्तिवाक्यादाश्रितत्वादिसाधारणधर्म-दर्शनाद्वा तद्द्रव्यमष्टद्रव्यातिरिक्तं न वेति सन्देहेनाष्टद्रव्या-तिरिक्तद्रव्योपस्थितिः। यद्वा इच्छाया अष्टद्रव्यातिरिक्ता-श्रयोपस्थितौ पश्चादिच्छाश्रयोऽष्टद्रव्यातिरिक्तद्रव्यं न वेति संशयादष्टद्रव्यातिरिक्तद्रव्योपस्थितिः। अथ वा द्रव्या-

श्रिता इच्छा अष्टद्रव्यातिरिक्तद्रव्यवृत्तिर्नवेति पूर्ववत् संश-यादष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं प्रसिद्धमिच्छायाः साध्यते संशयप्रसिद्धमपि साध्यं व्यतिरेकादिनिरूपकं साध्यज्ञान-मात्रस्य कारणत्वात् नचैवं संशयादेव पक्षे साध्यसिद्धेर्व्य-तिरेकिवैयर्थ्यं निश्चयार्थं तत्प्रवृत्तेरिति मैवं संशयेन साध्य-प्रसिद्धावपि तद्व्यतिरेकनिश्चयासम्भवात् साध्यव्यतिरेक-तद्व्याप्तिनिश्चयस्य साध्यनिश्चयसाध्यत्वात् साध्यसन्देहे तद्व्य-तिरेकादिसंशयावश्यम्भावात् । किञ्च संशयोपस्थितसाध्यस्य व्यतिरेकिनिरूपणं न योग्यानुपलम्भात् साध्यनिश्चयं विना योग्यानुपलम्भासम्भवात् नापि व्यापकाभावात् साध्यनिश्चयं विना तद्व्यापकत्वनिश्चयाभावात् न च यदीच्छा अष्टद्रव्याति रिक्तद्रव्याश्रिता न स्यादष्टानाश्रिता सती द्रव्याश्रिता न स्यात् रूपवदिति साध्यविपर्ययकोटौ प्रतिकूलतर्कसहकृतः साध्यसंशयएव निश्चयकार्य्यं करोति अतएवैतादृशसंशयोप-स्थितकल्पितडित्थादिसाधनमप्यपास्तं तद्विपर्यये प्रतिकूल-तर्काभावादिति वाच्यं साध्यनिश्चयं विना साध्यव्यतिरेक-निश्चयतन्मूलतर्कानवतारात् अन्यथा अष्टद्रव्यातिरिक्तद्रव्य-वृत्तित्वनिरूपणे तर्कोदये च तत् सहकृतसाध्यसंशयस्य साध्यव्यतिरेकनिश्चायकत्वमिति । उच्यते । इच्छाश्रयद्रव्य-सिद्धौ पृथिव्यादाविच्छाधारता भवेत् द्रव्यं पृथिव्याद्यष्ट-भिन्नम् अष्टद्रव्यावृत्तिधर्म्मवत्त्वात् पृथिव्यादित्वे बाधक-सत्त्वाद्वेत्यष्टद्रव्यातिरिक्तद्रव्यसिद्धाविच्छायामष्टद्रव्यातिरि-

क्तद्रव्यवत्त्वमष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं वा साध्यते साध्यप्रसिद्धिर्द्रव्यत्वे इच्छाविशेष्यकाष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वप्रतीतेर्व्यतिरेकिसाध्यत्वात् तथापीच्छाष्टद्रव्यातिरिक्तद्रव्याश्रिता अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वात् अष्टद्रव्यातिरिक्तद्रव्यत्ववदिति साध्यप्रसिद्धेव दृष्टान्तप्रसिद्धेरन्वयीहेतुः स्यादिति चेन्न अन्वयव्याप्यप्रतिसन्धाने व्यतिरेकव्याप्तिप्रतिसन्धानदशायां व्यतिरेकिसम्भवात् न च द्रव्यत्वादेः सपक्षात् व्यावृत्तावसाधारण्यं तद्धि साध्यतदभावोभयसाधकत्वेन सत्प्रतिपक्षोत्थापकतया दोषावहं प्रकृते न च हेतोः साध्याभावसाधकत्वं विपक्षे बाधकाभावात् साध्यसाधकत्वे तत्सत्त्वाच्च अतएव यावदेकत्वानुकूलतर्को नावतरति तदैव दशाविशेषेऽसाधारण्यं दोष इत्युक्तं सुवर्णं तैजसत्वसाधकव्यतिरेकिणि शब्दोऽनित्यः शब्दत्वादित्यादावपि तथा। अथाष्टद्रव्याधारत्वबाधानन्तरमिच्छादौ गुणत्वादेवाष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वं सिद्ध्यति पक्षधर्म्मताबलात् प्रसिद्धविशेषबाधे सामान्यज्ञानस्य तदितरविशेषविषयत्वनियमात् अतएवासर्वविषयानित्यज्ञानबाधानन्तरं क्षित्यादौ कार्यत्वेन ज्ञानजन्यत्वं सिद्ध्यन् नित्यसर्वविषयत्वं ज्ञानस्यादायैव सिद्ध्यतीति चेन्न बाधानन्तरमष्टद्रव्यातिरिक्तद्रव्यविषयाप्यनुमितिर्द्रव्याश्रितत्वप्रकारिका स्यात् अनुमितेर्व्यापकतावच्छेदकमात्रप्रकारकत्वनियमात् नत्वष्टद्रव्यातिरिक्तद्रव्यवृत्तित्वप्रकारिका तस्य पूर्वमप्रतीतत्वेन प्रकार-

त्वसम्भवादिति तत्प्रकारिकानुमितिर्व्यतिरेकिणैव अनाद्यनन्तद्यणुकादियावत्पक्षीकरणेऽनाद्यनन्ततावदुपादानागोचरापरोक्षज्ञानत्वमेव नित्यसर्वविषयकत्वमेतदन्यमित्यसर्वविषयत्वं व्यतिरेकिणएव सिद्ध्यति पक्षधर्म्मताबलेनापि व्यापकतावच्छेदकप्रकारेण साध्यसिद्धिर्भवति नतु साध्यगत विशेषप्रकारिका अतिप्रसङ्गात्। नन्वष्टद्रव्यानाश्रितेच्छा द्रव्याश्रितेति यदि साध्यते तदाष्टद्रव्यातिरिक्तद्रव्याश्रितत्वमन्तरेण प्रतिज्ञार्थएव नोपपद्यते सत्यम् एवमप्यष्टद्रव्यानाश्रितेच्छायां द्रव्याश्रितत्वं सिद्ध्यतु तस्याष्टद्रव्यातिरेक्यं कुतः सिद्ध्येत् अथ सामान्यव्यभिचारमादाय मानान्तरोपनीतं तत्तदन्यत्वमुपजीव्याष्टद्रव्यान्यद्रव्यवृत्तितैवेच्छादेः परिच्छिद्यते ज्ञानान्तरोपस्थितविशेषणविशिष्टज्ञानस्य सुरभि चन्दनमित्यादौ दर्शनादिति चेत् न मानान्तरान्नियमेनानुपस्थितेः ये चेच्छाश्रये पृथिव्यादिभिन्नत्वं न जानन्ति इच्छायाश्च पृथिव्याद्यनाश्रितत्वं न जानन्ति तेषामप्यनुमानादित्यप्याहुः। अथ व्यतिरेकी नानुमानं सर्व्वत्र प्रमेयत्वादिना सत्प्रतिपक्षग्रस्तत्वादिति चेन्न विपक्षबाधकेन व्यतिरेकिणो बलवत्त्वात्। अन्ये तु व्यतिरेकिण्यभाव एव साध्यः सचाप्रसिद्धएव सिद्ध्यति यस्याभावस्य व्यापको हेत्वभावो गृहीतस्तस्याभावः पक्षे व्यापकाभावाभावरूपेण हेतुना सिद्ध्यति व्यापकाभाववत्तया ज्ञाते व्याप्याभावज्ञानावश्यम्भावात् तथा हि पृथिवी इतरेभ्यो भिद्यते पृथिवी-

त्वादित्यत्र इतरस्य जलादेर्व्यापकः पृथिवीत्वाभावो गृहीतइति पृथिवीत्वाभावाभावरूपेण पृथिवीत्वेन पृथिव्या-भितराभ्योऽन्याभावोऽप्रसिद्धएव सिद्धति प्रतियोगिज्ञानस्य दृष्टत्वात् प्रत्यक्षेण भूतले घटाभाववत् एवमन्यत्राप्याप्य-गृहीच्छायाः स्वाश्रयत्वे सिद्धे स्वाश्रये योऽत्यन्ताभावस्तद्-वच्छेदकं घटादि सर्वं तदवच्छेदेनेच्छानुपलम्भात् जीवच्छ-रीरन्तु न तथा तदवच्छेदेन तदाश्रये इच्छोपलम्भात् तथा चेच्छात्यन्ताभावाश्रयतावच्छेदकत्वरूपस्य नैरात्म्यस्य घटादौ प्राणादिमत्त्वाभावो व्यापको गृहीतइति जीवच्छरीरे प्राणादिमत्त्वेन इच्छात्यन्ताभावाश्रयत्वावच्छेदकत्वस्याभावः सात्मकत्वं साध्यते एवं प्रामाण्यसाधकव्यतिरेकिण्यपि व्यधि-करणप्रकारावच्छिन्नत्वस्य व्यापकः समर्थप्रवृत्तिजनकत्वा-भावोऽप्रमायां गृहीतोऽतो विवादाध्यासितानुभवे समर्थ-प्रवृत्तिजनकत्वेन व्यधिकरणप्रकारावच्छिन्नत्वस्याभावः सि-द्धति व्यधिकरणप्रकारानवच्छिन्नत्वमेव प्रमात्वम्। ननु साध्याप्रसिद्धौ कथं साध्यविशिष्टज्ञानं विशेषणज्ञानजन्यत्वा-द्विशिष्टज्ञानस्येति चेन्न पक्षे साध्यानुमितिसामग्रीसत्त्वा-त्तद्विशेषणकः साध्यविशेष्यकएव प्रत्ययो जायते भूतले घटोनास्तीत्यभावविशेष्यकप्रत्ययवत् तथापि साध्याभाव-व्यापकाभावाभावरूपहेतुमत्तया पक्षज्ञानं व्यतिरेकिणि गमकतौपयिकं न च साध्यप्रसिद्धिं विनैतादृशप्रतिसन्धानं सम्भवति नच वस्तुगत्या यः साध्याभावव्यापकाभावप्रति-

योगिभक्तया ज्ञानं जन्यतइति वाच्यं व्यतिरेक्याभासानुप-पत्तेरिति चेत् न योऽभावो यस्य भावस्य व्यापकत्वेन गृहीतः तदभावाभावेन तस्य व्याप्यस्याभावः पक्षे साध्यत-इत्यनुगतानतिप्रसक्तस्य गमकतौपयिकत्वात् अयञ्च व्यति-रेकिप्रकारः स्वार्थएव परं प्रति साध्याप्रसिद्धा प्रतिज्ञाद्य-सम्भवादिति सर्वं समञ्जसम् ।

व्यतिरेक्यनुमानसिद्धावर्थापत्तिर्न मानान्तरं तेनैव तदर्थसिद्धेः स्यादेतत् ज्योतिःशास्त्रात्कथितलिङ्गाद्वा देवदत्तस्य शतवर्षजीवित्वमवगतं चरमं शतवर्षजीवी गृह एवेति नियमे प्रत्यक्षेणावगते पश्चाद्योग्यानुपलब्धा निश्चि-तो गृहाभावो जीवननियमग्राहकप्रमाणयोर्बलाबलानिरू-पणाद्बहिःसत्त्वकल्पनं विना नियमद्वयविषयसंशयं जन-यित्वा जीवति न वेति संशयमापाद्य जीवनसंशयापत्तये जीवनोपपादकं बहिःसत्त्वं कल्पयतीति यथोक्तसामग्र्य-नन्तरं बहिरस्तीति प्रतीते तत्रान्वयव्यतिरेकाभ्यां संशय-द्वारा गृहाभावः तदुत्पादितनियमद्वयविषयकसंशयो वा करणं जीवनसंशयएववाकरणे सव्यापारकत्वानियमात् प्रमाणयोर्विरोधज्ञानं तदाहितसंशयद्वारा करणमिति कश्चित् । तदा जीवित्वस्य लिङ्गविशेषणस्य सन्दिग्धत्वेना-नुमानासम्भवादर्थापत्तिर्मानान्तरम् । ननु संशयस्य कल्पकत्वे स्थाणुपुरुषसंशयादपि तदेककोटिनिर्व्वाहकल्प-नापत्तिः न च प्रमितसंशयः कल्पनाङ्गं जीवनस्य तदानीं

प्रमितत्वे संशयाभावप्रसङ्गात् जीवित्वनिश्चयेऽनुमानादेव बहिःसत्त्वनिश्चयाच्च कदाचित् प्रमितत्वे च प्राक्प्रमितगृहत्वस्यान्तरा तत्संशये कल्पना स्यात् किञ्च जीवनसंशयस्य मृतेऽपि दृष्टत्वान्न व्यभिचारेण बहिःसत्त्वगमकमिति चेत् न यथोक्तसामग्रीप्रभवसंशयस्य कल्पनाङ्गत्वात् अतएव मृतजनिष्यमाणयार्गृहाभावनिश्चयो न यथोक्तसंशयमापादयतीति न बहिःसत्त्वकल्पकगृहाभावो योग्यानुपलब्धिनिश्चितो न संशय इति। अथ जीवननियमग्राहकप्रमाणयोर्यदि च तुल्यबलत्वमवगतं क्व तर्हि बहिःसत्त्वकल्पना विशेषदर्शनविरहात् कल्पने वा प्रमितजीवननिर्व्वाहकबहिः सत्त्ववद्गृहनियमनिर्व्वाहकमरणस्याप्युचितत्वेन तत् कल्पनापि स्यात् जीवनमरणयोः संशयाविशेषात् अथ तयोरेकं बलीयोऽपरमबलं तदेकेनापरस्य बाधएवेति न संशयः तस्माद्यत्र शतवर्षजीवित्वमवधारितं गृहाभावश्च निश्चितः तत्र बहिःसत्त्वकल्पनं न तु जीवनसंशये एवञ्च देवदत्तो बहिः सन् जीवित्वे सति गृहनिष्ठात्यन्ताभावप्रतियोगित्वादिति व्यतिरेकिणा बहिःसत्त्वज्ञानेनार्थापत्त्या लिङ्गविशेषण जीवित्वसंशये बहिःसत्त्वकल्पना च नास्त्येव किञ्च गृहाभावनिश्चयः प्रमाणद्वयविषयसंशयं जनयित्वा जीवनसंशयमापाद्य बहिःसत्त्वं कल्पयतीति न युक्तं न हि यतएव यत्संशयः सएव तन्निश्चयाय प्रभवति अतिप्रसङ्गात्। नैवम्। यथोक्तसामग्रीजनितसंशयवानेवं तर्क-

यति योग्यानुपलब्धिगृहीतो गृहाभाव इति तन्निश्चयः सुदृढ़ इति जीवननियमग्राहकयोरेकं बाध्यं विरुद्धयोरप्रमाणत्वात् तदिह मरणं कल्पयित्वा जीवनग्राहकं बाध्यतां नोवा वहिःसत्त्वं कल्पयित्वा गृहनियमग्राहकं तत्र वहिःसत्त्वकल्पने गृहनियमग्राहकमात्रबाधा मरणकल्पने तु शतवर्षजीवी देवदत्तः शतवर्षजीवी गृह एवेति नियमद्वयस्यापि बाधा स्यात् तदाह जीवनबाधे तन्नियमबाधस्यावश्यकत्वादिति। किञ्च अद्य जीवति श्वो जीविष्यतीत्यादि बहुतरक्षणलवमुहूर्त्तादिसमयोपाधिनियतं जीवनमुपलब्धमितितद्बाधे बहुतरव्याप्तिबाधः देवदत्ततदवयवगृहसत्त्वव्याप्तिशाल्या तथाभावरूपमरणापेक्षया वहिःसत्त्वस्य भावस्य लघुत्वं यदि च गृहान्योऽन्याभावाश्रयवहिःपदार्थवृत्तिसंयोगाश्रयत्वं वहिःसत्त्वमिति तदपेक्षया मरणमेव लघु तथापि मरणापेक्षया जीवनमात्रं लघ्विति तदेव कल्पयितुमर्हम्। ततोऽर्थापत्तिकल्पितं जीवित्वमुपजीव्यानुमानादपि वहिःसत्त्वज्ञानं भविष्यतीत्यतोव्यावर्त्तकसहकृतो यथोक्तसामग्रीप्रभवः संशयो वहिःसत्त्वं कल्पयति। न च वाच्यं तर्काणां विपर्य्ययापर्य्यवसायित्वं आभासत्वं तत्पर्य्यवसाने तदेवानुमानमेतत्तर्कसहायं वहिःसत्त्वमनुमापयिष्यतीति यतोलाघवगौरवतर्काणां विपर्ययापर्यवसायिनामेव प्रमाणसहकारित्वमतएव प्रत्यक्षशब्दादावपि सहकारी सः न च तस्यां दशायामेव प्रमाणान्तरमस्ति ततोऽर्थापत्ति-

सहकारित्वं तर्कस्य। ननु स्वकारणाधीनस्वभावविशेषात्त-र्कानुत्पादितयथोक्तसंशयस्य यदि वहिःसत्त्वप्रमापकत्वं तदा श्रुते ग्टहस्थिते वा तादृशसंशयाद्यत्र वहिःसत्त्वकल्पना सापि प्रमा स्यादिति चेन्न यथाहि प्रमापकस्येन्द्रियस्य दोषेण प्रमाशक्तितिरोधानादैन्द्रियकभ्रमः तथा यथोक्तसंशयस्यापि दोषेण प्रमाशक्तितिरोधानादग्रहरूपभ्रमसम्भवात् परोक्ष-ज्ञानानां जनकज्ञानाविभ्रमत्वे यथार्थत्वनियमइति चेत् सत्यं प्रकृतेऽपि जीवनग्टहाभावनियमग्राहकप्रमाणयोरन्य-तराभासत्वेनाभासत्वसम्भवात् यद्वा दोषाभावसहकृतस्य यथोक्तसंशयस्य वहिःसत्त्वप्रमापकत्वमिति। उच्यते। अनयो-रेकं बाध्यं विरुद्धार्थग्राहकत्वादिति सामान्यतो दृष्टादेव तर्कसहकृताद्ग्टहनियमग्राहकबाधे लिङ्गविशेषेण जीवित्व-निश्चयेऽनुमानाद्वहिःसत्त्वसिद्धिः तथाहि जीवनप्रमाणबाधे ग्टहनियमप्रमाणोत्थापितलिङ्गेन मरणानुमानात् प्रमाण-त्वाभिमतयोर्द्वयोरपि बाधा स्यात् ग्टहनियमग्राहकबाधे च निष्प्रतिपन्थिजीवनप्रमाणलिङ्गविशेषणजीवित्वनिश्चये वहिःसत्त्वानुमानादेकप्रमाणबाधा वेत्यादि तर्कसहकृतात् सामान्यतो दृष्टादेवानयोरेकं बाध्यमिति जायमानानु-मितिः परम्परामरणज्ञापकं विषयीकरोति ननु वहिःसत्त्व-परम्परासाधकं जीवनप्रमाणं तथा च सामान्यतोदृष्टा-देव ग्टहनियमग्राहकबाधे जीवनप्रमाणलिङ्गविशेषणजी-वित्वनिश्चयेऽनुमानादेव वहिःसत्त्वज्ञानमिति किमर्थो-

प्रथा। ननु वह्निःसत्त्वज्ञानं विना जीवीत्यहएवेत्यस्य अन्यथापि बाधितुमशक्यत्वात् प्रथमं वह्निःसत्त्वज्ञानं न तु व्याप्तिनियमग्राहकबाधानन्तरं तत् येन निष्परिपन्थिजीवनग्राहकाज्जीवित्वनिश्चयेऽनुमानं स्यात् न प्राथमिकवह्निःसत्त्वज्ञानमर्थापत्तिं विना न च व्याप्तिनियमग्राहिणि तुल्यबले जागरूके कथमर्थापत्त्यापि वह्निःसत्त्वज्ञानमिति वाच्यं तर्कसहकारादर्थापत्तेर्बलवत्त्वाद्वह्निःसत्त्वज्ञानमुत्पाद्य व्याप्तिनियमग्राहकमानबाधादिति चेन्न तर्कसहकारेण सामान्यतोदृष्टस्य बलवत्त्वेन व्याप्तिनियमग्राहकबाधसम्भवात् तस्माद्यथोक्तसंशयदशायां जीवनबाधे तन्नियमबाधस्यावश्यकत्वादिति तर्कानन्तरमेव वह्निःसत्त्वज्ञानमित्यविवादं तत्र कल्पनीयप्रमाणाभावे यथोक्तसंशये तर्कस्य न सहकारित्वं गौरवात् किन्तु नियमग्राहकबाधद्वारा वह्निःसत्त्वपरम्परासाधके सामान्यतोदृष्टे लाघवात् न च सामान्यतो दृष्टावतारएवात्र नास्तीति वाच्यम् अनिर्द्धारितैकबाधप्राप्तौ व्येकबाधानुकूलकल्पनायां विनिगमकत्वाभावा न चैकबाधप्राप्तिः सामान्यतोदृष्टं विना। किञ्च विरोधज्ञानानन्तरमेकमप्रमाणमिति यदि धीर्नास्ति तदा प्रामाण्यसंशयो न स्यात् न स्याच्च जीवनसंशयः द्वयोरपि जीवनमरणनिश्चायकत्वात्। अथैकमनयोरप्रमाणमिति ज्ञानं जनयित्वा सामान्यतोदृष्टस्य पर्य्यवसितत्वात्तज्जनितनियमद्वयसंशयाहितजीवनसंशयानन्तरं तर्कावतारे वह्निरस्तीति

ज्ञानं जायमानं संशयस्य कारणत्वं व्यवस्थापयतीति चेन्न यदेव हि विरुद्धाग्राहकत्वं तर्कविनाकृतमनिर्द्धारितैका-प्रामाण्यानुमितिमजीजनत्तदेव तर्कसहकृतं पुनरनुसन्धी-यमानं गृहनियमग्राहकप्रमाणमित्यनुमितिं बहिःसत्त्व-ज्ञानानुकूलां जनयति सहकारिवैचित्र्येणैकस्यापि विचित्र-फलजनकत्वात् न च जीवनसंशयानन्तरं तदनुसन्धान-मसिद्धं गृहनियमग्राहकस्य जीवनग्राहकविरुद्धार्थग्राहक-त्वानुसन्धानं विना बहिःसत्वकल्पनेऽप्यबाधप्रसङ्गात्। अथ यदि पर्य्यवसन्नमपि प्रमाणं पुनरनुसन्धीयमानं सहकारि-विशेषात् फलान्तरजनकं तदेच्छा द्रव्याश्रिता कार्यत्वा-दिति सामान्यतोदृष्टद्रव्याश्रितत्वानुमितौ पश्चादष्टद्रव्यवृत्ति-त्वबाधे व्यतिरेकिणात्मसिद्धिरिति भज्येत अष्टद्रव्यवृत्तित्व-बाधसहकृतात् सामान्यतोदृष्टादेव पुनरनुसन्धीयमानात् तत्सिद्धेरिति चेन्न अनुमितेर्व्यापकतावच्छेदकप्रकारकत्व-नियमेन तत्प्रकारकबुद्धेर्व्यतिरेकिसाध्यत्वात् व्यतिरेकिणो-ऽप्यन्यत्र सामर्थ्यावधारणेनोपायान्तरस्यादोषाच्च। अपि च देवदत्तो जीवनमरणान्यतरप्रतियोगी प्राणित्वान्मद्व-दिति सामान्यतोदृष्टं लाघवसहकारेण जीवनप्रतियोगित्वं विषयीकरोति तथा च लिङ्गविशेषणनिश्चयादनुमानादेव बहिःसत्त्वसिद्धिः। अथ लाघवसाचिव्यात् सामान्यतो दृष्टस्यापि विशेषविषयत्वात् नियमग्राहकप्रमाणोत्थापित-लिङ्गकमरणानुमानेन जीवनग्राहकस्येवास्यापि सत्प्रति-

पक्षत्वम् एकेनापि भूयसामपि प्रतिबन्धकसम्भवात् न च तर्कात्सामान्यतोदृष्टस्य बलवत्त्वं व्याप्तिपक्षधर्म्मते हि बलं तच्च तुल्यमेव ज्ञातं लाघवाख्यतर्कस्य विशेषमात्रपर्य्यवसायकत्वेन व्याप्तिग्राहकत्वस्य तुल्यत्वादिति चेत् तर्हि पक्षताबलाद्विशेषसिद्धिः क्वापि न स्यात् सर्व्वत्र सामान्यमुखप्रवृत्तप्रमाणस्य विशेषपर्य्यवसानेऽन्यसाधर्म्येण सत्प्रतिपक्षसम्भवात् अप्रयोजकत्वान्न विपरीतसाधनमिति तुल्यं नियमग्राहकस्याप्रयोजकत्वात् जीवनग्राहकस्य तु सामान्यतोदृष्टस्य ज्योतिःशास्त्राद्ययार्थत्वमेव विपक्षबाधकं व्याप्तिग्राहकमस्ति तस्मात् सामान्यमुखप्रवृत्तस्य सहकारिविशेषाद्विशेषपरस्यानुमानस्य तद्विशेषविलक्षणग्राहकप्रमाणेन सत्प्रतिपक्षत्वम् । न च प्रमाणविरोधेनास्य तर्को न सहकारीति वाच्यं तर्कानवतारे विशेषपरत्वाभावेनाविरोधात् तदवतारे तदधिकरणत्वादेव अन्यथा तर्कानवतारे सत्प्रतिपक्षस्य तदवतारेऽपि तत्त्वं न निवर्त्तते किञ्चैवमर्थापत्तावपि तद्विरोधेन न सहकारी स्यात् । यदुक्तं मरणकल्पने शतवर्षावच्छिन्नजीवी गृहएवेत्यस्यापि बाधइति तत्र विशिष्टबाधो न विशेष्यबाधात् मरणेऽपि जीवी गृहएवेत्यस्य विशेष्यस्याबाधात् किन्तु विशेषणबाधात् स च शतवर्षजीवित्वबाधएव विशेषणाभावायत्तो विशिष्टाभावोऽप्यस्तीति चेन्न विशेष्यवति विशिष्टाभावस्य केवलविशेषणाभावात्मकत्वात् विशिष्टस्यातिरिक्तस्यानभ्युपगमात् । अन्ये

तु शतवर्षजीवी देवदत्तो जीवी गृहएव नास्तीतिप्रमाणेषु द्वयोरविरोधेऽपि तृतीयमादाय विरोधज्ञानमस्ति तत्र जीवी गृहएवेत्यत्र प्रमाणघटितप्रमाणद्वयविरोधज्ञानजनिताप्रामाण्यसंशयाहितजीवनसंशयात् प्रमाणयोरविरोधापादकमप्रमाणविरोधि वह्निःसत्त्वं कल्प्यते यथोक्तसंशयस्यायमेव स्वभावो यद्वस्तुगत्या अप्रमाणं तद्विरोधि कल्पयति विरोधघटकस्य वस्तुगत्या अप्रमाणत्वमेव विनिगमकत्वमिति तन्तुच्छम् अप्रमाणस्यापि प्रमाणत्वेन ज्ञानात् तर्कादिभिर्विशेषदर्शनं विना यथोक्तसंशयानन्तरं बहिरस्तीति ज्ञानमसिद्धमतो न फलबलेन तथार्थापत्तिकल्पनम्। किञ्च मृते गृहस्थिते वह्निःस्थितैतादृशसंशयादेव वह्निःसत्त्वं गृहसत्त्वं मरणञ्च कल्प्येत कस्यचित् क्वचिद्वस्तुगत्या अप्रमाणत्वात् अर्थापत्त्याभासश्चैवं न स्यात्। स्यादेतत् माभूत् संशयः करणमर्थापत्तावनुपपत्तिस्तु स्यात् तथाहि जीवी देवदत्तो गृहे नास्तीति ज्ञाने सति वह्निःसत्त्वं विना जीवतोगृहासत्त्वमनुपपन्नमिति ज्ञानानन्तरं बहिरस्तीति धीरस्ति तत्रान्वयव्यतिरेकाभ्यामनुपपत्तिज्ञानं करणम्। न च देवदत्तो बहिरस्ति विद्यमानत्वे सति गृहासत्त्वात् घटवदित्यनुमानाद्विद्यमानत्वे सति यत्र यन्नास्ति तदन्यदेशे तदस्ति यथा गृहएव कोणेऽसन्नहं मध्ये तिष्ठामीतिव्याप्तिप्रभवानुमानाद्वा वह्निःसत्त्वसिद्धेः किमर्थापत्त्येति वाच्यं हेतुसाध्ययोः सहचाराज्ञानदशायामनु-

पपत्तिज्ञानेऽपि वह्निःसत्त्वज्ञानात् सामान्यतो व्याप्तिज्ञानु-
माने उपसंहर्त्तुमशक्योति तदन्यदेशसिद्धिरर्थापत्त्यैव । ननु
जीविनो गृहासत्त्वमनुपपन्नं किं देवदत्त वह्निःसत्त्वं विना
उत वह्निःसत्त्वमात्रं विना नाद्यः प्रथमं देवदत्तवह्निःसत्त्वा-
प्रतीतौ तेन विनेदमनुपपन्नमिति ज्ञानाभावात् प्रतीतौ
वा किमर्थापत्त्या अर्थापत्तितएव तत्प्रतीतावन्योऽन्याश्रयः
तदुक्तं तत्त्वं तत्सिद्धेरग्रे तदसिद्धेरिति । नान्यः अन्य-
दीयवह्निःसत्त्वज्ञानं विनानुपपत्त्यभावात् वह्निःसत्त्वमात्र-
सिद्धावपि देवदत्तवह्निःसत्त्वासिद्धेरिति चेन्न सामान्येन
हि विनानुपपत्तिज्ञानं कारणं सामान्याकारेणाशेषज्ञानं
फलं तथाहि जीवतो वह्निःसत्त्वं विना गृहासत्त्वमनुपपन्न-
मिति ज्ञानं यस्य गृहासत्त्वमनुपपन्नं तत्र वह्निःसत्त्वं कल्प-
यति नान्यत्र देवदत्तश्च तथेति सिद्धे देवदत्ते वह्निःसत्त्वं
कल्प्यतइति देवदत्तवह्निःसत्वं पर्य्यवस्यति न तु तेन रूपेण
कल्पना न वा तेन विनानुपपत्तिज्ञानं कारणं यथा वह्नि-
मात्रव्याप्ताद्धूमात् पर्व्वते वह्निसिद्धिरेव पर्व्वतीयवह्निसि-
द्धिर्न तु पर्व्वतीयत्वेनैव धूमात्तत्सिद्धिः तेन रूपेण व्यापक-
त्वाग्रहात् । अथोपपादकाभाववत्युपपाद्याभावनियमोऽनुप-
पत्तिर्न्नत्वभावमात्रमतिप्रसङ्गात् एवञ्च व्यतिरेकव्याप्तिमत
उपपाद्याद्व्यतिरेक्यनुमानमुद्रयैव साध्यसिद्धेः किमर्थापत्त्या
तथाहि देवदत्तो वह्निः सन् जीवित्व सति गृहासत्त्वात्
यन्नैवं तन्नैवं यथा हतो गृहस्थितो वा न चान्यव्याप्यान्वस्य

गमकत्वेऽतिप्रसङ्गः साध्याभावव्यापकाभावप्रतियोगित्वस्य नियामकत्वात् न चार्थापत्तौ स्वरूपसती व्याप्तिर्लिङ्गं नानुमानमिति वाच्यम् अनुपपत्तेर्ज्ञानं विना कल्पनानुदयात् अर्थापत्त्याभासानवकाशाच्च। मैवम् अत्र हि व्यतिरेकव्याप्तिरन्वयस्य पक्षधर्म्मत्वमिति व्याप्तिबीजन्यमपि वह्निःसत्त्वज्ञानं नानुमितिः तस्या व्याप्तपक्षधर्म्मताज्ञानजन्यतानियमात्। न च साध्याभावव्यापकाभावप्रतियोगित्वेन पक्षधर्म्मस्य ज्ञानमनुमितिप्रयोजकमिहाप्यस्तीति वाच्यं केवलान्वयिनि तदसम्भवात् तदपेक्षया साध्यव्याप्यत्वज्ञानस्य लघुत्वाच्च। अथ व्यतिरेकसहचाराद्धेतोरेव व्याप्तिर्गृह्यते एवञ्चान्वयस्य व्यतिरेकस्य उभयस्य वा सहचाराद्व्याप्तिग्रहत्रैविध्येऽनुमानत्रैविध्यम् अतएव धूमो दशाविशेषेऽन्वयी व्यतिरेकी अन्वयव्यतिरेकी चेति अस्तु तावदेवं तथापि जीविदेवदत्ताभावो गृहे वर्त्तमानो न वह्निःसत्वे अङ्गं देवदत्तावृत्तित्वात् वह्निःसत्वगृहनिष्ठाभावयोर्व्यधिकरणत्वेन नियतसामानाधिकरण्यरूपव्याप्त्यभावाच्च। उपरि सविता भूमेरालोकवत्त्वादित्यत्र भूमेरुपरि सन्निहितसवितृकत्वेनानुमानात् नापि गृहनिष्ठाभावप्रतियोगित्वं तत्प्रतियोगित्वस्य देवदत्तधर्म्मतया तदसन्निकर्षे प्रत्यक्षेण ज्ञातुमशक्यत्वात् अतएव विशेष्यासन्निकर्षात्तृतीयलिङ्गपरामर्शोऽपि न प्रत्यक्षेण। न च व्यतिरेकव्याप्तिग्रहनिष्ठाभावयोर्ज्ञानं सहकार्य्यासाद्य मनसैव सजन्यत इति वाच्यं सह-

कारिण एव मानान्तरत्वप्रसङ्गात्। अथ व्याप्तिज्ञानानन्तरं स्मर्यमाणधूमात् कथमनुमितिः उक्तन्यायेन तत्रापि लिङ्गपरामर्शाभावादिति चेत् न कथञ्चित् 'कथं तर्हि वह्निज्ञानं' पक्षधर्मधूमस्मृतिसहितात् धूमो वह्निं विना नास्तीत्यनुपपत्तिज्ञानादिति गृहाण अतएव दृश्यमानोधूमो वह्निं विनानुपपन्नइति यदा ज्ञायते तदार्थापत्तिरेव यदा त्वनुपपत्तिज्ञानं विना व्याप्यत्वेन प्रतिसन्धीयते तदानुमानं त्वयापि त्रिविधानुमानस्वीकारात् तस्माद्व्यतिरेकव्याप्तिमुपजीव्य जीविदेवदत्तगृहाभावो वहिःसत्वं कल्पयति। उच्यते। देवदत्तासन्निकर्षेऽपि तस्य गृहनिष्ठाभावप्रतियोगित्वं प्रत्यक्षेण गृह्यते तथाहि गृहे देवदत्तस्याभावइति प्रत्यक्षं देवदत्तं षष्ठ्यर्थस्याभावसम्बन्धं प्रतियोगित्वलक्षणं गोचरयति सम्बन्धज्ञानस्य सम्बन्धिद्वयविषयत्वात् प्रतियोगिना सममभावस्य सम्बन्धान्तराभावात् गृहनिष्ठाभावप्रतियोगित्वे च प्रत्यक्षोपस्थिते स्मृतव्याप्तिवैशिष्टामपि प्रत्यक्षेण सुग्रहम्। न च देवदत्तविशेष्यकं वहिःसत्वव्याप्यगृहनिष्ठाभावप्रतियोगित्वज्ञानं नास्तीति वाच्यं पक्षवृत्तिलिङ्गपरामर्शमात्रस्यानुमितिजनकत्वात् अधिकस्य गौरवपराहतत्वात्। अथ वा अनतिप्रसक्तसहकारिवशान्मनसैव स्मृतदेवदत्तविशेष्यकस्तृतीयलिङ्गपरामर्शः यथा च न सहकारि मानान्तरं तथोपपादितमधस्तात्। ननु मयूरः पर्व्वतेतरे न नृत्यति नृत्यति चेतिज्ञानानन्तरं

पर्व्वते नृत्यतीति ज्ञानमस्ति न च व्यतिरेकिणस्तत्सम्भवति पर्व्वतनृत्यस्य साध्यस्याप्रतीतौ व्यतिरेकव्याप्यनिरूपणात् न च पर्व्वतनृत्याप्रसिद्धौ तेन विनानुपपत्तिप्रतिसन्धानमपि नेति कथमर्थापत्तिरपीति वाच्यम् अधिकरणं विनानुपपद्यमानं नृत्यं प्रसिद्धाधिकरणबाधसहकृतं प्रसिद्धेतरमधिकरणं कल्पयतीति चेन्न मयूरनृत्यं साधिकरणं नृत्यत्वादिति सामान्यतोदृष्टं प्रसिद्धाधिकरणबाधसहकृतं प्रसिद्धेतरं पर्व्वतमधिकरणमादायानृत्यज्ञानं जनयति। यद्वा पर्व्वतेतरे न नृत्यतीतिशब्देन नृत्याभावबोधानन्तरं मयूरो नृत्यतीतिशब्दाज्जायमानं ज्ञानं पर्व्वतनृत्यं गोचरयति प्रसिद्धविशेषबाधसहकृतसामान्यज्ञानजनकप्रमाणस्य प्रसिद्धेतरं पर्व्वतमधिकरणविशेषमादाय ज्ञानजनकत्वनियमात्। अतएवानित्यज्ञानबाधानन्तरं चित्यादौ ज्ञानजन्यत्वं सिद्धनित्यत्वमादाय सिद्ध्यतीत्याचार्य्याः। यद्वा मयूरनृत्यं पर्व्वताधिकरणकं पर्व्वतेतरानधिकरणत्वे सति साधिकरणत्वात् पर्व्वतत्ववदित्यन्वयव्यतिरेकी अथवा यः सम्भाविततत्तदितरावृत्तिः सन् तदतिरिक्तावृत्तिर्न भवति न तद्वृत्तिर्भवतीति सामान्येन यत्तदर्थान्तर्भावेन व्याप्त्या नृत्यस्य पर्व्वतवृत्तित्वं सिद्ध्यति। एवं पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्रापि अप्रसिद्धरात्रिभोजनसाध्यपीनत्वज्ञानं रात्रिभोजनमादाय सिद्ध्यति। अथ यथा अभोजी पीनइत्यत्रायोग्यताज्ञानं तथा पीनो दिवा न भुङ्क्तइत्यत्रापि दिवाभोज-

नस्य बाधाद्योग्यताघटकरात्रिभोजनस्याप्रतीतेः अतो योग्यताघटकोपस्थितिं विना अन्वयमलभमानमिदं वाक्यं योग्यताघटकरात्रिभोजनोपपादकं रात्रौ भुङ्क्ते इति वाक्यं कल्पयित्वा तेन सहान्वयबोधं जनयति। न चैवं लाघवाद्रात्रिभोजनमेव कल्पयितुं युक्तं शाब्दी ह्याकाङ्क्षा शब्देनैव प्रपूर्य्यत इतिन्यायेन शब्दोपस्थापितमादाय शब्दस्यान्वयबोधजनकत्वात् एवञ्च श्रूयमाणशब्दस्यान्वयबोधकत्वं योग्यताघटकोपस्थापकेन शब्देन विनानुपपद्यमानं तं कल्पयित्वा यत्रान्वयबोधं जनयति तत् श्रुतार्थापत्तिः। द्वारमित्यादौ पिधेहीतिशब्दकल्पनं श्रुतार्थापत्तिरेव शब्दस्य यद्यपि श्रूयमाणोबाधितस्तथाप्यभिप्रायस्थः कल्प्यते यथा गुरुमते स्वर्गकामो यजेतेत्यत्र साक्षात्साधनताबाधे परम्पराघटकस्यानुपस्थित्या परम्परासाधनताज्ञानविरहोयोग्यताज्ञानभावात् प्रसिद्धपदसामानाधिकरण्यानुपपत्तिरिति योग्यताज्ञानाय परम्परासाधनताघटकमपूर्व्वं लिङादिवाच्यं कल्पयति ततः स्वर्गसाधनं यागइति ज्ञानं जायते अन्यथा अपूर्व्वमपि वाच्यं न स्यादिति। उच्यते। बाधकप्रमाणाभावोऽन्वयविरोधिरूपविरहो वा योग्यता अतो दिवा अभोजने रात्रिभोजनाप्रतीतावपि भोजनसाध्यपीनत्वाद्दिवा न भुङ्क्तइति शब्दाद्बोधस्योत्पद्यते न प्रतीत्यनुपपत्तिः किन्तु प्रतीतानुपपत्त्या रात्रिभोजनं कल्प्यते अतएवापूर्व्वमपि न वाच्यमिति वक्ष्यते तस्मादर्थापत्तिरनुमानादतिरिच्यतइति।

तच्चानुमानं परार्थं न्यायसाध्यमिति न्यायस्तदवयवाश्च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि निरूप्यन्ते। तत्र न समस्तरूपोपपन्नलिङ्गप्रतिपादकवाक्यं न्यायः अत्रैव वाक्येऽतिव्याप्तेः किन्त्वनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशब्दज्ञानजनकवाक्यं न्यायः प्रतिज्ञादिपञ्चवाक्यैरेकवाक्यतया स्वार्थविशिष्टज्ञानं जन्यते तेन च विशिष्टवैशिष्ट्यावगाहिमानान्तरमुत्पाद्यते तेन च चरमपरामर्श उत्पाद्यत इति न्यायजन्यशाब्दज्ञानस्य परामर्शप्रयोजकता अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यत्वमवयवत्वम् अतएव वह्निव्याप्यधूमवानयमितिवाक्ये तदवयवे च न न्यायतदवयवलक्षणातिव्याप्तिः तेन परामर्शस्य, तदवयवेन परामर्शजनकस्य जननात्। यत्तु संक्षेपतः परामर्शप्रयोजकवाक्यत्वेन विशेषाभावात् सोऽपि न्यायएवेति तन्न कथायामाकाङ्क्षाक्रमेणाभिधानमिति प्रथमं विशिष्टवैशिष्ट्यआकाङ्क्षा नास्तीति तदभिधाने निग्रहादिति वक्ष्यते अन्यथा चक्षुरादेरपि परामर्शजनकतया न्यायत्वापत्तिः आकाङ्क्षाविरहस्तुल्यएव। अन्ये तु पञ्चावयववाक्याद्विजातीयमेव शाब्दज्ञानमुत्पद्यतइति तद्धीजनकवाक्यत्वं न्यायत्वम् एवं प्रतिज्ञाद्यवयवादपि प्रत्येकं विजातीयं शाब्दज्ञानमिति तत्तद्धीजनकशब्दत्वमेव तल्लक्षणमिति तन्न ज्ञानविशेषजनकत्वं तत्तज्ज्ञानजनकत्वं वा न्याये प्रतिज्ञादौ चानतिप्रसक्तमनुगतरूपमन्तरेण दुर्निरू-

पमिति तत्स्वीकारे तस्यैव लक्षणत्वात् अन्यथा जातिसङ्करप्रसङ्गः। तत्र प्रतिज्ञा न साध्यनिर्देशः साध्यपदेऽतिव्याप्तेः किन्तूद्देश्यानुमितिहेतुलिङ्गपरामर्शप्रयोजकवाक्यार्थज्ञानजनकत्वे सत्युद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं वाक्यम् अन्यूनानतिरिक्तपदं विहाय लिङ्गाविषयकत्वं वा ज्ञानविशेषणं तेनोदाहरणादिव्युदासः निगमनस्य न परामर्शहेतुः अबाधितासत्प्रतिपक्षत्वज्ञानजनकत्वात् हेत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वं वा लिङ्गाविषयकलिङ्गिविषयकज्ञानजनकन्यायावयववाक्यत्वं वा इतरावयवानां लिङ्गविषयकज्ञानजनकत्वात् । प्रतिज्ञात्वं जातिः अनुगतानतिप्रसक्तान्विकव्यवहारादिति केचित् तन्न देवदत्तप्रभवत्वादिना जातिसङ्करप्रसङ्गात् प्रतिज्ञाजन्यं विजातीयं ज्ञानं व्यवहारादिति तज्जनकं वाक्यं प्रतिज्ञेत्यपि न, तज्जनकत्वं जनकत्वज्ञानं वा नानुगतरूपमन्तरेण सम्भवतीत्युक्तस्यानुसरणीयत्वात् एतेन शब्दोऽनित्यइति लिङ्गिधीपरवाक्यजन्यज्ञानवृत्तिकृतकत्वादित्यादिवाक्यजन्यज्ञानावृत्तिजातियोगिज्ञानजनकवाक्यं प्रतिज्ञेति निरस्तम् । ननु प्रतिज्ञा न साधनाङ्गं विप्रतिपत्तेः पक्षपरिग्रहे तत्र प्रमाणाकाङ्क्षायां हेत्वभिधानस्य प्राथम्यादिति चेन्न विप्रतिपत्त्यग्रे समयबन्धानन्तरं शब्दानित्यत्वं साधयेति मध्यस्थस्य वादिनोवाकाङ्क्षायां शब्दानित्यत्वं साध्यं नच साध्यनिर्देशं विना हेतुवाक्यं त्रिप्रतियोगिकमन्वयं

बोधयितुमीष्टे। नच वादिवाक्येऽनुपस्थितमपि योग्यतया अन्वेति अतिप्रसङ्गात्। नच विप्रतिपत्तितः साध्योपस्थितिः तस्याः प्रतिवादिविप्रतिपत्त्या प्रमाणादिव्यवस्थया चान्तरितत्वात् परविप्रतिपत्तिं समयबन्धञ्च विना स्थापनाया अभावात् विप्रतिपत्तिवाक्यस्य पक्षग्रहेण पर्यवसिततया निराकाङ्क्षत्वाच्च आवृत्तौ तु सैव प्रतिज्ञा। न चावयवान्तरात्तेष्वन्वययोग्या साध्योपस्थितिः। नाप्यवयवान्तरेणाक्षेपात् साध्यान्वये तदभिधानं तदभिधाने च साध्यान्वय इत्यन्योन्याश्रयात्। तस्मात् प्रतीत्यनुपपत्त्या प्रतीतानुपपत्त्या वा नेत्थाक्षेपः। अन्ये तु शब्दानित्यत्वे प्रमाणं वदेति यदि मध्यस्थस्यानुयोगः तथापि प्रमाणमात्रे नाकाङ्क्षा किन्तु विशिष्टे विशिष्टन्तु विशेषणं साध्यमनभिधाय न शक्याभिधानं न च वस्तुतो यत्साध्यं तत्र प्रमाणं वदेति मध्यस्थनियोगः वादिद्वयमध्ये तदसम्भवात् तस्मात्साध्याभिधानं विना न हेतोराकाङ्क्षा नवान्वयबोधकत्वमिति प्रतिज्ञा साधनाङ्गमिति। साध्यनिर्देशानन्तरं कुतइत्याकाङ्क्षायां साधनताव्यञ्जकविभक्तिमल्लिङ्गवचनमेवोचितं अन्यथा नाकाङ्क्षाभिधाने निग्रहापत्तेः लोके तथैवाकाङ्क्षानिवृत्तिरिति व्युत्पत्तेरिति प्रतिज्ञानन्तरं हेतूपन्यासः हेतुत्वञ्चानुमितिकारणीभूतलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकसाध्याविषयकशाब्दधीजनकहेतुविभक्तिमच्छब्दत्वं हेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वं वा उदाहरणप्रयो-

जकाकाङ्क्षाजनकशाब्दज्ञानजनकन्यायावयवत्वं वा साध्या-विषयकज्ञानजनकहेतुपञ्चम्यन्तानुमितिपरशब्दत्वं वा प्रति-ज्ञावाक्यधीजन्यकारणाकाङ्क्षानिवर्त्तकज्ञानजनकहेतुविभ-क्तिमद्वाक्यत्वं वा पञ्चम्यन्तलाक्षणिकपदवदनुमितिपर-वाक्यत्वं वा हेतुपदेन ज्ञानलक्षणात् अन्यथा लिङ्गस्या-हेतुत्वेन हेतुविभक्त्यर्थानन्वयात् तथैवाकाङ्क्षानिवृत्तेः अनु-मितिहेतुज्ञानकारणधूमवत्त्वादितिशब्दजन्यज्ञानवृत्तिप्रति-ज्ञादिजन्यज्ञानावृत्तिजातियोगिज्ञानजनकवाक्यत्वं हेतुत्व-मित्यन्ये जातिं विना केन रूपेण ज्ञानस्यानुमितिजनकत्वं वाक्यविशेषजन्यत्वस्यापि जन्यतावच्छेदकरूपापरिचये दुर्ग्र-हादित्यपरे। अन्वयव्याप्त्यभिधायकावयवाभिधानप्रयोज-कज्ञानजनकहेतुत्वप्रतिपादकविभक्तिमन्न्यायावयवत्वमन्वयि हेतुत्वं एतदेव व्यतिरेकव्याप्त्यभिधायकपदप्रक्षेपाद्व्यति-रेकि हेतुत्वम् अन्वयव्यतिरेकोदाहरणाकाङ्क्षाप्रयोजक-तथाभूतावयवत्वमन्वयव्यतिरेकि हेतुत्वं यद्वा पक्षसपक्षसतो विपक्षासतो हेतुवचनमन्वयव्यतिरेकि अत्यन्ताभावाप्रति-योगिसाध्यसमानाधिकरणपक्षसपक्षसद्धेतुवचनं केवला-न्वयि यद्वा अनुमितिकारणीभूतपरामर्शप्रयोजकशाब्द-ज्ञानकारणसाध्याविषयकशाब्दधीजनकप्रतीतान्वयसाध्यसा-धनवाचकहेतुविभक्तिमच्छब्दत्वमन्वयिहेतुत्वम् एतदेवा-प्रतीतान्वयसाध्यसाधनेतिविशेषणाद्व्यतिरेकिहेतुलक्षणं क-थायां धूमादित्येव प्रयोक्तव्यं नतु धूमवत्त्वादिति मतुपोऽर्थ

त्वात्। केचित्तु सामान्यवत्त्वे सति वाह्येन्द्रियग्राह्यत्वा-दित्यपार्थकं विभक्त्युपस्थापितहेतुत्वेन सामान्यवत्त्वस्य विभ-क्त्यन्तरावच्छेदकस्यानन्वयादिति केचित् तन्न सतिसप्तमीबलात् सामान्यवत्त्वस्य वाह्येन्द्रियग्राह्यत्वस्य च सामानाधिकर-ण्योपस्थितौ विशिष्टे हेतुत्वान्वयात् तथैव व्युत्पत्तेः नत्वय-मर्थोऽस्मात्रावगम्यते।

हेतावुक्ते कथमस्य गमकत्वमित्याकाङ्क्षाया व्याप्तिपक्ष-धर्मतयोः प्रदर्शनप्राप्तौ व्याप्तेः प्राथम्यात् तत्प्रदर्शनायो-दाहरणं तत्रानुमितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञान-जनकव्याप्यत्वाभिमतवन्निष्ठ नियतव्यापकत्वाभिमतसम्बन्ध-बोधजनकशब्दत्वमुदाहरणत्वं सामान्यलक्षणे साध्यसाधन-सम्बन्धबोधकत्वं साध्यसाधनाभावसम्बन्धबोधकत्वञ्च विशेष-लक्षणद्वयम्। न्यायावयवदृष्टान्तवचनमुदाहरणमिति तु न दृष्टान्तप्रयोगस्य सामयिकत्वेनासार्व्वत्रिकत्वात् योयो-धूमवान् सोऽग्निमानित्येव व्याप्तिप्रतीतेः नापि प्रकृतानु-मितिहेतुलिङ्गपरामर्शपरवाक्यजन्यज्ञानविषयव्याप्युपना-यकं वचनं तत्, उपनयातिव्याप्तेः अत उपनयाभिधान-प्रयोजकजिज्ञासाजनकवाक्यमुदाहरणम् एतदेवान्वयव्यति-रेकिव्याप्तिविषयत्वविशेषितं विशेषलक्षणद्वयमित्यन्ये अत्र च व्यभिचारवारणाय वीप्सामाहुः यत्र च सामानाधि-करण्यादेव व्याप्तिस्तत्र न वीप्सा केवलान्वयिव्यभेदानुमाने च वीप्सायामपि व्यभिचारतादवस्थ्यमिति तु अयं, वीप्सा च

यत्पदे, न तत्पदेऽपि विरुद्धरूपोपस्थितयोरपि तत्पदेन परामर्शादुद्बुद्धिस्थवाचकत्वादिति न व्युत्पत्तिविरोधः यथा यद्वत् पापं प्रतिजह्नीत्यत, इदञ्च साध्यसाधनोभयाश्रयाविकलानुपदर्शितान्वयं विपरीतोपदर्शितान्वयानुपदर्शितव्यतिरेकविपरीतोपदर्शितव्यतिरेकभेदादाभासरूपमिति ।

उदाहरणानन्तरम्भवतु व्याप्तिस्तथापि व्याप्तं किं पक्ष वर्त्तते न वेत्याकाङ्क्षायां व्याप्तस्य पक्षधर्मत्वप्रदर्शनायोपनयः, तत्रानुमितिकारणतृतीयलिङ्गपरामर्शजनकावयवत्वमुपनयत्वमिति सामान्यलक्षणं साध्यव्याप्यविशिष्टपक्षबोधकावयवत्वं साध्याभावव्यापकाभावप्रतियोगिमत्पक्षबोधकावयवत्वञ्च विशेषलक्षणद्वयम् उदाहरणान्तएव प्रयोग इति न वाच्यं तृतीयलिङ्गपरामर्शस्य व्याप्तपक्षधर्मतावगाहिनोऽवयवान्तरादलाभात् तदनभ्युपगमेऽपि पक्षधर्मताया अलाभात्, न च हेतुवचनादेव तदवगमः तस्य को हेतुरित्याकाङ्क्षायां प्रवृत्तत्वेन हेतुस्वरूपोपस्थापकस्यातत्परत्वात् वादिवाक्यादेवाक्षेपइति चेन्न तदर्थस्यासिद्धत्वेनानाक्षेपकत्वात् अन्यथा प्रतिज्ञामात्रादेव सर्व्वाक्षेपेऽवयवान्तरविलयात् । प्रतिपाद्यानां स्वतएव तदवगमइति चेन्न तेषां व्युत्पन्नाव्युत्पन्नतया सर्वत्र तदसम्भवात् प्रतिपादकेन स्वव्यापारस्य निर्वाहयितुमुचितत्वाच्च अन्यथावयवान्तरेऽप्येवं प्रसङ्गात् ।

उपनयानन्तरं निगमनं तच्चानुमितिहेतुलिङ्गपराम-

शप्रयोजकशाब्दज्ञानकारणव्याप्तिपक्षताधीप्रयुक्तसाध्यधीज-नकं वाक्यम्। न च व्याप्तिपक्षधर्मतायाश्चतुर्भिरेवावयवैः पर्य्याप्तेः किं तेनेति वाच्यम् अबाधितासत्प्रतिपक्षत्वयोर-लाभे चतुर्णामप्यपर्य्यवसानात्। अथाभिधानाभिधेययो-र्व्याप्तिपक्षधर्मतावल्लिङ्गप्रतिपादनादेव पर्य्यवसानेनावयवा-न्तराणां निराकाङ्क्षत्वं विपरीतशङ्कानिवृत्तेरपि ततएव लाभात्, अन्यथा निगमनेनापि तदवारणात् न हि तद्वि-शेषदर्शनमनाहृत्यैव तन्निवर्त्तकम्। सिद्धनिर्द्देशतया वार-यतीति चेन्न स्वरूपमात्राभिधानात् साध्यत्वानुपस्थितौ तस्मादिति हेतुविभक्त्यनन्वयप्रसङ्गाच्चेति चेन्न व्याप्तिपक्ष-धर्मताज्ञानेऽपि बाधसत्प्रतिपक्षबुद्धेः साध्यज्ञानानुत्पत्तिद-र्शनात् तदभावाबोधने समीहितानिर्व्वाहात्। अथ बाधादिविरहस्य प्रयोजकत्वं न तु तद्बोधस्य, मानाभावाद-सिद्धेश्च इति किमर्थं बाधादिविरहो बोधनीय इति चेन्न यदवगमे सति यन्न भवति तत्तदभावज्ञानसाध्यमिति व्याप्तेः न चानन्वयः, तस्मादित्यन्वयबलादेव हेत्वनाकाङ्क्षि-तत्वलक्षणसिद्धत्वज्ञानात् न त्वन्वयात् पूर्व्वम्। इह केचित् यथा तस्मादिति सर्व्वनाम्ना हेतोः परामर्शः पूर्व्वोक्ताशेष-रूपलाभाय तथा साध्यांशस्यापि तथा इति सर्वनाम्ना सिद्धस्यलाइव विरोधादिवारणाय युक्तइत्याहुः तन्न तथेति स्वरूपे, प्रकारे, सादृश्ये, वा आद्ये तथाचायमिति प्रक्रा-न्तात् तथेति हेतुमानित्यर्थः स्यात् तथाचानन्वयः न हि

हेतुमत्त्वादेव हेतुमत्त्वमित्यन्वितं न द्वितीयः सामान्येन पक्षस्यापि अन्वयव्याप्तौ प्रवेशात् तत्प्रकारान्वयस्तत्रैवेत्यनन्वयात् अतएव न तृतीयोऽपि अभेदानुमाने चान्वयिनि तस्मात्तयेति साहश्याभावात् बहूनाञ्च प्रक्रमे विशेष्यानन्वयात् वादिवाक्ये च योग्यतान्वयेऽतिप्रसङ्गात् तस्मादित्यत्र विभक्त्यर्थानन्वयादेव नियमः तस्मादनित्य इत्यभिधाने विशिष्यसिद्धतावगम्यते पूर्व्वं साध्यतयोक्तस्य समर्थहेतुसम्बन्धेन पुनरुत्कीर्त्तनात्, अन्यथा तद्वैयर्थ्यात् । संशयप्रयोजनादयस्त्ववयवलक्षणाभावादेव नावयवाः किन्तु न्यायाङ्गतयोपयुज्यन्त इति नाधिक्यं कण्टकोद्धारस्य च न सार्वत्रिकत्वं समयविशेषोपयोगित्वादिति ।

अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते ।

तत्रानुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वं यद्विषयत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वं ज्ञायमानं सदनुमितिप्रतिबन्धकं यत् तत्त्वं वा हेत्वाभासत्वं दशाविशेषे हेतोरेवासाधारणसत्प्रतिपक्षयोराभासत्वात् तद्बुद्धेरप्यनुमितिप्रतिबन्धकत्वम् । यद्यपि बाधसत्प्रतिपक्षयोः प्रत्यक्षशाब्दज्ञानप्रतिबन्धकत्वान्न लिङ्गाभासत्वं तथापि ज्ञायमानस्याभासस्यात्र लक्षणं यद्वा प्रत्यक्षादौ बाधेन न ज्ञानं प्रतिबध्यते किन्तूत्पन्नज्ञानेऽप्रामाण्यं ज्ञाप्यते अनुमितौ तूत्पत्तिरेव प्रतिबध्यते ।

ते च सव्यभिचरविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च सव्यभिचारोऽपि त्रिविधः साधारणासाधारणानुपसंहारिभेदात् तत्र सव्यभिचारः साध्यतदभावप्रसञ्जकइति न त्रितयसाधारणं लक्षणम् एकस्योभयं प्रत्यसाधकत्वात् अनापादकत्वाच्च नाप्युभयपक्षवृत्तित्वं उभयव्यावृत्तं वा तत्त्वम् अननुगमात्। अथ साध्यसंशयजनककोटिद्वयोपस्थापकपक्षधर्मताज्ञानविषयत्वे सति हेत्वभिमतः सः, विप्रतिपत्तिस्तु प्रत्येकं न तथा, न वा पक्षवृत्तिः, साधारणमन्वयेन असाधारणं व्यतिरेकेण अनुपसंहारी पक्षएवोभयसाहचर्य्येण कोटिद्वयोपस्थापकः। केवलान्वयिसाध्यकानुपसंहारी अयं घट एतत्त्वादित्यसाधारणश्च सद्धेतुरेव तद्ज्ञानं दोषः पुरुषस्य। अतएवासाधारणप्रकरणसमयोरनित्यदोषत्वम् अन्यथा सद्धेतौ बाधादिज्ञाने हेत्वाभासाधिक्यापत्तिः न च प्रमेयत्वेनाभेदानुमाने शब्दोऽनित्यः शब्दाकाशान्यतरत्वादित्यत्र च साधारणेऽव्याप्तिः तयोः साध्यवदवृत्तित्वेन विरुद्धत्वादिति चेन्न एतद्ज्ञानेऽपि साधारण्यादिप्रत्येकस्य ज्ञानादुद्भावनाच्च स्वपरानुमितिप्रतिबन्धात् उद्भावितैतन्निर्वाहार्थं साधारण्यादेरवश्योद्भाव्यत्वेन तस्यैव दोषत्वाच्च। एतेन पक्षवृत्तित्व सत्यनुमितिविरोधिसम्बन्धाव्यावृत्तिरनैकान्तिकः सपक्षविपक्षवृत्तित्वमुभयव्यावृत्तत्वमनुपसंहारित्वञ्चानुमितिविरोधि, तत्सम्बन्धः प्रत्येकमस्ति विरुद्धोऽप्यनेन रूपेण सव्यभिचारएव उपाधेश्च न सङ्करइति वक्ष्यतइति

निरस्तम् एतदज्ञाने ज्ञानेऽपि यावश्चकप्रत्येकज्ञानस्य दोषत्वात् असाधकतानुमितौ व्यर्थविशेषणत्वाच्च अतएव साध्याव्याप्यत्वे सति साध्याभावाव्याप्यहेत्वाभासत्वं साध्यवन्मात्रवृत्त्यन्यत्वे सति साध्याभाववन्मात्रवृत्त्यन्यत्वं वेति परास्तं व्यर्थविशेषणत्वात् प्रथमं हेत्वाभासत्वाज्ञानाच्च गगनमनित्यं शब्दाश्रयत्वादित्यादिबाधविरुद्धसङ्कीर्णासाधारणाव्याप्तिरिति कश्चित् नापि सपक्षविपक्षगतसर्वसपक्षविपक्षव्यावृत्तान्यतरत्वं व्यर्थविशेषणत्वात् अनुपसंहार्य्यव्याप्तेश्च। किञ्च पक्षातिरिक्तसाध्यवतः सपक्षत्वे प्रमेयत्वेनाभेदसाधनेऽनुपसंहार्य्येऽव्याप्तिः पक्षातिरिक्तसाध्यवतोऽप्रसिद्धेः साध्यवतः सपक्षत्वे विवक्षितेऽप्रसिद्धिः वृत्तिमतोधर्म्मस्य साध्यवद्विपक्षान्यतरवृत्तित्वनियमात्। नापि पक्षातिरिक्तसाध्यवन्मात्रवृत्त्यन्यत्वे सति पक्षातिरिक्तसाध्याभाववन्मात्रवृत्तिभिन्नत्वम् अनुपसंहार्य्यव्याप्तेः धूमादावतिव्याप्तेश्च तस्य पक्षे साध्यवति वृत्तः नापि पक्षवृत्तित्वे विरुद्धान्यत्वे च सत्यनुमित्यौपयिकसम्बन्धशून्यत्वं व्यर्थविशेषणत्वात् एतेनानुगतं सर्व्वमेव लक्षणं प्रत्युक्तं प्रत्येकमेव दूषणत्वात् उद्भावने वादिनिवृत्तेश्च। उच्यते। उभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वं तत्त्वं तच्च साधारणत्वादिविरुद्धान्यपक्षवृत्तित्वे सत्यनुमितिविरोधिसम्बन्धाव्यावृत्तिर्व्वा तेनैव रूपेण ज्ञातस्य प्रतिबन्धकत्वात् परस्य तथैवोद्भावनाच्च लक्षणानुरोधेन प्रत्येकमेव हेत्वाभास-

त्वम्। यद्वा साध्यवन्मात्रवृत्त्यन्यत्वे सति साध्याभाववन्मात्रवृत्त्यन्यत्वं तेनासाधारणस्य साध्यतदभावोपस्थापकतया दूषकत्वपक्षे नाव्याप्तिः नचैवमाधिक्ये विभागव्याघातः स्वरूपसतानुगतरूपेण तयाणामेकीकृत्य महर्षिणा विभागकरणात् नचैवं साध्याभावज्ञापकत्वेन बाधप्रकरणसमयोस्तद्ज्ञापकतयान्येषामुपसंग्रहः कुतोन कृत इति वाच्यं स्वतन्त्रेच्छस्य नियोगपर्य्यनुयोगानर्हत्वात्। तत्र साधारणत्वं न साध्याभाववद्गामित्वं सर्व्वमनित्यं मेयत्वादित्यनुपसंहार्य्ये भूर्नित्या गन्धवत्त्वादित्यसाधारणे संयोगादिसाध्यकद्रव्यत्वे चातिव्याप्तेः अतएव न साध्यवत्तदन्यवृत्तित्वं नापि निश्चितसाध्यवत्तदन्यवृत्तित्वं साध्यवदन्यवृत्तित्वस्य दूषकत्वेन शेषवैयर्थ्यात् अतएवामुकेनायमनैकान्तिक इत्येवोद्भाव्यते वतएव वादिनिवृत्तेश्च न तु सपक्षगतत्वमपि। अनुपसंहार्य्योव्यावर्त्त्योऽन्यथा तस्यैतद्विशेषत्वापत्तिरिति चेत् त्यज तर्हि तमधिकं कॢप्तेऽन्तर्भावात्। नापि सपक्षविपक्षगतत्वं व्यर्थविशेषणत्वात्। विरुद्धोव्यावर्त्त्य इति चेन्न विपक्षगामित्वस्यैव दूषकत्वे तस्याप्येतदन्तर्भावात्। अथ पक्षान्यसाध्यवत्तदन्यवृत्तित्वं साधारणत्वं तेन सर्वमनित्यं मेयत्वादित्यनुपसंहार्य्ये नातिप्रसङ्गः न च व्यर्थविशेषणता घटोऽनित्यो घटाकाशोभयवृत्तिद्वित्वाश्रयत्वादित्यनुपसंहार्य्यस्य विरुद्धस्यानैकान्तिकभिन्नस्य व्यवच्छेद्यत्वादिति चेन्न दूषकताप्रयोजकरूपभेदमन्तरेण भेदस्यै-

त्वानुपपत्तेः । साध्यवद्वृत्तित्वे सति सर्वसाध्यवदन्यवृत्तित्व-मित्यपि न व्यर्थविशेषणत्वात् एकव्यक्तिकसाध्ये तदभावाच्च एतेन हेत्वाभासान्तरव्यवच्छेदकं लक्षणान्तरेऽपि विशेषणं व्यर्थमिति । उच्यते विपक्षवृत्तित्वं साधारणत्वं तन्मात्रस्य दूषकत्वात् विरुद्धस्यापि तत्त्वाज्ञाने विपक्षवृत्तिताज्ञानद-शायां साधारणत्वम् अन्यथा तस्य हेत्वाभासान्तरतापत्तेः उपाधेरसङ्कर एव । सर्वमनित्यं मेयत्वादित्यनुपसंहारी शब्दो नित्यः शब्दत्वात् भूर्नित्या गन्धवत्त्वादित्यसाधारणश्च वस्तुगत्या साध्याभाववद्वृत्तित्वेन साधारणोऽपि पक्षताद-शायाम् उद्भावयितुं न शक्यतद्वत्युभयोर्भेदेनोपन्यासः ।

सर्व्वसपक्षविपक्षव्यावृत्तोऽसाधारणः नन सपक्षत्वं न साध्यवन्मात्रत्वं विपक्षावृत्तेर्वृत्तिमतः साध्यवद्वृत्तित्वनियमात् नापि पक्षातिरिक्तसाध्यवत्त्वं शब्दोऽनित्यः शब्दत्वादित्यादे-र्व्याप्तिधीदशायामप्यसाधारणतापत्तेः न चेष्टापत्तिः बाध-प्रतिबोधौ विना व्याप्तिपक्षधर्मतया ज्ञातादनुमितिनि-यमादिति चेन्न सर्व्वनिश्चितसाध्यवद्विपक्षव्यावृत्तत्वस्य तत्त्वात् शब्दत्वानित्यत्वव्याप्तिग्रहे सति शब्दे साध्यनिश्चया न्नातिव्याप्तिः नच घटोऽयमेतत्त्वादिति सद्धेतावतिव्याप्तिः साध्यसन्देहदशायां तस्य हेत्वाभासत्वात् । यद्यपि भूर्नित्या गन्धवत्त्वादित्यादिर्वस्तुतः साधारणः शब्दो नित्यः शब्द-त्वादितिविरुद्धः शब्दोऽनित्यः शब्दत्वादिसद्धेतुरेव व्याप्य-ज्ञानस्य पुरुषदोषत्वादित्युदाहरणाभावादसाधारणो न

पृथक् तथापि पक्षतादशायां साध्यतदभावानिश्चयेन तस्य दोषत्वम् अन्यथा पक्षत्वभङ्गप्रसङ्गात्। अथ सर्व्व सपक्षव्यावृत्तिरेव दोषो न विपक्षव्यावृत्तिरपि तस्यानुगुणत्वात् प्रत्युत विपक्षव्यावृत्तत्वेन व्यतिरेकितया परसाध्यसाधकमेवोपन्यस्तं स्यात् न च संशायकतया दोषत्वं तच्चोभयव्यावृत्तत्वज्ञानादिति वाच्यं व्याप्तिग्राहकं सहचारज्ञानं तदभावद्वारेण सपक्षव्यावृत्तिमात्रस्य दोषत्वात् किञ्च शब्दोऽनित्यः शब्दत्वादित्युक्ता निवृत्ते तावन्नेदमुद्भाव्यं न्यूनत्वेनैव वादिनिग्रहात् तदुद्भावने वादिनिवृत्तेश्च न च न्यूनत्वे तदुपजीव्यम् असाधारण्यव्यतिरेकेणापि तदुद्भावनात् नच व्यतिरेकिप्रयोगे तदुपन्यासः व्याप्तिपक्षतयोरप्रतिक्षेपेऽकिञ्चित्करत्वात् स्वार्थानुमाने च सर्व्वसपक्षव्यावृत्तिरेव दोषइत्युक्तमिति। उच्यते। शब्दत्वं साध्यवतस्तदभाववतश्च निवृत्तत्वेन ज्ञातमर्थाद्व्यतिरेकितया वा पक्षे साध्यं तदभावञ्च साधयेत् अविशेषात् अन्यथा पक्षवृत्तित्वानुपपत्तिरिति साध्यतदभावोत्थापकतया स्वार्थानुमानेऽसाधारणोदोषः सत्प्रतिपक्षे द्वौ हेतू तथा अत्र त्वेकएवेति तयोर्भेदः असाधारणेन व्यतिरेकिप्रयोगे परस्य सर्वसपक्षव्यावृत्तत्वमात्रमुद्भाव्यं साध्याभावोत्थापकत्वात् न विपक्षव्यावृत्तत्वमपि प्रतिकूलत्वात् व्यर्थत्वाच्च यद्वा विपक्षव्यावृत्ततया साध्यमिव सपक्षव्यावृत्ततया साध्याभावमपि साधयेदिति दृष्टान्ततया प्रतिबन्धितया च तदुद्भावनमपि

लक्षणान्तु सर्वसपक्षव्यावृत्तत्वं न तु विपक्षव्यावृत्तत्वमपि व्यर्थविशेषणत्वात् विरुद्धमप्यनेनोपाधिनाऽसाधारणमेव अन्यथैतदवगमे विरुद्धत्वाज्ञाने हेत्वाभासान्तरतापत्तेः। अनुपसंहार्य्यो नासत्पक्षविपक्षः सिद्धसिद्धिविरोधात् नापि केवलान्वयिधर्म्मावच्छिन्नपक्षकः केवलान्वयिसाध्यकस्य सद्धेतुत्वात् व्यतिरेकिसाध्यकस्य तु साध्यतदभाववद्गामित्वेन साधारणत्वात् अन्यथा संशयाहेतुत्वेनानैकान्तिकता न स्यात् सर्व्वं क्षणिकं सत्त्वादिति साध्याप्रसिद्धा व्याप्यत्वासिद्धमपार्थकं वा साध्यप्रसिद्धौ तु साधारणमेव न च पक्षान्यसाध्यवत्तदन्यवृत्तित्वं पक्षातिरिक्तसाध्याभाववद्वृत्तित्वं वा साधारणत्वं व्यर्थविशेषणत्वात् न च विरुद्धं विशेषणस्य व्यावृत्तमित्युक्तं नाप्यत्यन्ताभावप्रतियोगिसाध्यकत्वे सति केवलान्वयिधर्म्मावच्छिन्नपक्षकत्वं सर्वमभिधेयं मेयत्वादित्यत्र विप्रतिपत्त्या पक्षतादशायां पक्षे साध्यानिश्चयेनानुपसंहारिण्यव्यापकत्वात्। अथ पक्षातिरिक्ते व्याप्तिग्रहानुकूलाप्रतीतसहचारोऽनुपसंहार्य्यं यदि च पक्षे व्याप्तिग्रहः कथञ्चित्तदा शब्दोपदर्शितव्याप्तिकानुमानवदभेदानुमानवच्च सद्धेतुरेवेति चेन्न तत्रैव सद्धेतावतिव्याप्तेः सर्वस्य पक्षत्वे पक्षातिरिक्ताप्रसिद्धेः असाधारणविरुद्धयोरतिव्याप्तेश्च दूषणतायां व्यर्थविशेषणत्वाच्च न च दूषकतानैकान्तिकत्वेन न प्रत्येकमिति वाच्यम् अयंगत्या व्यर्थविशेषणत्वात् नापि विप्रतिपत्तिविषयमात्रवृत्तित्वं केवला-

न्वयिसाध्यके अव्याप्तेः सर्वस्य पक्षत्वे मात्रार्थाभावादिति। उच्यते व्याप्तिग्रहानुकूलैकधर्म्युपसंहाराभावो यत्र स हेत्वभिमतोऽनुपसंहारी सचान्वयेन व्यतिरेकेण वा सर्वस्य पक्षत्वे दृष्टान्ताभावात् घटोऽनित्यो घटाकाशोभयवृत्तिद्वित्वाश्रयत्वादित्यादौ साध्यसाधनसाहचर्य्यज्ञानान्तस्य विरुद्धत्वाज्ञानदशायामनुपसंहारित्वेनेष्टत्वात् केवलान्वयिधर्म्मावच्छिन्नपक्षको वा सर्व्वमभिधेयं प्रमेयत्वादितिसद्धेतौ न केवलान्वयी पक्षतावच्छेदको वा निश्चितसाध्यवद्वृत्तित्वात् विप्रतिपत्त्या साध्यानिश्चयदशायां पक्षत्वे तदनुपसंहार्य्येव व्यतिरेकिसाध्यके साध्याभाववद्वृत्तित्वाज्ञानदशायामिदं दूषणं तदवगमेऽपि साधारणसङ्कर एव एवं व्याप्यत्वासिद्धेर्ज्ञाने तदुद्भावने चायं व्यभिचारवदुपजीव्यत्वाददोषः घटाकाशोभयवृत्तिद्वित्वाश्रयत्वञ्च विरुद्धमेव एतेनानुपसंहारित्वप्रतिसन्धाने यदि व्याप्तिग्रहस्तदानुमितिरेव तदभावे व्याप्यत्वासिद्धिरेवेति निरस्तमुपजीव्यत्वादिति।

विरुद्धो न साध्याभावव्याप्यः संयोगसाध्यके सद्धेतावतिव्याप्तेः नापि साध्यवन्निष्ठात्यन्ताभावप्रतियोगिव्याप्यत्वं तत्त्वम् इदं द्रव्यं गुणवत्त्वादित्यादौ संयोगादिव्याप्येऽतिव्याप्तेः किन्तु साध्यासमानाधिकरणसाध्याभावव्याप्यः साध्यवदन्योऽन्याभावव्याप्योवा साध्याभावत्वं साध्यविरोधित्वमात्रं भावाभावसाधारणं तेनाभावे साध्येऽभावाभावस्य भा-

सत्वेऽपि नाव्याप्तिः अभावाभावोऽभावप्रतियोगिनिरूप्यत्वेन भावभिन्नएव वा नच भावत्वेनोपपत्तौ किमधिकेनेति वाच्यं बाधकं विना भावप्रतीतेः प्रमात्वात् अन्यथा अत्यन्ताभावान्योऽन्याभावयोरप्रसिद्धिः । अथ साध्यहेत्वोर्विरोधे पक्षे साध्यसत्त्वे हेत्वसिद्धिः हेतुसत्त्वे साध्याभावसिद्धौ बाधः । नच प्रमाणान्तरेण साध्याभावसिद्धौ बाधो न हेतुत्वेनैवेति वाच्यं विशेषणवैयर्थ्यादिति चेन्न हेतोः पक्षे साध्याभावबाधानुपस्थापनेऽपि प्रथमोपस्थितविरोधस्यैव उपजीव्यत्वेन दोषत्वात् ननु साध्याभावसम्बन्धो व्यभिचारएव दोषो नतु तन्नियतत्वमपि गौरवात् असाधकत्वे व्यर्थत्वाच्च नच साध्यासहचरितस्य साध्याभावसहचरितस्य वा समकालभ्रमरूपायामशक्तौ विशेषोऽस्ति येनाशक्तिविशेषोन्नायकतया न व्यर्थविशेषणता न चानैकान्तिकसामान्यलक्षणे विपक्षगामित्वं न विशेषणम् असाधारणाद्यव्याप्तेः साधारणन्तु सपक्षवृत्तित्वसहितमिति वाच्यं विपक्षगामित्वस्यैव साधारणत्वात् अधिकस्य व्यर्थत्वात् न च विरुद्धं व्यावर्त्त्यं विपक्षगामित्वेनात्रैव तदन्तर्भावात् । अथानैकान्तिके विपक्षसम्बन्धेनैव दूषकतावीजम् असाधारणाद्यव्याप्तेः न च तत्रान्यदेव वीजं हेत्वाभासाधिक्यापत्तेरिति चेदस्तु तावदेवं तथापि साधारणे विरुद्धप्रवेशो वज्रलेपएव । अन्ये तु विरुद्धलक्षणेन व्यर्थत्वं साधारणस्य व्यवच्छेद्यत्वात् नाप्यसाधकतानुमितौ एतस्यापि व्याप्यत्वात् गौरवमादौ च

व्याप्तिरस्त्येवेति न स्वार्थानुमाने दोषः परस्य तु व्यर्थत्व-मधिकं न च विरुद्धत्वादित्यत्र शब्दाधिक्यमिति तन्न अर्थो हि लिङ्गं न च व्यभिचारावारकविशेषणावच्छेदेनापि व्याप्तिर्गौरवादिति वक्ष्यते नचार्थानुगत्या व्यर्थत्वेऽपि विरुद्धत्वादित्यत्र उद्भावनाशक्यत्वम् आवश्यकतद्विवेचने तदुद्भावनस्य शक्यत्वादिति हेतुद्वयोपन्यासे चाधिकं प्रथमेन द्वितीयस्य कृतकर्त्तव्यताया दुष्टिवीजत्वात् न च नीलधूमादित्यादौ विशिष्टकर्त्तव्यमन्येन कृतं धूमवत्त्वादित्यनेन कृत-मिति चेन्न तथानुपन्यासात् अन्यथा नीलानन्वयापत्तिः। अपरे तु साध्यानवगतसहचारः साध्याभावसहचारी विरुद्धः अन्यथा पृथिव्यां मेयत्वेनेतरभेदानुमानं न विरुद्धं स्यात् साध्याभावाव्याप्यत्वात् न च तत्साधारणं सपक्षासत्त्वात् न च साध्यसहचाराज्ञानदशायां साधारणातिव्याप्तिः तदा तस्यापि विरुद्धत्वादिति तन्न विपक्षगामित्वमात्रं दूषकमित्युक्तत्वात् अतएवाव्यभिचरितो व्यतिरेक्यनैकान्तिकएव नापि साध्याभावसाधकत्वं तत्प्रमापकत्वं वा साध्याभावसम्बन्धबुद्धिं विना तदज्ञानात् नापि साध्यवदन्यत्व-व्याप्यत्वं व्याप्यत्वविवेचने अर्थविशेषत्वात् नापि स्वव्यापकाभावप्रतियोगिसाध्यकत्वं साध्याभावस्य हेतुव्यापकत्व-प्रतीतौ हेतुसाध्याभावसम्बन्धभानस्यावश्यकत्वात्। उच्यते। साध्यव्यापकाभावप्रतियोगित्वं विरुद्धत्वं न च प्रतियोगिनोरनन्वये भासमान एव तदभावयोर्व्याप्तिग्रहः भिन्नग्राहक-

सामग्रीकत्वात् अन्यथा व्यतिरेकिविलयापत्तेः यद्वा वृत्तिमतः साध्यवदवृत्तित्वं साध्यवद्वृत्तित्वानधिकरणत्वं साध्यासमानाधिकरणधर्म्मत्वं साध्यवद्वृत्तित्वानधिकरणधर्म्मत्वं वा तत्त्वं न च व्यतिरेक्यतिव्याप्तिः तत्र साध्याप्रसिद्धा तथाज्ञानविरहात् असाधारणे च सङ्कर एव अनेनापि रूपेण तस्य दोषत्वात् न च साध्यवद्वृत्तित्वे सति वृत्तिमत्त्वज्ञानात् साध्याभाववद्गामित्वज्ञानमावश्यकं तेन विना साध्यवदवृत्तित्वाज्ञानादिति वाच्यम् उपजीव्यत्वेन भिन्नत्वात् उपजीव्यत्वेऽपि साध्यवति न वर्त्तत इति ज्ञानं न स्वतोदूषकमिति चेन्न असहचारज्ञानस्य विरोधितया व्याप्तिग्रहप्रतिबन्धकत्वात् व्यभिचाराज्ञानविरोधित्वेन व्यभिचारज्ञानवत् । ननु विरुद्धस्य स्वार्थानुमानदोषत्वेऽपि परार्थानुमानेऽपार्थकत्वं अयोग्यताज्ञानेन निश्चितानन्वयादिति चेन्न अयोग्यताज्ञानस्य विरुद्धत्वज्ञानोपजीवकत्वेन तस्यैव दोषत्वात् बाधेऽप्येवं । सचायं विधिना साधने त्रिविधः साक्षात्साध्याभावव्याप्यत्वात् साध्यव्यापकाभावव्याप्यत्वात् साध्यव्यापकविरुद्धोपलम्भात् तथा अधूमवानयं योग्यधूमवत्तया अनुपलभ्यमानत्वात् निरग्निकत्वात् जलाशयत्वात् नच सर्व्वत्र साध्यव्यापकविरुद्धोपलम्भ इति न त्रैविध्यम् एतद्ज्ञानेऽपि साध्याभावव्यापकाभावव्यापकाभावव्याप्यत्वेनापि ज्ञातस्य दोषत्वात् न च धूमवानयं तदभाववत्त्वादित्यधिकं स्वसमानाधिकरणा-

त्यन्ताभावाप्रतियोगित्वं हि व्यापकत्वं तच्चाभेदेऽपि धूमवानयं धूमाभाववत्तयोपलभ्यमानत्वात् तद्वत्तयानुपलभ्यमानत्वादित्यनैकान्तिकमेव। निषेधसाधनेऽपि त्रिविधः प्रतियोग्युपलम्भात् साध्यव्यापकाभावोपलम्भात् साध्यव्यापकविरुद्धोपलम्भात् यथा निरग्निकोऽयमग्नित्वात् धूमाभावशून्यत्वात् धूमवत्त्वात् सर्वश्चायं विशेषणद्वारापि यथा कृष्णागुरुप्रभववह्निमानयं कटुकासुरभिपाण्डुरधूमवत्त्वात्। अयञ्च बाधाश्रयासिद्धस्वरूपासिद्धासाधारणसंकीर्णः क्वचित्। सत्प्रतिपक्षत्वं न समानबलबोधितसाध्यविपर्य्ययलिङ्गत्वं परस्परप्रतिबन्धेनोभयोरबोधकत्वात् बलञ्च न सपक्षसत्त्वादिव्यतिरेकिण्यभावात् नापि समानव्याप्तिपक्षधर्म्मतावत्त्वं विरोधिनैकत्र तद्भङ्गनियमात् नापि व्याप्तिपक्षधर्म्मतया ज्ञातत्वं विरोधि व्याप्तिपक्षधर्म्मताविशिष्टज्ञानयोरन्यतरभ्रमत्वनियमेन नित्यत्वव्याप्यश्रावणत्वादिवैशिष्ट्याप्रसिद्धारोपयितुमशक्यत्वात्। नच साध्यव्याप्यस्य पक्षधर्म्मता पक्षधर्म्मस्य वा साध्यव्याप्यतारोप्येति वाच्यम् एकत्र तदुभयाभावाविशिष्टस्याप्रसिद्धा तद्वैशिष्ट्यस्यारोपासम्भवात् नाप्यनिर्द्धारितविशेषेण बोधितसाध्यविपर्य्ययत्वम् उभयोरबोधकत्वात् विशेषश्च न व्याप्तिभङ्गाभङ्गरूपः एकत्र तद्भङ्गनियमात्। उच्यते। साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्य्यलिङ्गत्वं तत्त्वं बलञ्च व्याप्तिपक्षधर्म्मते विरोधिबोधकान्यगमकतौपयिकरूपसम्पत्तिमत्तय

ज्ञायमानेन प्रतिरुद्धकार्य्यत्वं वा तत्त्वं स्थापनाया व्याप्ति-पक्षधर्म्मत्वमुभयवादिसिद्धं वादिना तदभावानुपन्यासात् द्वितीयस्य तत्त्वमन्यतरासिद्धमिति प्रथमेन द्वितीयं बाधित-मिति स्वार्थानुमानएवायं दोष इत्येके तन्न एकदा निर-न्तरयोर्वोभयोर्व्याप्तिपक्षधर्म्मतया ज्ञातयोः प्रतिपक्षत्वात् युगपदुपस्थितेः कारणवशेन स्वपरसाधारणत्वात्। अथ वस्तुनोऽन्यात्मकत्वेन व्याप्तिपक्षधर्म्मताभङ्ग एकत्रावश्यक इति सएव दोषः। न च तयोर्विरोधभङ्गेऽप्युपपत्तेर्न व्या-प्त्यादिभङ्गनियमइति वाच्यम् अविरोधेऽप्यनुमित्यविरोधः विरोधे तु व्याप्तिभङ्गनियमादिति चेन्न प्रतिरुद्धत्वज्ञाना-नन्तरं व्याप्त्यादिभङ्गज्ञानमित्युपजीव्यत्वेन व्यभिचारवद-स्यापि दोषत्वात्। ननु साध्यतदभावयोरिव तद्व्याप्यत्वे-नावधारितयोर्विरोधादेकत्र न निश्चयः किन्तु संशयः निश्चये वान्यतरव्याप्तिसंशय इति व्याप्यत्वासिद्धिरिति चेन्न उभयोरेकत्र निश्चयानन्तरमन्यतरव्याप्तिसंशय इत्युप-जीव्यत्वेनास्य भिन्नत्वात् दूषकताबीजं समबलविरोधि-सामग्रीप्रतिबन्धेन निर्णयाजनकत्वं न तु व्याप्तिपक्षधर्म्मता-विरहएव सद्धेतावपि सत्प्रतिपक्षत्वात् एकत्र व्याप्तिभङ्ग ज्ञानद्वारा वास्य दूषकत्वं चक्षुरादेश्च नानुमानेन प्रति-रोधः तदुपस्थितावपि फलदर्शनेन तस्याधिकबलत्वात्। नन्वेवं वादिवाक्यमात्रस्य प्रतिरोधकत्वेनानुमानमात्रो-च्छेदः नच विरोधिवाक्यस्य न्यूनबलत्वे लक्षणायोगः समा-

नबलत्वे प्रतिरोधएव अधिकबलत्वे नरशिरःशौचानुमानवत्तेन बाधएवेति वाच्यम् अदृष्टप्रमाणविशेषदशायां प्रतिवादिवाक्येन सर्व्वानुमानप्रतिरोधापत्तेः अनुमानात् पूर्व्वं पश्चाद्वा अनुमानान्तरेण तस्य न्यूनाधिकबलत्वानिरूपणात् निरूपणे वानुमानवैयर्थ्यापत्तेः। मैवम्। विरोधिवाक्यमात्रस्य समबलत्वाभावात् उक्तं हि व्याप्तिपक्षधर्म्मते बलमिति प्रत्यक्षादेर्लिङ्गभावेनैवानुमानप्रतिरोधः कथायां तदुपन्यासानर्हत्वात्। यत्तु विरोधिव्याप्यद्वयस्यासाधारणत्वात् संशयजनकत्वं दूषकतावीजमिति तन्न एकैकं हि सत्प्रतिपक्षं न तु विशिष्टं एकैकस्य न संशायकमनुमितिप्रामाण्यग्राहकाप्रवृत्तिर्दूषकतावीजमित्यन्ये तन्न परस्परप्रतिबन्धेनानुमितेरेवानुत्पत्तेः। रत्नकोषकारस्तु सत्प्रतिपक्षाभ्यां प्रत्येकं स्वसाध्यानुमितिः संशयरूपा जन्यते विरुद्धोभयज्ञानसामग्र्याः संशयजनकत्वात् संशयद्वारा अस्य दूषकत्वं नच संशयरूपा नानुमितिः बाधस्येव विरोध्युपस्थितेरनुमितिसामग्रीविघटकत्वेनावधारणत्वात् अन्यथा बाधेऽप्यनुमित्यापत्तेरिति वाच्यम् अधिकबलतया बाधेन प्रतिबन्धात् तुल्यबलादनुमितिः स्यादेव सामग्रीसत्त्वात् साध्याभावबोधस्य च तत्र प्रतिबन्धकत्वं नतु तद्बोधकस्य चक्षुरादेः प्रत्येकं निर्णायकत्वेनावधारितात् कथं संशय इति चेन्न प्रत्येकाद्धि ज्ञानमुत्पद्यमानमर्थात् संशयो नतु प्रत्येकं संशयजनकत्वमिति मेने तन्न साध्यतदभावयोर्विरो-

धेन यथैकज्ञानस्यापरधीप्रतिबन्धकत्वं तथा साध्याभाव-व्याप्यवत्त्वस्यापि साध्यविरोधित्वात्तद्बुद्धेरपि साध्यधी-प्रतिबन्धकत्वात् विरोधिज्ञानत्वस्य प्रतिबन्धकत्वे तन्त्रत्वात् निबन्धे तु हेत्वाभासानां फलद्वारकं लक्षणमनैकान्तिका-नामन्वयाद्व्यतिरेकाद्वा कोट्युपस्थापकतया संशयः फलं विरुद्धस्य साध्यविपरीतज्ञानमपक्षधर्म्मोऽपि विरुद्धोऽन्यत्र विपरीतज्ञानसमर्थएव बाधेऽन्यतोविपरीतज्ञानं न तु हेत्व-भिमतादेः नित्योघटः कार्य्यत्वादिति विरुद्धे बाधसङ्करेऽप्य-दोषः असिद्धे अनैकान्तिकादिचतुष्टयज्ञानान्यलिङ्गत्वज्ञानं बाधे पक्षधर्मेहेतौ व्याप्तिबाधः प्रकरणसमे तु न व्याप्तिप-क्षधर्मताबाधः फलं नाप्यलिङ्गत्वज्ञानं व्याप्त्यादिबुद्धिसत्त्वात् नापि विपरीतबुद्धिः स्वसाध्यविपरीतेनानियमात् नापि संशयः प्रत्येकं कोटिद्वयानुपनयात् किन्तु कथमत्र तत्त्व-निर्णयइति जिज्ञासाफलं तथाच प्रकृतसाध्यहेत्वोः किं तत्त्वमिति जिज्ञासाजनिका व्याप्तिपक्षधर्मतोपस्थितिः प्रक-रणसमः नह्यनुपस्थिते प्रतिपक्षे एकस्माज्जिज्ञासा किन्तु निर्णयएव। अथ ज्ञातुमिच्छा जिज्ञासा सा च ज्ञानेष्टसा-धनताज्ञानात् संशयाद्वेति कथं तेन विना विरोधिसाधन-ज्ञानमात्रादिति चेन्न असति प्रतिपक्षे न जिज्ञासा सति सेत्यन्वयव्यतिरेकाभ्यां प्रकरणसमस्यापि जिज्ञासाकारण-त्वात् न चानैकान्तिकातिव्याप्तिः तत्र हि संशयद्वारा साध्ये जिज्ञासा अत्र तु हेतुसमीचीनत्वइति। ननु परामर्शयो-

रेकदानुत्पादात् कथं प्रतिरोधः क्रमोत्पन्नयोरेकदासत्त्वादिति चेन्न एकानन्तरमपरहेतुव्याप्ति पक्षधर्मताज्ञानाभ्यामग्निमव्याप्तिविशिष्टज्ञानोत्पत्तिकाले पूर्व्वपरामर्शनाशात् न चोभयहेतुव्याप्तिपक्षधर्मताज्ञानानां परस्पराप्रतिबन्धात् परामर्शोत्पाद इति वाच्यं व्याप्त्यादिज्ञानचतुष्टययौगपद्याभावात्। यत्तु व्याप्तिद्वयसंस्कारोद्बोधकहेतुद्वयज्ञानयोः परस्परप्रतिबन्धात् नोभयव्याप्तिस्मृतिरिति दूषकताबीजं तन्न व्याप्तिस्मृतिं विना सत्प्रतिपक्षाभावात् वादिभ्यां व्याप्युद्भावनाच्चेति। मैवम्। हेतुद्वयसमूहालम्बनाद्युगपदुभयव्याप्तिस्मृतावुभयपरामर्शरूपं ज्ञानमुत्पद्यते अतएकदा विरुद्धकार्य्यद्वयकारणान्नैकमपि कार्य्यमुत्पद्यते तादृशपरामर्शश्च स्वार्थानुमाने प्रत्यक्षादितः परस्य तु वाद्युपन्यस्तन्यायोत्थापित प्रमाणात्। अस्य केवलान्वयिन्यपि सम्भवः घटोऽभिधेयः प्रमेयत्वादित्यत्राभिधेयत्वं घटनिष्ठात्यन्ताभावप्रतियोगिजात्यन्यत्वे सति घटमात्रवृत्त्यन्यधर्मत्वात् घटान्योऽन्याभाववत् पटरूपवच्च घटनिष्ठात्यन्ताभावोऽभिधेयत्वप्रतियोगिकः घटवृत्तिनित्याभावत्वात् घटनिष्ठान्योऽन्याभाववदिति विशेषादर्शनदशायां नच पक्षैक्यमपि तन्त्रं विरोधस्यैव दूषकत्वेऽधिकस्य व्यर्थत्वात्।

असिद्धिस्तु न व्याप्तिपक्षधर्मताविरहः प्रत्येकमननुगमात्। अथ प्रत्येकाभावानुगतो व्याप्तिपक्षधर्मताविशिष्टाभावोऽसिद्धिः यद्यपि विशिष्टस्यान्यत्वे प्रत्येकाभावाव्याप्ति-

रपसिद्धान्तस्य अनन्यत्वे प्रत्येकाभावएव स इत्यननुगम-स्तथापि विशेषणावच्छिन्नप्रतियोगिको विशेष्याभावो विशे-षणविशेष्यसम्बन्धाभावो वा विशिष्टाभावोऽनुगत इति चेन्न विशिष्टाभावाज्ञानेऽपि व्याप्त्यादिप्रत्येकाभावज्ञाने तद्भा-वने चानुमितिप्रतिबन्धो वादिनिवृत्तिश्चेति तत्प्रत्येकाभा-वाव्याप्तिः अन्यथा तेषां हेत्वाभासान्तरतापत्तेः न च विशि-ष्टाभावधीद्वारा प्रत्येकाभावोदोषो लभ्यतइति वाच्यं प्रत्ये-काभावस्य स्वतएव दोषत्वसम्भवात् । वस्तुतो विशिष्टाभावो दोषएव न प्रत्येकस्य समर्थत्वे तेनैवान्यथासिद्धेर्व्यर्थविशेष-णत्वाच्च प्रत्येकाभावमज्ञात्वा न विशिष्टाभावज्ञानमित्युप-जीव्यत्वाद्विशिष्टाभावानुद्भावनेऽपि प्रत्येकोद्भावने वादिनि-वृत्तेः अतएव व्याप्तिपक्षधर्मताविशिष्टज्ञानविषयाभावत्वं प्रत्येकाभावानुगतमसिद्धत्वं व्यभिचारादावसिद्धत्वेऽप्युपजी-व्यत्वेन प्राथम्यात्तदुद्भावने वादिनिवृत्तेश्च स स्वतएव दूषकः तत्र व्याप्यसिद्ध्यर्थमुपाधौ तूद्भाविते विप्रतिपद्यतेऽपि तस्य दुर्ग्रहत्वात् व्यभिचारेणैव तदन्वयाच्च यदि च व्यभिचारा-दिकमज्ञात्वाप्यसिद्धिबुद्धिः तथाप्युपधेयसङ्करेऽप्युपाधेरसङ्क-रएवेति निरस्तं व्यर्थविशेषणत्वादेव एतेन व्याप्तिपक्षधर्म-तान्यतराभावोऽसिद्धिरिति प्रत्युक्तम् अन्यतरत्वाज्ञानेऽपि प्रत्येकाभावस्य दोषत्वात् व्यर्थविशेषणत्वाच्च । यत्तु व्याप्ति-पक्षधर्मताप्रमितिविरह आश्रयासिद्ध्याद्यनुगतोऽसिद्धिः तत्प्र-मितिसत्त्वे तत्रानुमित्यापत्तेरिति तदपि व्यर्थविशेषणा-

त्वात् तदज्ञानेऽपि प्रत्येकज्ञानस्य दोषत्वाच्च निरस्तं वस्तु-
तस्तु प्रकृतहेतुव्याप्तिपक्षधर्मतावैशिष्ट्यस्य तत्प्रमितेश्चाप्र-
सिद्ध्या तदभावो ज्ञातुमुद्भावयितुञ्चाशक्यएव। यत्किञ्चिद्व्या-
प्तिपक्षधर्मताविशिष्टप्रमितिविरहः सद्धेतुसाधारणः स्वप्र
मितिविरहो यत्किञ्चित् प्रमितिविरहो वा सद्धेतावपि
सकलतत्प्रमिविरहो दुर्निरूपः व्याप्त्याद्यभावादेव तद्ग्रहे
सएव दोष उपजीव्यत्वात् यदि च प्रमितिविरहः स्वरूप-
सन्नेव दोषः कारणाभावत्वात् तदा व्याप्त्यादिभ्रमादनुमि-
तिर्न स्यात् न स्याच्च हेत्वाभासता ज्ञानगर्भतल्लक्षणा-
भावात् एतेन व्याप्तिप्रमितिपक्षधर्मताप्रमितिविरहान्य-
तरत्वमसिद्धिः अन्यतरत्वञ्च तदन्यान्यत्वं तेनोभयविर-
हेऽपि नाव्याप्तिरिति निरस्तं व्यर्थविशेषणत्वादेव। स्यादे-
तत् व्याप्तिपक्षधर्मताभ्यां निश्चयोऽसिद्धिः अतएवाव्याप्तेऽप-
क्षधर्म्मे च तदारोपरूपासिद्धिरित्यनुमितिः नतु व्याप्त-
पक्षधर्म्मादपि तदनिश्चये न चैवं हेतोरप्याभासत्वं तदाभा-
सस्यापि हेतुत्वं स्यात् दशाविशेषदूष्टत्वात् सेयं स्वरूपसती
दूषिका कारणाभावत्वात् न च व्याप्त्यादिप्रत्येकनिश्चयाभा-
वएव दूषक आवश्यकत्वादिति वाच्यं विशिष्टनिश्चयस्य
हेतुत्वे तदभावस्य कार्य्यानुत्पादकत्वादिति। मैवम्। एवं
सव्यभिचारादेरप्यत्रैवान्तर्भावप्रसङ्गात् असिद्धेः स्वरूप-
सतएव दोषत्वे स्वज्ञानार्थं व्यभिचाराद्यनुद्भावनात् यदि च
तस्मात् सिद्धिर्नोपपद्यतइति तस्योपजीव्यत्वं तदाश्रयासि-

ह्यादिज्ञानात् सिद्धिर्नेति सएव पृथग्दोषः स्यात् असिद्धि-र्ज्ञातापरस्योद्भाव्येति स्वज्ञानार्थमुद्भाविता सिद्धिनिर्व्वाहार्थ-माश्रयासिद्ध्यादिज्ञानमावश्यकं कथञ्च हेतुतदाभासविवेकः सिद्धौ द्वयोरपि हेतुत्वात् असिद्धौ तदा भासत्वात् व्यभि-चारादेः सद्धेतौ सिद्धिमखण्डयतश्च हेत्वाभासत्वाभावात्। अथ सुषुप्तौ जागरेऽपि व्याप्तिपक्षधर्मतासत्त्वे तदनिश्चये-ऽनुमित्यनुत्पादो हेत्वाभासप्रयोज्यः सव्यभिचारादौ तथा-वधारणादित्यसिद्धित्वज्ञानादपि हेत्वाभासः न चैवं हेत्वा-भासाधिक्यं क्लृप्तान्तर्भावो वा तेन रूपेण व्याप्यसिद्ध्यादेरेव संग्रहादिति चेन्न एवं सव्यभिचारादिरप्यसिद्धिः स्यादित्यु-क्तत्वात् उपजीवनाद्भेदे आश्रयासिद्ध्यादिरपि पृथक् स्यात् सुषुप्त्यादावनुमित्यभावः कारणाभावात् कार्य्यानुत्पादो हि न प्रतिबन्धकमावात् किन्तु कारणाभावादपि असत्यपि प्रतिबन्धके वह्न्यभावेन दाहानुत्पत्तेः अथानुमित्यनुत्पादो हेत्वाभासप्रयुक्तएवेति चेत् तर्ह्यनुमितौ मनोयोगादिरपि न हेतुः हेत्वाभासादेरनुमित्यनुत्पादे तद्व्यतिरेकेणानुमि-त्यनुत्पादाभावात् सिद्धेरेव तद्धेतुत्वे चरमकारणमेव हेतुः स्यात् अन्ये तु गमकतौपयिकप्रतिद्वन्द्विव्याप्तिपक्षध-र्मताविरहतन्नियतयोरन्यतरत्वं हेत्वाभासत्वं तत्राधिकस-मानबलौ बाधप्रतिबोधौ प्रतिद्वन्द्विनौ व्याप्तिपक्षधर्मता-विरहश्चासिद्धिः तन्नियतौ च सव्यभिचारविरुद्धौ नचान-योरप्यसिद्धान्तर्भावः व्याप्तिविरहनियतत्वेन ज्ञातयोः

स्वातन्त्र्येणैव दूषकत्वात् भ्रमे विशेषदर्शनस्यैवेति तन्न अत्रापि व्याप्तिपक्षधर्मताविरह एवासिद्धिः पर्यवस्यति तत्र चोक्तमेवान्यतरत्वस्य न लक्षणं व्यर्थविशेषणत्वात् हेत्वाभासान्तरवहिष्कृतस्य व्याप्तिपक्षधर्मतानिश्चयविरोधिनो रूपस्य विवक्षितत्वात् तच्चाश्रयासिद्धादिकमेवेति। उच्यते आश्रयासिद्धिः स्वरूपासिद्धिः व्याप्यत्वासिद्धिः प्रत्येकमेव दोषः प्रत्येकस्य ज्ञानादुद्भावनाच्चानुमितिप्रतिबन्धात् नतु विशिष्टाभावः परामर्शविषयाभावो वा व्यर्थविशेषणत्वात् तस्य ज्ञानमुद्भावनं विनाप्यनुमितिप्रतिबन्धात् अनुभवसिद्धे हि लक्षणं नतु लक्षणानुरोधेनानुभवकल्पना परामर्शविषयाभावत्वेनानुगतेन त्रयाणामसिद्धत्वेन संग्रहो महर्षिणा कृत इति न विभागविरोधो हेत्वाभासाधिक्यं वा अतएव ये व्याप्तिविरहपक्षधर्मताविरहरूपास्तेऽसिद्धिभेदमध्यमध्यासते तदन्ये च यथायथं व्यभिचारादय इति सिद्धान्तप्रवादोऽपि न चैवं साक्षात्प्रतिबन्धकत्वेन बाधप्रतिरोधयोर्व्याप्तिविरहलिङ्गत्वेन सव्यभिचारविरुद्धयोरपि संग्रहे विभागव्याघातः स्वतन्त्राभिप्रायस्य निषेद्धुमशक्यत्वात् अन्यथा शास्त्रे परिभाषोच्छेदापत्तेः सव्यभिचारादेरप्येवं रूपसत्त्वेऽप्युपजीव्यत्वेन पृथक्त्वम् उपधेयसङ्करेऽप्युपाधेरसङ्करात्। नन्वाश्रयाप्रसिद्धा कथमाश्रयासिद्धिरुद्भाव्या न च शशीयतया गवि शृङ्गनिषेधवत् व्योमकमलमिति वाच्यं शशशृङ्गनिषेधो न गवीत्युक्तत्वा-

हिति चेत् व्योमकमलमिति निश्चितानन्वयत्वेनापार्थकम् आश्रयविशेषणासिद्धा चाश्रयासिद्धिरसङ्कीर्णा । व्याप्तिविरहश्च अर्थविशेषणादौ तदुक्तमेकामसिद्धिं दुष्परिहरतो द्वितीयापत्तिरिति उपाधिस्तु न व्याप्तिविरहः वह्निव्यापकधूमाव्यापकधर्मस्याप्रसिद्धा धूमे तद्विरहासिद्धेः किन्तु यावत्स्वव्यभिचारिव्यभिचारि साध्यसामानाधिकरण्यमनौपाधिकत्वं व्याप्तिः साध्यव्यापकसाधनाव्यापकधर्मान्तरं न तद्विरहः अपि तु तन्नियमतः न चैवमुपजीव्यत्वेन उपाधिर्हेत्वाभासान्तरम् उपजीव्यत्वेऽपि स्वतोदूषकत्वेन तदर्थं परमुखवीक्षकत्वात् नहि साध्याव्यापकत्वमनुमितिविरोधि किन्तु व्यभिचारोन्नयनेन स्वव्यतिरेकेण सत्प्रतिपक्षतया वा तदाह उपाधाववश्यं व्यभिचार उपाधेरेव व्यभिचारग्रहेति अप्रयोजकान्यथासिद्धौ सोपाधौ नासिद्धौ प्रतिकूलतर्कानुकूलतर्काभावावुपजीव्यत्वे सति स्वतोदूषकावपि न हेत्वाभासौ स्वरूपसतोरेव प्रतिबन्धकत्वादित्युक्तम् ।

बाधो न साध्याभाववत्पक्षकत्वं पक्षवृत्त्यभावप्रतियोगिसाध्यकत्वं वा पक्षे साध्याभावज्ञानमात्रस्य प्रमात्वज्ञानं विना अधिकबलत्वाज्ञानेन बाधाभावादिति वक्ष्यते अतएव साध्याभाववत्पक्षवृत्तित्वमपि न असिद्धिसङ्कीर्णबाधाव्याप्तेश्च किन्तु साध्याभाववत्त्वप्रमाविषयपक्षकत्वं प्रमितसाध्याभाववत्पक्षकत्वं पक्षनिष्ठप्रमाविषयत्वप्रकाराभावप्रतियोगिसाध्यकत्वं वेति विवक्षितविवेकेन साध्याभावप्रमैव दोषः सा च

प्रमात्वेन ज्ञाता न स्वरूपसती हेत्वाभासत्वात् प्रमात्वज्ञानं विना अधिकबलत्वाभावेनादोषत्वात् अप्रमायामपि प्रमात्वज्ञानेऽनुमितिप्रतिबन्धाच्च। अथ साध्याभाववति पक्षे हेतोः सत्त्वज्ञाने व्यभिचारः तदज्ञानेऽसिद्धिः संशययोग्यत्वाभावेन पक्षत्वाभावादाश्रयासिद्धिश्च न च पक्षभिन्ने व्यभिचारो दोषः व्यर्थविशेषणत्वात् सर्व्वोपसंहारप्रवृत्तव्याप्तेः साध्याभाववति साधनमित्यवगमादेव भङ्गात् न चैवं सन्दिग्धसाध्यदृष्टान्ते सन्दिग्धानैकान्तिकवत्पक्षे व्यभिचारसंशयादनुमानमात्रोच्छेद इति पक्षे साध्यसंशयोऽनुमानाङ्गमिति व्याप्तस्य पक्षधर्मताज्ञानादनुमित्युत्पादेन संशयनिवृत्तेः अन्यथा विशेषदर्शनस्य संशयविरोधिता भज्येत न च पक्षे साध्याभावं प्रतीत्य व्यभिचारज्ञानमित्युपजीव्यत्वाद्बाधः पृथक् पक्षे साध्याभावप्रतीतिरेव हि साध्याभावहेत्वोः सम्बन्धोल्लेखनीत्येकवित्तिवेद्यत्वेन नोपजीव्यत्वम् अन्यथा बाधदशायां पक्षे हेतोरज्ञानादसिद्धिरेव न चोद्भावितव्यभिचारनिर्व्वाहाय बाधोद्भावनमावश्यकमित्युपजीव्यत्वं व्यभिचारोद्भावने परं कथन्ताऽनावश्यकत्वात् तत्त्वे वा तन्निर्व्वाह्यमेव दूषणं क्लृप्तत्वात् वह्निकृष्णः कृतक इत्युद्भावनाद्वह्निकृष्ण इत्युद्भावने लाघवमितिबाधः पृथगिति कश्चित् तन्न पक्षे साध्याभावप्रमा स्वार्थानुमाने यदि न दोषः तदा परं प्रत्यपि न स्यादविशेषादिति तदुद्भावनस्य दूरनिरस्तत्वात्। अथोपनीतकाञ्चनमयत्वविशिष्टवह्न्यनु-

मितेः सल्लिङ्गजन्यायाः आभासत्वं हेत्वाभासाधीनं न चानुमितेः पूर्वं तत्र व्यभिचारज्ञानं विशिष्टस्याप्रसिद्धा तदभावस्याज्ञानात् अतएव पक्षासिद्धिरपि न अतः काञ्चनमयवह्न्यभावरूपाद्बाधादनुमानाभासत्वं व्यधिकरणप्रकारावच्छिन्नप्रतियोगिकस्याभाव इति चेन्न वस्तुतो व्यभिचारस्यापि तत्र सत्त्वात् ज्ञानञ्च तस्य बाधस्यैवानुमित्यनन्तरमेव किञ्च वह्नौ काञ्चनमयत्वस्यानुमितावेव भाने काञ्चनमयवह्निमानित्यनुमितिर्न स्यात् विशिष्टस्य पूर्वमज्ञानाद्वह्नौ काञ्चनमयत्वांशेऽनुमितेराभासत्वं वह्नौ लिङ्गस्यासिद्धेः व्यभिचाराच्च न चानुमितेर्विषयाभावाधीनमप्रमात्वं किन्तु हेत्वाभासाधीनं यस्य हि ज्ञानमनुमितिप्रतिबन्धकं स हेत्वाभासः न च साध्याभावो ज्ञातः प्रतिबन्धक इति न स हेत्वाभासः। वस्तुतस्तु उपनीतस्यानुमितौ भाने भानाभावः प्रत्यभिज्ञादौ च प्रतीतिबलेनैव तत्कल्पनम् अन्यथा पूर्वोपस्थितसकलपदार्थभाने यथार्थानुमित्युच्छेदः। अपि चैवं परार्थानुमानेष्वुपनीतभाने बाधितोऽर्थ उपनीतोऽयं मम भात इत्युद्भावनादेव विजयेत वादी उद्देश्यानुमितेरप्रतिबन्धान्न तत्र बाधो दोष इति चेत् तुल्यं स्वार्थानुमानेऽपि अतएव यत्र सामान्यतो दृष्टानुमानमेवेतरबाधसहायं विशेषानुमापकं तत्र बाधकानामाभासत्वे तत्प्रयुक्तं सामान्यतो दृष्टस्याप्याभासत्वमिति बाधस्यासाङ्कर्यात्। न च यदि विशेषविप्रतिपत्तौ सामान्यस्य

प्रतिज्ञा तदा अर्थान्तरं सामान्यविप्रतिपत्तौ तु नेतरत्र बाधकापेक्षेति वाच्यं स्वार्थानुमानएवैवं बाधासङ्करस्योक्तत्वादित्यपास्तम् अनुमित्यप्रतिबन्धेन तत्र बाधस्यादोषत्वात् ननु पक्षे साध्याभावग्रहवत्साध्याभावव्याप्यग्रहोऽपि दूषकोविरोधित्वाविशेषात् तथाच साध्याभावसम्बन्धो व्यभिचारः साध्याभावव्याप्यसामानाधिकरण्यं बाधः साध्याभावव्याप्यञ्च वह्नित्वादिकमेवेति चेत् न पक्षे हि साध्याभावे ज्ञायमाने ज्ञाते वा यदि साध्याभावव्याप्यसामानाधिकरण्यबुद्धिस्तदा व्यभिचारएव। अथ पक्षे साध्याभावबुद्धिं विनैव सा तर्हि हेतुसाध्याभावव्याप्ययोरुत्कटप्रमाणविशेषयोः सत्प्रतिपक्षत्वम्। अथ तुल्यबलेन सत्प्रतिपक्षोऽधिकबलेन बाध इति चेन्न गमकतौपयिकरूपसाकल्यं हि बलं तच्च द्वयोर्ज्ञातमिति कथं न सत्प्रतिपक्षत्वं गमकताबहिर्भूतञ्च न बलम्। अथ साध्याभावव्याप्यबुद्धेरनन्यथासिद्धत्वं बलं तदा ततः साधनवति पक्षे साध्याभावानुमितावनैकान्तिकत्वमेव पक्षे साध्याभावग्रहवदिति यदुक्तं तदप्यसिद्धं तस्य दोषत्वानभ्युपगमात् अन्यथा हेत्वाभासान्तरतापत्तिः। अथ हेतुतः साध्यसिद्धिसम्भावनायां व्यभिचारासिद्धिः बाधेन हेतोरसाधकत्वे सिद्धे व्यभिचारसिद्धिरित्युपजीव्यत्वाद्बाधः पृथक् अन्यथा हेतोरसाधकत्वे सिद्धेः साध्यसिद्धिसम्भावनाविरहाद्व्यभिचारबुद्धिः तस्याञ्च सत्यां हेतोरसाधकत्वधीरित्यन्योऽन्याश्रय इति चेन्न साध्यसिद्ध्युन्मुखहेतु-

ज्ञानस्य प्रमितसाध्याभावसहचरितहेतुविषयत्वेन व्यभिचारज्ञानतया दूषकत्वात् तथापि व्यभिचारे साध्याभावप्रमा तन्त्रं तां विना तदभावादिति सैव दोष इति चेत् सत्यं किन्तु साध्याभावप्रमाव्यभिचारज्ञानत्वेन दूषिका क्लृप्तत्वात् न स्वतन्त्रा अतएव पक्षे साध्याभावज्ञानत्वेन प्रतिबन्धकत्वं नतु साध्याभावसमानाधिकरणसाधनज्ञानत्वेनेति प्रत्युक्तं तस्य लघुत्वेऽप्यक्लृप्तत्वात्। अप्रत्यक्षादौ प्रमामात्रं प्रति सातन्त्र्येण बाधो दोषत्वेन क्लृप्त इत्यनुमितावपि स एव दोष इति चेन्न अन्यत्र तथा दूषकत्वाकल्पनात्। उच्यते। पक्षे साध्याभावनिश्चयः साध्याभावज्ञानप्रमात्वनिश्चयात् ज्ञानमात्रादर्थनिश्चये प्रामाण्यग्रहवैयर्थ्यं भ्रमत्वेन ज्ञातादर्थनिश्चयप्रसङ्गश्च तथा चोपजीव्यत्वेनाधिकबलत्वेनवा पक्षे साध्याभावज्ञानस्य प्रमात्वनिश्चये सव्यभिचारो नान्यथा उभयथापि साध्याभावनिश्चयाधीनव्यभिचारज्ञानात् पूर्व्वं ज्ञातं साध्याभावज्ञानप्रमात्वमेव दोष उपजीव्यत्वात्। यदि च पक्षे साध्याभावज्ञानस्य प्रमात्वनिश्चयो नानुमितिविरोधी तदा व्याप्तिपक्षधर्मतया हेतुज्ञानं विशेषदर्शनत्वेन पक्षे साध्याभावज्ञानं परिभूय साध्यं साधयेदेव पर्व्वते धूमइव वह्निं न च साध्याभाव बुद्धिरेवाऽप्रमात्वविशेषा सत्प्रतिपक्षवत् प्रतिबन्धकेति वाच्यं रजते न इदं रजतमिति ज्ञानेऽपि विशेषदर्शनेन रजतत्वस्य शङ्खे पीतत्वज्ञाने शुक्लत्वस्य चानुमानात् वादिवाक्येन पक्षे साध्या

भावज्ञानादनुमानोच्छेदप्रसङ्गाच्च। अथ पक्षे साध्याभाव-प्रमैव साध्याभाववद्धेतुविषया व्यभिचारज्ञानत्वेन दोषो न तस्याः प्रमात्वज्ञानमपीति चेत् तर्हि प्रमायाः अ-प्रमात्वज्ञाने भ्रान्तानुमितिर्न स्यात् न स्याच्च पक्षे साध्या-भावज्ञानप्रमात्वभ्रमादनुमितिप्रतिबन्धः। ननूपजीव्यत्वे-ऽप्यत्र साध्याभावप्रमेति ज्ञानं न स्वतोदूषकं क्लृप्तत्वात् पक्षे साध्याभावनिश्चयं कुर्व्वत् व्यभिचारज्ञानद्वारेति चेन्न अत्र साध्याभावप्रमेति ज्ञानान्नियमतः साध्यज्ञानानुदयात् तस्यैव प्रतिबन्धकत्वात् शब्दादौ तथा दर्शनात् साध्याभावप्रमा-विषयवृत्तित्वस्य हेतुवृत्तित्वादसाधकत्वेन साध्याभावप्रमाया हेत्वाभासत्वं साधारण्येऽपि ज्ञायमानं सत् यदनुमितिं प्रति-बध्नाति तस्यैव हेत्वाभासत्वं न च साध्याभावप्रमा नेति नि-श्चयदशायां पक्षे साध्याभावद्धेतुज्ञानाद्व्यभिचार इति वाच्यं प्रमात्वज्ञानस्य साध्याभावनिश्चयहेतुत्वेन तद्दशायां तद-भावात्। पक्षधर्म्मताबलेन प्रसिद्धं बाधान्न सिध्यतीति बाधः पृथक्। प्रसिद्धाभाववति पक्षे व्यभिचारान्न तत्सिद्धिरिति चेत् तर्ह्यसत्प्रसिद्धाभाववति सपक्षे व्यभिचारात् तमपि न साधयेत् तदज्ञानात्तत्साधनेऽनुमितिरप्रमा स्यात्। अथ पक्षवृत्तेरन्यएव धूमादिः सपक्षे तर्हि गोत्वपृथिवीत्व द्रव्य-त्वादेरप्रसिद्धसास्नानुमानं न स्यात् सास्नादिप्रत्येकव्यभि-चारात् यदि च साध्यत्वावच्छेदकसास्नात्वादिसामान्याव-च्छिन्नप्रतियोगिकाभाववति न गोत्वादिकमिति न व्यभि-

चारः तर्हि धूमेऽप्येवं व्यभिचाराभावात् साध्यतावच्छेदकेन प्रकारेणाप्रसिद्धमिव प्रसिद्धमपि साध्यं धूमगोत्वादिकं साधयेत् यदि बाधोदोषइति वयम्। साध्याभाववद्गामित्वसहचारेण व्यभिचारः साध्यप्रागभावध्वंसवद्वृत्तित्वेन व्यभिचारितया पृथिवीत्वादिना गन्धादेः द्रव्यत्वादिना गुणस्यानुमानभङ्गप्रसङ्गात् किन्तु साध्यात्यन्ताभाववद्गामित्वम् एवञ्च स प्रागभावप्रध्वंसावच्छिन्नतदाश्रये तत्प्रतियोगिसाधने पक्षे व्यभिचारोनेति बाधोदूषणम् अथावच्छेद्ये सिद्धसाधनम् अवच्छेदके हेत्वसिद्धिः विशिष्टञ्च नान्यदिति चेत् तर्हि प्रागभावप्रध्वंसप्रतियोगिनोरेकवृत्तित्वेनैकसमयतापि स्यात्। अथ यत्समयावच्छेदेन तत्र प्रागभावः प्रध्वंसोवा न तत्समयावच्छेदेन प्रतियोगीति चेत् तर्हि तदवच्छेदेन प्रतियोगिसाधने न सिद्धसाधनं किन्तु बाधएव अन्यथाभावात्यन्ताभावयोरप्यव्याप्यवृत्तित्वभङ्गः एकवृत्तित्वात् अवच्छेदकभेदेन वृत्तिरिहापि तत्र देशभेदोऽवच्छेदकोऽत्र तु समयभेदइति। असिद्धेरपि बाध एवोपजीव्यः न चैवमुपजीव्यत्वाद्बाधवत् सिद्धसाधनमपि पृथक् उपजीव्यत्वेऽपि स्वतोऽदूषकत्वात् नहि साध्यज्ञानं तद्बुद्धिविरोधि धारावाहिकज्ञानोदयात् नाप्यनुमितिविरोधि अनुमित्सया प्रत्यक्षसिद्धेऽप्यनुमानदर्शनात् तदुक्तं प्रत्यक्षदृष्टमप्यनुमानेन बुभुत्सन्ते तर्करसिका इति श्रवणानन्तरं मननदर्शनाच्च तस्मात् सिद्धिमात्रार्थिनः सिद्धौ न तदिच्छा सिद्धिविशेषार्थिनः

सास्तीति तस्यानुमितिरेव एवञ्च सिषाधयिषितपक्षविघटनद्वारा सिद्धसाधनं दूषणं न स्वतः नन्वभावधीरपि न भावधीप्रतिबन्धिका नेदं रजतमिति भ्रमानन्तरं रजतनिश्चयात् न चाभावप्रमा तथा अपीतः शङ्ख इति प्रमापयतएव पीतोऽयमिति भ्रमदर्शनादिति चेन्न विरोधिज्ञानं हि प्रतिबन्धकं प्रत्यक्षभ्रमस्य च प्रत्यक्षप्रमा विरोधिनी सा शङ्खादौ नास्त्येव अनुमितौ त्वभावप्रमामात्रमेव विरोधीति कथमभावप्रमायां भावानुमितिरिति। स चायं दशविधः धर्म्मिग्राहकमानबाधितं घटोऽव्यापकः सत्त्वादिति प्रत्यक्षेण परमाणवः सावयवा मूर्त्तत्वादित्यनुमानेन मेरुः पाषाणमयः पर्व्वतत्वादिति सुवर्णमयत्वबोधकागमेन साध्यप्रतियोगिग्राहकबाधितं वह्निरनुष्णः कृतकत्वादिति प्रत्यक्षेण शब्दोऽश्रावणो गुणत्वादित्यनुमानेन गवयत्वं गवयपदाप्रवृत्तिनिमित्तं जातित्वादित्युपमानेन साध्यग्राहकबाधितं नरशिरः कपालं शुचि प्राण्यङ्गत्वादित्यत्वागमेन हेतुग्राहकबाधितं जलानिलावुष्णौ पृथिवीतो विपरीतस्पर्शत्वात् तेजोवदिति प्रत्यक्षेण मनोविभुज्ञानसमवायाधारत्वादित्यनुमानेन राजसूयं ब्राह्मणकर्त्तव्यं स्वर्गसाधनत्वादग्निष्टोमवदिति राजसूयकर्त्तव्यताबोधकागमेनेति। अथ हेत्वाभासानाम् साधकतासाधकत्वेन सद्धेतुमत्त्वं जात्यादीनां स्वासाधकतासाधारण्येन परासाधकतासाधकतया स्वव्याघातकत्वादसद्धेतुमत्त्वम् अथ विरुद्धत्वादिज्ञानादेव स्वानु-

मितेरिव परानुमितेः प्रतिबन्धे किमसाधकतानुमानेन यद्वचसि वाद्युक्तदूषणावगमः स निगृह्णीत इति समयबन्धेन कथाप्रवृत्तौ दूषणमात्रमुद्भाव्यमन्यथार्थान्तरत्वादिति चेन्न इयं त्वदुक्त्यं परानुमितिप्रतिबन्धः स्थापनाया असाधकता-साधनत्वञ्च तत्राद्यं दूषणमात्रज्ञानादेव द्वितीयन्तु अलि-ङ्गत्वज्ञापनात् प्रतिबन्धकत्ववदनेनापि रूपेण दूषकत्वस-म्भव इत्यभिप्रायेण वा साधकतासाधनं नन्वेवं पञ्चावयवा-पेक्षा स्यात् अन्यथा न्यूनतापत्तिरिति चेन्न दूषणस्यासाध-कताव्याप्यत्वमङ्गीकृत्य कथेति पक्षधर्म्मताया एवोद्भाव्यत्वात् अन्यथा अधिकतापत्तेः नन्वेवं कृतकत्वेनानित्यत्वानुमाने व्याप्तिर्नाभिधेया उभयसिद्धत्वादिति चेन्न कथादशास-मयविषयतया दूषणेष्वसाधकताव्याप्त्युपस्थितेरावश्यकत्वात् अन्यथा कथकत्वविरोधात् नन्वेवं कृतकत्वे तद्व्याप्तिमनङ्गी-कृत्यापि कथासम्भवात् यस्तु कथारम्भेऽसाधकत्वव्याप्तिं ना-ङ्गीकरोति तं प्रति तद्दूषणत्वं प्रसाध्य पञ्चावयवप्रयोगः क-र्त्तव्य एव यत्तु दूषणे पक्षधर्म्मतामात्रमुद्भाव्यं तत्र यत्र वादि-नोस्तथा समयोऽन्यत्र तु पञ्चावयवप्रयोग एवेति तन्न कथा-सम्प्रदायविरोधात् । अथासाधकत्वं न पक्षे साध्यप्रत्ययाज-नकत्वं तेनापि तत्त्वेनाज्ञानदशायां पक्षे साध्यभ्रमजननात् कदाचिदजनकत्वं सद्धेतावपि नन्वेतत्काले साध्यविशिष्टप-क्षधर्म्मिज्ञानाजनकत्वं तत् न हि दूषणत्वज्ञानदशायां पक्षे भ्रमरूपाप्यनुमितिः साध्यविशिष्टपक्षज्ञानस्य हेतुत्वेन

ज्ञानदशायां प्रसिद्धमिति चेन्न सद्धेतावसत्प्रतिपक्षदशाया-मपि पूर्व्वकाले साध्यविशिष्टपक्षज्ञानाजनकत्वमस्तीत्यसाध-कताप्रसङ्गात्। अथ पक्षे साध्यभ्रमजनकत्वं तत् बाध-विरुद्धयोरपि तत्त्वाज्ञानदशायां भ्रमजनकत्वादिति चेन्न सद्धेतौ सत्प्रतिपक्षेऽसाधारणे च तत्त्वेन ज्ञानदशायां साध्यभ्रमजनकत्वात् अज्ञाने साध्यप्रमाजनकत्वात् नापि व्याप्तिपक्षधर्म्मतान्यतरराहित्यं सत्प्रतिपक्षासाधारणसद्धे-तोरभावात् दशाविशेषे तस्य तद्दोषत्वात् साध्यप्रसिद्धौ प्रकृतसाध्यव्याप्यप्रसिद्धेश्च नाप्यनैकान्तिकाद्यन्यतमत्वं यत्कि-ञ्चिदनैकान्तिकत्वस्यातिव्याप्तेः प्रकृतसाध्यानैकान्तिकत्वस्या-प्रसिद्धत्वेन केवलान्वयिसाधनेऽप्रसिद्धेः सङ्कतः सिद्धसा-धनात् साध्याविशेषश्च। यत्तु एतत्कालीनएतत्पक्षीयत्वा-वच्छिन्नप्रतियोगिकैतत्साध्यप्रमाकरणत्वाभावः तत्तत्काले तत्तत्पक्षविषयसाध्यत्वाभिमतानित्यत्वादिभ्रमजनकत्वाभावो वाऽसाधकत्वं न च प्रतियोग्यप्रसिद्धिः एतत्कालीनैतत्पक्षी यत्वतत्तत्कालतत्तत्पक्षविषयत्वयोर्व्यधिकरणयोरेव प्रतियो-गितावच्छेदकत्वादिति तन्न तद्धेतोः सत्प्रतिपक्षाज्ञानद-शायामपि तादृशप्रमायामकरणभावेनासाध्यतापत्तेः। नापि तृतीयलिङ्गपरामर्शस्य प्रमात्वं तत् विरुद्धादौ परा-मर्शाभावात् सद्धेतौ सत्प्रतिपक्षेऽसाधारणे च तत्प्रमात्वाच्च साध्यानुमितिहेतुभूताभावप्रतियोगिज्ञानविषयत्वं सद्धेता-वपि कदाचित् व्यभिचारित्वसत्प्रतिपक्षत्वज्ञानस्यानुमिति

प्रतिबन्धकत्वात् । अथानुमितिप्रतिबन्धकप्रमाविषयत्वम- साधकत्वं सद्धेतौ व्यभिचारादिभ्रमः प्रतिबन्धकः अनुमिति प्रतिबन्धकत्वञ्च व्यभिचारादिप्रमायास्तृतीयलिङ्गपरामर्श- विघटनद्वारा तुल्यबलतया विषयतया चेति चेन्न सत्प्रति- पक्षयोर्विरुद्धयोर्व्याप्त्योस्तवतुल्यबलत्वाभावेन तद्भ्रमस्य प्रति- बन्धकत्वात् न च तुल्यबलतया ज्ञायमानेन बोधितसाध्य- विपर्ययकत्वज्ञानं प्रतिबन्धकं तच्च प्रमैवेति वाच्यं तुल्य- बलताज्ञानमेव प्रतिबन्धकं न तु ज्ञायमानत्वज्ञानं गौरवा- दसिद्धेः । न च सत्प्रतिपक्षेऽन्यतराङ्गवैकल्यप्रमैव प्रति- बन्धिकेति वाच्यं अन्यतरत्वं तदतद्वृत्ति न च तदतद्वृत्तिसा- मानाधिकरण्येन ज्ञायमानस्य दोषत्वं धर्म्ममात्रस्य व्यभि- चारज्ञानादनुमित्युच्छेदापत्तेः अन्यतराङ्गवैकल्यज्ञानोप- जीव्यस्य तुल्यबलत्वज्ञानस्यैव प्रतिबन्धकत्वाच्च अन्यथा व्याप्यत्वासिद्धान्तर्भावापत्तेः । अथानैकान्तिकादिज्ञानस्य तत्तदनुमितिप्रतिबन्धकत्वमसाधकत्वं तथाहीदमनैकान्ति- कादिज्ञानमेतत्कालीनैतत्साध्यवत्तयैव तत्पुरुषस्यैव तत्पक्ष- कानुमितिप्रतिबन्धकम् एतदनैकान्तिकज्ञानत्वात् एतदन्य- तज्ज्ञानवदिति चेन्न एतत्साध्यवत्तयैतत्पक्षकत्वानुमितेः कदाचिल्लिङ्गभ्रमात् प्रसिद्धावप्येतत्कालीन एतत्पुरुषस्य तादृशानुमित्यप्रसिद्धेः नापि समीचीनसाध्यविशिष्टपक्ष- प्रत्ययाजनकत्वं बाधविरुद्धासिद्धेषु साध्यानधिकरणपक्षे सत्यसाध्यप्रतीत्यप्रसिद्धेः वह्निमति बाष्पे धूमभ्रमात् वह्न्य-

नुमितेः सत्यत्वाच्च न चान्यएव वह्निस्तत्र भासते मानाभावात् तद्वह्नेः प्रत्यभिज्ञानात् एकव्यक्तिके तदसम्भवाच्च न च सानुमितिलिङ्गविषयत्वेन भ्रमः अनुमितौ लिङ्गभाने मानाभावात् किञ्च भावाभावोभयमपि प्रमेयमिति सत्यनुमितौ भावत्वाभावत्ववति प्रमेयत्वभाने एकत्र तयोरभावादसत्यानुमितिः स्यात् न चान्यतरत्वं सिद्धं तद्व्याप्तिमविदुषोऽप्यनुमितेर्व्यर्थविशेषणत्वाच्च। अथ साध्याव्याप्यत्वमेव तत्र तन्त्रं तत्र च बाधो नास्तीति चेत् तर्हि कूटलिङ्गादनुमितौ वह्निव्याप्यवत्त्वमेव तन्त्रं वह्निव्याप्यञ्च किञ्चित्तत्रास्त्येव। अथ कूटलिङ्गे वह्निव्याप्याभेदः प्रतीयते तथा वह्नौ कूटलिङ्गव्यापकाभेदोऽपि अन्यथा कूटस्यैव वह्निव्याप्यत्वाप्रतीतेः एवञ्च कूटलिङ्गव्यापको वह्नित्वेन भासत इति वह्न्यनुमितिरसत्येति चेन्न वह्निव्याप्यालोके धूमारोपात् यत्रानुमितिस्तत्रासिद्धिभेदेऽसत्यत्वाभावापत्तेः आलोकव्यापके धूमव्यापकाभेदात्। अथ लिङ्गमनुमितिविषयो नियमतः पक्षधर्म्मताज्ञानविषयत्वात् व्याप्तिज्ञानविषयत्वात् नियमेनानुमितिहेतुविशेषणधीविषयत्वाच्च पर्वतवत्साध्यवच्च किञ्चैकविशेषणवत्त्वेन ज्ञाते विशेषणान्तरधीसामग्री तत्रैव विशिष्टवैशिष्ट्यज्ञानमिति धूमविशिष्टएव वह्निवैशिष्ट्यानुमितिरिति। नन्वनुमितौ व्यापकत्वभानेऽनुमित्यविच्छेदः न च फलीभूतज्ञानन्यूनविषयस्यैवं परामर्शस्यानुमितिहेतुत्वं गौरवात् विषयान्तरसञ्चारात् नानुमितिरित्यपि

न परामर्शस्य चरमकारणत्वात् प्रत्यक्षादिसामग्रीतो बल-वत्त्वाच्चेति चेन्न सिद्धसाधनेन विच्छेदात् यद्यप्येवं लिङ्ग-ज्ञाने प्रमात्वेऽपि साध्यप्रमात्वात् कथं तदसाधकं तथाप्यु-क्तमसाधकत्वमस्त्येवेति चेत् अस्तु तावदेवं तथापि दैवा-त्तत्र धूमसत्त्वे कथं तदंशेऽप्यसत्यता अतएव आर्द्रेन्धन-प्रभवो वह्निर्धूमव्यापको नान्यः नच वह्नित्वेन व्यापक-त्वादन्योऽपि तथा तेन विनापि धूमसत्त्वात् एवं वाष्पे धूम-भ्रमात् धूमव्यापको वह्निर्भासते सच तत्र नास्त्येवेति न सानुमितिः सत्येति निरस्तं दैवाद्धूमसत्त्वे सत्यत्वात्। उच्यते। स्वज्ञानदशायां पक्षे साध्यप्रत्ययाजनकत्वमसा-धकत्वं तथाहि विरुद्धत्वादिज्ञानदशावर्त्तीदं पक्षे साध्यप्रत्य-याजनकं विरुद्धादित्वात् पक्षविशेषणमहिम्ना तत्तद्दशायां पक्षे साध्यप्रत्ययाजनकत्वं सिद्ध्यति बाधितेऽपि लिङ्गत्वभ्र-मात् पक्षे साध्यप्रत्ययजनकत्वमिति न प्रतियोग्यप्रसिद्धा साध्याप्रसिद्धिः यद्वा अनुमितिप्रतिबन्धकतावच्छेदकरूप-वत्त्वमसाधकत्वं तथाचेदानीमिदमनुमितिप्रतिबन्धकत्वा-वच्छेदकरूपवदनैकान्तिकादित्वात् ज्ञानवत् अनुमितिप्रति-बन्धकतावच्छेदकञ्च रूपं ज्ञाने विषयतयानैकान्तिकादित्वमेव न च साध्यविशेषः उपाधिविशेषस्यानुमेयत्वात् तोयत्वेन पिपासोपशमनसमर्थतावच्छेदकरूपपरत्वानुमानवत्। अन्ये त्वनैकान्तिकबाधितविरुद्धेष्वव्याप्यत्वं व्याप्यत्वासिद्धेऽनैका-न्तिकत्वं स्वरूपासिद्धसत्प्रतिपक्षासाधारणेषु दशाविशेषेऽनु-

मितिप्रतिबन्धकज्ञानविषयत्वमसाधकत्वं न चैवमनैकान्तिकोऽसाधक इति सञ्ज्ञा प्रयोगानुपपत्तिः तत्राव्याप्यत्वस्यासाधकशब्दार्थत्वात् असाधकताननुगमेऽपि च हेत्वाभासत्वमननुगतमेव यस्य ज्ञानमनुमितिप्रतिबन्धकं तस्य हेत्वाभसत्वादिति ।

श्रीमद्गङ्गेशोपाध्यायविरचिते

तत्त्वचिन्तामणौ अनुमानखण्डो बाधान्तः ।

अनुमानचिन्तामणिदीधितिः।

——o——

श्रीरघुनाथशिरोमणिभट्टाचार्य्यविरचिता।



बि ए उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण

संस्कृता।



कलिकाताराजधान्यां

वाल्मीकि यन्त्रे मुद्रिता।

ई० १८७२।

अनुमानदीधितिः ।



ओं नमः सर्व्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥
अध्ययनभावनाभ्यां सारं निर्णीय निखिलतन्त्राणाम् ।
दीधितिमधि चिन्तामणि तनुते तार्किकशिरोमणिः श्रीमान् ॥
परजुष्टनयानिवर्त्तमाना मननास्वाद्यरसा विशुद्धबोधैः ।
रघुनाथकवेरपेतदोषा कृतिरेषा विदुषां तनोतु मोदम् ॥
न्यायमधीते सर्व्वस्तनुते कुतुकान्निबन्धमप्यत्र ।
अस्य तु किमपि रहस्यं केचन विज्ञातुमोशते सुधियः ॥
मान्यान् प्रणम्य विहिताञ्जलिरेष भूयो
भूयोविधाय विनयं विनिवेदयामि ।
दूष्यं वचो मम परं निपुणं विभाव्य
भावावबोधविहितो न दुनोति दोषः ॥

पूर्व्वापरग्रन्थैकवाक्यताप्रतिपत्तये शिष्यावधानाय च सङ्गतिं दर्शयन्ननुमाननिरूपणं प्रतिजानीते प्रत्यक्षेत्यादि । अथोप-जीव्योपजीवकभावः फलतः स्वरूपतश्च प्रत्यक्षफलस्यानुमित्यनु-मानादेरनुमित्युपजीवकत्वेऽपि न सर्व्वा प्रत्यक्षमिति तथा अनु-

मितयस्तु सर्वाः साक्षात्परम्परया वा व्याप्त्यादिप्रत्यक्षोपजीविकाः पुरस्कृतस्तावस्मुपजीवकतोत्कर्षः । यद्यपि सकलमेव प्रत्यक्षफलमुपजीवत्यदृष्टजननीं समयमहत्संख्यतादिपरिच्छेदिकामनुमितिम् ईश्वरप्रत्यक्षन्तु न फलं, तथापि दृष्टद्वारकमिह तथात्वमादरणीयमितरस्याविनिगम्यत्वात् सर्वस्यानुमितिकरणमिन्द्रियापेक्षोत्पत्तिकम् अनुमितिं भावयतो ऽपीश्वरज्ञानस्य तत्करणताभिसम्बन्धकप्रत्यासत्तिविरहेणानस्वात् सर्वं पुनरिन्द्रियं नानुमानाधीनजन्म मनःश्रवणयोरजन्यत्वात् दृष्टद्वारा वा तथात्वमादरणीयं नचोत्पत्तिमदपीन्द्रियम् दृष्टद्वारकमनुमानमपेक्षते । अथोपजीव्यं निरूप्यैवोपजीवकं निरूप्यतइति न नियमः क्वचित्कार्य्यं निरूप्यापि कारणनिरूपणादितिचेत् किन्ततो न हि सङ्गतिरनन्तराभिधानयाप्ता, आनन्तर्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयो ह्यर्थः सङ्गतिः जायते च कार्य्ये कारणे वा ज्ञाते कारणत्वस्य कार्य्यत्वस्य वा ज्ञानात्कि मस्य कारणं कार्य्यं वेति जिज्ञासा अतस्तयोर्द्वयोरपि सङ्गतित्व मित्यस्योपजीवकतायास्तुल्यत्वेऽपि न क्षतिरिति मन्तव्यम् । लाघवाच्चैवोपमानस्य सङ्गतिं दर्शयति सङ्गवादीति . सुप्रसिद्धतया निरसनीयाल्पवादिविप्रतिपत्तिकत्वेन सुप्रतिपदतया चानुमानएव व्युत्पित्सोः प्रथमं जिज्ञासा नोपमाने ऽप्रसिद्धत्वात् निरसनीयबहुवादिविप्रतिपत्तिकत्वेनातिदुरूहत्वाच्च चोत्सर्गिकी रीतिमनुरुध्य चेदं तेन प्रथमं

कश्चिदुक्ते जिज्ञासोदयेऽपि न क्षतिस्तथा चावसरसङ्ग-त्योपमाननिरूपणमिति भावः। यथा चावसरस्य सङ्गतित्वं तथा व्यक्तमाकरे। शब्दान्तरसमयग्राहकं सप्रवृत्तिनिमित्त-कत्वबोधकं सामान्यतोदृष्टमतोऽदृष्टजनकमदृष्टस्यौपयिकत्वा-नुमानमपेक्षते, निखिलमेवोपमानमितोऽप्युपजीवकत्वमेव सङ्गति-रित्यपि केचित् सम्भवति चेह निरूपणयोरपि कार्य्यकारण-भावः अथ तत्पूर्वकमित्यादिसूत्रे प्रत्यक्षपूर्वकत्वेनानुमाननिरूप-णासङ्गत्वेन व्याप्त्यादिप्रत्यक्षपरामर्शात् अत्रापि सहचार-प्रत्यक्षजन्यत्वादिना तन्निरूपणात् तस्य च प्रत्यक्षनिरूपणाधीन-त्वात् एवमनुमानभिन्नत्वेनोपमाननिरूपणमप्यनुमाननिरूपणा-पेक्षमिति सङ्क्षेपः।

तच्च लक्षणस्वरूपप्रामाण्यादिभिरनुमाने निरूपणीये कर-णस्य क्रियाभेदभिन्नमूर्त्तिकतया क्रियालक्षणपूर्व्वकं तल्लक्षणमाह व्याप्तीत्यादिना। अत्र व्याप्तिविशिष्टत्वपक्षधर्म्मत्वसामानाधिकरण्या-वगाहिज्ञानजन्यत्वमर्थः कर्म्मधारयोत्तरभावप्रत्ययस्य पदार्थ-तावच्छेदकद्वयसामानाधिकरण्यवाचकत्वात् ज्ञानपदोपसन्धा-नेन च बाधिताबाधितसाधारणज्ञानलाभात् न भ्रान्तानुमित्य-व्याप्तिरित्याहुस्तन्न परामर्शेण नियमतो व्याप्तिवैशिष्ट्यादिसामाना-धिकरण्ये भानाभावात् गौरवेण तद्विषयत्वेनाहेतुत्वात् सम-मूहालम्बनेऽपि विशिष्टज्ञानत्वोपपादितत्वात् अन्यथा

तादृशसामानाधिकरण्यप्रसिद्धा तज्ज्ञानस्याभावात् अवतुल्या-
तिनिरासात् अवान्तरवाक्यार्थयोग्यत्वनिर्णये महावाक्यार्थ-
ज्ञानानुदयात् विषाणे शशसम्बन्धाभावनिश्चयदशायां शशविषा-
णजन्यमिदं कार्मुकमिति शाब्दबुद्धेर्ब्रह्मणापि दुरुपपादत्वात्।
तथा च प्रमाणप्रस्तावात्प्रमैव लक्ष्या यदि च सल्लिङ्गपरामर्शादपि
भ्रान्तानुमितिस्तदा चरमज्ञानपदं प्रमापरमिति वाच्यम् अव्या-
प्यापक्षधर्मयोस्तत्त्वावगाहिना परामर्शेण जनितायां वस्तुतः सा-
ध्यवत्पक्षावगाहितया प्रमायामव्याप्तेर्लिङ्गोपहितलैङ्गिक भाननि-
रासेनांशिकभ्रमत्वस्याप्ययोगात् ईश्वरतादृशज्ञानजन्यत्वस्य चाति-
प्रसञ्जकत्वात् अतएव व्याप्तिविशिष्टे पक्षधर्मता तज्ज्ञानं वेत्या-
दिकमपास्तम्। व्याप्तिविशिष्टस्य पक्षधर्मस्येति द्वन्द्वाश्रयणाद्व्याप्ति
विशिष्टत्वपक्षधर्मत्वावगाहिज्ञानजन्यत्वं लभ्यते पदार्थयोरभेदे-
ऽपि पदार्थतावच्छेदकभेदेनैव प्रमाणप्रमेयेत्यादिसूत्रे अन्यत्र
च द्वन्द्वस्य दर्शनात् पदार्थद्वयाभेदबोधकाच्च कर्मधारयाद्भेदा-
भेदोदासीनपदार्थद्वयबोधजनकत्वेनैव द्वन्द्वस्य भेदात् विशिष्ट-
पदस्य धर्मपरतया वा व्याप्तिवैशिष्ट्यपक्षधर्मतयोर्लाभात्। नचै-
वमालोकोवह्निव्याप्यो धूमवान् पर्वत इतिज्ञानजन्येऽतिप्रसक्तिः
एकत्र तदुभयावगाहित्वस्याक्षतत्वादिति केचित्तदप्यसत् एवमपि
धूमो वह्निव्याप्यो द्रव्यं पर्वतश्चेति इतिज्ञानजन्येऽतिप्रसङ्गात्
एकरूपेण तदुभयावगाहित्वस्यैव च मीमांसकमतानुसारात्

न्नियतदुभयोपश्लेषावगाहित्वस्य च परामर्शाव्यापकत्वात्। नच तदुभयविषयत्वनियतधर्मावच्छिन्नकारणता प्रतियोगिककार्य्यताशालित्वमर्थः पक्षधर्मतापदोपादानवैयर्थ्यात् व्याप्तिविशिष्टं व्याप्तिप्रकारकं यत्पक्षधर्मताज्ञानं तज्जन्यमिति तु स्यात्। यद्यत्पापीन्धनसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नसमानाधिकरणेन्धनवानित्यादिपरामर्शजन्येऽव्याप्तिरखण्डव्याप्तेरप्रसिद्धेः भ्रमानुमितेर्लक्ष्यत्वे चात्राकाशमात्मन इत्यादौ सुतरां तथा, तथापि तावत्पदार्थानां तथाविधपरस्परोपश्लेषावगाहित्वमात्रं विवक्षितम्। नच व्यतिरेकिण्यव्याप्तिः व्यभिचारधीविरोधिधीविषयत्वेनान्वयव्यतिरेकव्याप्त्योरनुगमात् भवति हि धूमसमानाधिकरणात्यन्ताभावाप्रतियोगिवह्निसमानाधिकरणधूमत्वे वह्न्यभावव्यापकीभूताभावप्रतियोगित्वे वा गृहीते नियमतो वह्नि व्यभिचारधीप्रतिरोधः तथाविधधूमसमानाधिकरणत्वादिकन्तु न तथा रासभादौ तद्ग्रहेऽपि व्यभिचारग्रहात् व्यतिरेकसहचारेणान्वयव्याप्तिग्रहणाश्रयणाद्वा। न च भ्रमसंशयोत्तरप्रत्यक्षं प्रति विशेषदर्शनस्य हेतुतामते तत्रातिव्याप्तिः तथाविधनिश्चयत्वेन हेतुताया विवक्षितत्वात् विशेषदर्शनस्य भ्रमादिविरोधित्वेन तत्त्वमित्युक्तत्वात्। अतएव लिङ्गसमानाधिकरणातिदेशवाक्यार्थज्ञानजन्योपमितौ नातिव्याप्तिः सर्वांशविधवाक्यार्थप्रतिसन्धानत्वेन तस्य हेतुत्वात्। नचोपनयार्थ

ज्ञानजन्यत्वार्थज्ञाने तच्छब्देन सङ्केतितशब्दान्तरेण वा व्याप्त्यादिविशिष्टोपस्थितिद्वारा जनिते शाब्दबोधेऽतिव्याप्तिः व्युत्पादयिष्यते च महावाक्यार्थज्ञानस्यावान्तरवाक्यार्थधीजन्यत्वं तद्वारैव विशेषरूपेणोपस्थापकत्वमिति वाच्यं तथातिरिक्तस्य पदजन्यत्वस्य कारणतावच्छेदकेऽनुप्रवेशान्निश्चयत्वस्याप्रवेशाच्च। न च तत्रापि तत्तद्विशिष्टवैशिष्ट्यज्ञानं प्रति तत्तद्विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वात् तादृशशाब्दबोधे प्रत्यक्षे चातिव्याप्तिः दण्डो रक्तो न वेति संशये रक्तदण्डवानयमिति ज्ञानानुदयादिति वाच्यं ज्ञानोपरमेऽपि विशिष्टविषयोपधानेनेच्छाद्वेषयोः कृतेश्च साक्षात्काराद्विशेषणविषयकाद्विशिष्टसंस्कारादेव विशिष्ट स्मरणाच्च तद्विषयकगुणानां तत्र हेतुत्वे न्यूनवृत्तेर्ज्ञानत्वस्य तत्राप्रवेशादिच्छादितः संस्काराच्चानुमितेरनुदयात् संस्काराद्यन्यत्वस्य गुरुतया ज्ञानत्वेनैव तत्र हेतुत्वात्। न च परामर्शानुव्यवसायेऽति व्याप्तिः सामान्यतः प्रत्यक्षे विषयत्वेन तत्तद्विषयकप्रत्यक्षे तत्त्वेन, कदाचित् ज्ञानादिप्रत्यक्षे ज्ञानत्वादिना तत्र हेतुत्वं न तु यावानेव तत्तदितरत्वादिविषयनिष्ठो धर्म्मस्तेन तद्विषयत्वेन कार्य्यकारणभावः, मैत्रावलोकितचैत्रनिर्म्मितनीलेतरघटतद्विषयकत्वादिना तत्त्वेऽनन्तकार्य्यकारणभावप्रसङ्गान्मानाभावात् अन्यथोपपत्तेश्च। अथ विशिष्ट स्मरणेऽतिव्याप्तिः नचोपेक्षात्मकेन, तत्र हेतुत्वम् उपेक्षात्वं हि न जातिः सुखत्वादिना सङ्करप्रसङ्गात्

।श्चांशिकलोपगमाच्च नापि प्रवृत्तिनिवृत्त्यजनकत्वमजिज्ञासित-विषयत्वं वा ताद्दशादपि स्मृत्युत्पादात् नापि संस्काराजनकत्वं जनकतावच्छेदकरूपानतरापरिचयात् अन्योन्याश्रयप्रसङ्गात् संस्कारानुत्पत्त्यैवास्मरणसम्भवे स्मृति जनकतायां तदप्रवेशाच्च। नाप्यनुभवत्वेन तथात्वं संस्कारस्य फल नाश्यतया सकृदनुभूतस्य स्मरणोत्तरमस्मरणप्रसङ्गात् समानाकारस्यैव फलस्य नाशकत्वात् समूहालम्बनादितोनैकैकगोचरक्रमिकस्मरणानुपपत्तिः, जायते च पुनः पुनः स्मरणाद्दृढतरः संस्कारः। परित्यज्य च निश्चिताव्यभिचारकं रूपं गृह्यमाणव्यभिचारकेण कारणत्वकल्पनानुदयात् इदमेव चान्यत्र सामान्यस्य च हेतुतावच्छेदकत्वे वीजम्। अभिहितञ्च तात्पर्य्यटीकायां प्रथमसूत्रे ऽवयवविवेचनप्रस्तावे मिश्रैः स्मृतीनां स्वकार्य्यसंस्कारविरोधिनीनामसहभावादिति चेन्न चरमज्ञानपदस्यानुभवपरत्वात्साचात्तज्जन्यत्वस्य वा विवचितत्वादित्यपि कश्चित्। किञ्च व्याप्यविशेष्यकात्पक्षविशेष्यकाच्च परामर्शादनुमितिदर्शनाच्च तदुभयवैशिष्ट्यावगाहिनिश्चयत्वेन तत्र हेतुत्वं लघ्वघटकमपि, तदेव एकतरनिशेष्यकज्ञानादन्यतरविशेष्यकस्मरणाभावात् अन्यथा नियमेन स्मृतेरुभयविशेष्यकत्वप्रसङ्गात् समान प्रकारकत्वेनैव ज्ञानस्मरणयोः कार्य्यकारणभावाच्च तत्र विशिष्यैव कार्य्यकारणभावः मठत्वरूपेण गौरवाज्ञानाभावाच्च इत्यपि केचित् एवञ्च विशिष्टवैशिष्ट्यबोधादौ नापि नातिप्रसङ्ग-

अत्रापि वह्न्याद्यनुमितौ वह्न्यादिव्यभिचारधीविरोधिधीविषय-धर्म्मप्रकारकपक्षधर्म्मताज्ञानत्वेन हेतुतामते तु नितरां तथैव लक्षणे निवेशात् अतएव व्याप्यवत्पक्षाद्यभावग्रहं प्रति व्याप्यवत्प-क्षादिज्ञानत्वेन हेतुत्वेऽपि न क्षतिः व्याप्तिविषयकत्वेन वा अन्यं ज्ञा-नं विशेषणीयम् । एतेन स्मृतिं प्रति संस्कारद्वारा,अनुभवं प्रति च साक्षाद्विशेषणधियोर्हेतुत्वस्य निर्व्विकल्पकात्मकस्य वा स्मरण-स्यानुभवं प्रत्येव वा तस्याहेतुत्वस्य नियमतः क्वतिसाक्षात्कार-पूर्व्वं विषयस्मृतेश्च कल्पनात् व्याप्यवत्पक्षवत्त्वादिज्ञानेऽतिव्याप्ति-रित्यपि परास्तम् । साध्यादेरननुगमात् एकोपादाने अन्या-नुमितौ द्वैवाद्व्याप्तिविर्षयिण्याश्च तस्यामव्याप्तिः परमवशिष्यते सापि तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वविवक्षया निरसनी-या एतदभिप्रायैव चानुभवार्थकं चरमज्ञानपदम् एवञ्चान्वय व्य-तिरेकव्याप्त्योः पृथक्प्रयोजकत्वेऽपि न क्षतिः पर्व्वतवह्निव्याप्यवै-शिष्ट्यावगाहिनिश्चयत्वावच्छिन्न कारणताप्रतियोगिककार्य्यतायाः वह्नि व्याप्यवत्पर्व्वतनिश्चयत्वावच्छिन्नकारणताप्रतियोगिक व्या-प्तिविषयकवृत्तिकार्य्यतायाः वा अवच्छेदिका ज्ञानवृत्तिः सा-मानाधिकरण्येनावच्छेदिका वा या जातिस्तद्वत्त्वं वा बोध्यं व्याप्ति-भानेऽवश्यं भासमानो यस्तादृशानुमित्यविषयस्तद्विषयत्वमात्रं वा यांशे यां काञ्चिदनुमितिव्यक्तिमादाय तद्व्यक्तिसमवेतानुभव-त्वाव्याप्यनुभवाव्याप्यसमवेतधर्म्मसमवायित्वमिति वा वक्तव्यम् अनुभव-

लक्षणस्वीकारे तु तद्व्यक्तिसमवेतसमवेतधर्मसमवायित्वं वक्तव्यम्। व्याप्तिज्ञानत्वावच्छिन्नकारणता प्रतियोगिककार्य्यतावच्छेदकावच्छिन्ना या विशिष्टपरामर्शत्वावच्छिन्नकारणताप्रतियोगिककार्य्यता तत्समानाधिकरणानुभवत्वव्याप्यजातिमत्त्वं तत्त्वमित्यपि कश्चित्।

परे तु पक्षधर्म्मतेत्यत्र पक्षता विशेषणं तथाच पक्षतासहकृततादृशपरामर्शजन्यत्वमर्थः यथोक्ताया विशिष्याद्यभावरूपाया वा पक्षतायाः प्रत्यक्षवारणाय परामर्शस्योपादानं तत्त्वेन जनकत्वमेकावच्छेदेन तदुभयजन्यत्वञ्च विवक्षितं तेन बाधादिकालीनेन दैवात् प्रतियोगिविषयकेण परामर्शेन जन्ये पक्षतायाः प्रत्यक्षे तदुभयसमूहालम्बने वा नातिप्रसङ्गः तद्व्यत्वनुभवत्वव्याप्यजातिमत्त्वविवक्षया च नाव्याप्तिरित्याहुः तच्चिन्त्यम्। तत्करणमिति। नच व्याप्त्यादिज्ञानजन्यज्ञानकरणत्वेनेतरभेदसाधने व्याप्तिज्ञानत्वं तादात्म्यसम्बन्धेन व्याप्तिज्ञानमेव वा गमकं व्याप्तेरनन्तमेऽपि अधिकस्य भागासिद्धिवारणमात्रप्रयोजनत्वादिति वाच्यम् फलोपहितस्य लक्ष्यतया व्याप्तिज्ञानादेरतिप्रसक्तत्वात् करणत्वनिष्ठव्याप्तिसाहाय्यज्ञानत्वाद्यवच्छेद्यत्वाव्यतिरेकव्याप्तिकतया वैयर्थ्यप्रसङ्गानवकाशाच्चेति।
लिङ्गपरामर्शत्वेनानुमितिकरणस्य स्वरूपतः प्रत्यक्षोपजीवकत्वं वस्त्वापकत्वाच्च तथेति अनुमितिर्ज्ञानाकरणकज्ञानत्वेन प्रत्यक्ष

मिति मध्यनिवेशे तत्करणस्यापि प्रत्यक्षप्रमाणात्मभावः स्यादिति तन्निरस्तमिति तत्त्वेत्यपिकश्चित् ।

अनुमानप्रामाण्यं परीक्षितुं चार्व्वाकमतमुत्थापयति अथेति अनुमानमप्रमाणत्वेनाभिमतं धूमादिज्ञानम्, असत् स्यात्प्रणीत मनुमानमेव वा संवादेन संवादाभिमानेन सम्भावितस्यासतोऽनुगताकारस्य परमार्थसत्त्वलक्षणमाचष्टे चिण्याध्यचेणानुल्लेखात् अध्यक्षमूलकविकल्पोल्लिखितत्वाद्वा संवादः अनुमानाप्रामाण्ये च तन्मूलकसमय निर्णयाद्यधीनप्रवृत्तिकयोः शब्दोपमानयोः सुतरामप्रामाण्यात्प्रत्यक्षं प्रमाणमित्याह इतीत्यादि । अप्रमाण साधर्म्येण प्रमाणताप्रयोजकरूपशून्यत्वेन दृष्टसाधर्म्यस्य साधर्म्यदर्शनस्य वा, मन्वभिहितमेव साधर्म्यदर्शनं सम्भावनां भावयति सम्भावनेनैव च बहुशो व्यवहारहेतुरित्यतआह अनुमानमिति । ननु न वयमापाततो भ्रमजनकत्वलक्षणमप्रामाण्यं निरूपयामो येन भ्रमस्य विषय बाधाधीनतया प्रामाण्यं सम्भाव्येतापि परन्तु प्रमाकरणत्वव्यतिरेक मत आह अपि चेति । स्वतइति स्वानुगताकारासंस्पर्शिनि परमार्थसत्त्वलक्षणसाक्षि स्वसंवेदनसंविदितप्रामाण्ये निर्व्विकल्पकज्ञाने नाप्रामाण्यं सन्दिह्यते परन्तु तदुत्तरभाविनि समुल्लिखितालीकानुगताकारे सविकल्पकएवेति वाच्यम् निर्व्विकल्पकस्य सम्यापारकत्वस्य ... विषयत्वमात्र ... ग्राहिमात्रानानुमानाधीनत्वादिकत्वात् । एवं

सिद्धे सति व्याप्तिनिश्चये स्यात् स एव तु न सम्भवत्युपायाभावा दित्यत आह व्याप्तीति।

समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादनमिदानीं व्याप्तिस्वरूपनिरूपणमारभते नन्वित्यादिना। साध्याभाव वदवृत्तित्वस्याव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशङ्क्याह साध्यवद्भिन्नेति। साध्यवद्भिन्ने यः साध्याभावस्तदवृत्तित्वमर्थः कर्मादौ संयोगाद्यभावस्य भिन्नत्वे मानाभावादाह साध्यवदिति। हेतोः साध्यवत्पक्ष भिन्नदृष्टान्तवृत्तित्वेनाव्याप्तेराह सकलेति साकल्यं साध्याभाववति साध्ये च बोध्यं, साध्याभावो वा साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको ग्राह्यस्तेन विपक्षैकदेशनिष्ठाभावप्रतियोगिनि व्यभिचारिणि नातिव्याप्तिः न वा नानाव्यक्तिसाध्यकसद्धेतावव्याप्तिः अव्याप्यवृत्ति साध्यकव्याप्यवृत्तिसद्धेतावव्याप्ते र्व्यभिचारिणि चाव्याप्यवृत्त्यावतिव्याप्ते र्वारणायाभावद्वये प्रतियोगिव्यधिकरणत्वं बोध्यं हेत्वभावोऽपि प्रति योगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः तत्प्रतियोगित्वञ्च हेतुतावच्छेदकरूपेण बोध्यं तेन द्रव्यत्वादौ साध्ये विशिष्टसत्त्वादौनाव्याप्तिः न वा विशिष्टसत्त्वादिना तादृशाभावप्रतियोगिनि सत्त्वादावतिप्रसङ्गः यच्चैकव्यक्तिकं साध्यं विपक्षो वा तत्र निर्धूमत्वादिसाध्ये तत्तेन साध्ये निर्वह्नित्वादौ चाव्याप्तिस्तच हेत्वभा-

वह्य वक्त्राद्देः प्रत्येकं यावद्विपक्षावृत्तित्वादतश्चात्र साध्यवदिति। अत्रान्योन्याभावस्य साध्यतत्त्वावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यम् नहि भवति नीलो घटो घटादन्य इति।

नापीति साध्यमसमानाधिकरणं यस्य यदधिकरणानधिकरणं साध्यं तत्वम् साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वम् साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमिति यावत् तदनधिकरणत्वमित्यर्थः साध्यवद्भिन्नस्य च साध्यनिष्ठाधेयत्वानिरूपकत्वात्तद्वृत्तौ नातिप्रसङ्गः साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्व व्यापकाभाव प्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षस्तेन सत्तावान् द्रव्यत्वादित्यादौ न दोषः। साध्यवैयधिकरण्यं साध्यवद्भिन्नाधिकरणकत्वञ्चरमाधिकरणत्वांशस्यानतिप्रयोजनकतया तदपहाय द्वयमेकोक्त्या अनूद्य दूषयति तदुभयमपीति। साध्येत्यादेः साध्यं यदधिकरणानधिकरणं तत्त्वाभावः साध्यस्य यदनधिकरणं तद्वृत्तित्वाभावस्यार्थः तत्र केवलान्वयिनि साध्यनिष्ठाधेयत्वानिरूपकाधिकरणाप्रसिद्ध्या नानाव्यक्तिसाध्यके च एकसाध्यव्यक्तिनिष्ठाधेयत्वा निरूपकाधिकरणत्वं साधनाधिकरणव्यक्त्यन्तरस्येत्यव्याप्तिः क्वचिद्व्यभिचारिण्यतिप्रसङ्गश्चा द्वितीये च साध्यवैयधिकरण्ये यदि साध्यवत्त्वावच्छिन्नप्रतियोगिताकोभेदो विवक्षितस्तदा केवलान्वयिनि, यदि च व्यक्तिभिन्नसाध्यवद्व्यक्तिभेदस्तदा नानाधिकरणसाध्यके

सर्वथाव्याप्तिः केचित्तु साध्यासामानाधिकरण्यं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे तेनैव सम्बन्धेन साध्यवद्वृत्तित्वाभाववदधिकरणभिन्नत्वमर्थस्तेन धूमस्य स्वावयवे संयोगेन, वह्निमति च समवायेनावृत्तावपि न क्षतिः तादृशाभावस्य सम्बन्धान्तरेण तत्रैव वर्त्तमाने सुलभः व्यभिचारिणस्तु व्यभिचारनिरूपकाधिकरणएव तादृशि तादृशाभाववत्त्वम्, सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमित्यनुभवात्। न चैवं गुणकर्मान्यत्वविशिष्टसत्त्वेऽव्याप्तिः, विशिष्टस्यातिरिक्तत्वात्, अनतिरिक्तत्वे तु विशेषणविशेष्यसम्बन्धस्यैव परम्परया व्याप्तत्वात्। केवलान्वयिनि व्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्याहुस्तच्चिन्त्यं सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिर्हि द्रव्यत्वे गुणे न पृथिवीत्वसामानाधिकरण्यमिति प्रतीतिवत्सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्य, परम्परासम्बन्धेन सामानाधिकरण्यस्य वा अभावं गुणेऽवगाहते न तु सत्तायामेव द्रव्यवृत्तित्वाभावं, सत्ता न द्रव्यवृत्तित्वाभाववती, द्रव्यवृत्तित्वाभावेन सत्तावृत्तिरित्यादिसर्व्वजनसिद्धप्रतीतिबाधितत्वात् बाधकाभावाच्च संयोगतदभावयोरवच्छेदकभेदेनैकत्र प्रतीत्या तदुभयोरेकत्र सिद्धिः अतोन्द्रियसाध्यकेऽतोन्द्रिये व्यभिचारिण्यतिप्रसङ्गाच्च तत्र सामानाधिकरण्याभावस्य प्रत्यक्षत्वासम्भवेनासिद्धेः नच तदभाववद्वृत्तित्वेन तत्र तदनुमेयं तद्वृत्तिभिन्नत्वस्योपाधित्वात् किञ्च

इदमिदानीमितिप्रतीतिनियामकविशेषणताविशेषेण हेतुतायां सद्धेतावव्याप्तिः तेन सम्बन्धेनाधिकरणे काले तेन सम्बन्धेन साध्यवद्वृत्तित्वस्य विरहिणोऽप्रसिद्धेः ॥

समवायितयेति वाच्यत्वं न यथा समवायितया वच्यते घटादिसमवायितयेत्यर्थ इत्यपाहुः प्रमेयसाध्यके च भावत्वेनाभावानाम् अभावत्वेन भावानां, वह्नित्वेन निर्व्वह्नौ, अवृत्तिमात्रवृत्तिगगनत्वादिना विरुद्धघटत्वपटत्वाभ्याञ्च सर्व्वत्र प्रमेयमात्रस्याभावः सुलभः। ननु परिभाषिकमेवाव्यभिचरितत्वं तथाहि यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः प्रतियोगिसमानाधिकरणास्तत्त्वं सर्वत्र वाच्यत्वाद्यभावस्य तथात्वाद्यावत्त्वोपादानम् अतएव भूतत्वमूर्त्तत्वोभयवान्मूर्त्तत्वादित्यादौ द्वित्वावच्छिन्नाभावस्य प्रतियोगिसामानाधिकरण्येऽपि भूतत्वमनोन्यत्वाद्यभावस्य तथात्वान्नातिप्रसङ्गः। साधनसमानाधिकरणस्य गोत्वाद्यभावस्य तत्तत्साध्यव्यक्त्यभावस्य चातथात्वात् साध्यतावच्छेदकेत्यादि। येन सम्बन्धेन हेतुः तेनैव तदधिकरणं बोध्यं तेनात्मत्वे साध्ये समवायेन हेतोर्ज्ञानस्य विषयतयाऽधिकरणे घटादौ वर्त्तमानस्य साध्याभावस्यातथात्वेऽपि न क्षतिः। एवं हेत्वन्तरेऽपि सम्बन्धभेदनिबन्धनो दोषः सम्बन्धैक्यविवक्षया निरसनीयः रूपादिसामान्याभावे साध्ये

पृथिवीत्वादिकं सद्धेतुरेव प्रलये परमाणावुत्पत्तिकाले धाव-यविनि तत्सत्त्वात्। नच प्रतियोगिवत्त्वध्वंसप्रागभावयोरत्य-न्ताभावविरोधित्वं, मानाभावात्। अतएव अन्तराश्यामे रक्तं रूपं नास्तीति प्रत्ययः। न चैव रक्तिमध्वंसाद्यवगाही पूर्व्वापरर-क्तिमध्वंसप्रागभाववति रक्तेऽपि तथाप्रत्ययप्रसङ्गात्। तत्सामाना-धिकरण्यञ्च स्वविशिष्टहेत्वधिकरणावच्छेदेन बोध्यं तेन गोत्व, जन्यद्रव्यत्व— प्रलयावृत्तित्वादिना गवादेरभावस्य गवाद्यनधि करणधर्म्मावच्छेदेन तद्वति काले महाकाले वा वृत्तावपि यदा गोत्वं तदा गौर्यत्र कालत्व तत्र जन्यद्रव्यत्वम् प्रलयावृत्ति त्वादौ नातिप्रसङ्गः हेतुमति प्रलये तत्सामानाधिकरण्याभा-वात्। स्वविशिष्टेति विशेषणात् कपिसंयोगाभाववान् मेयत्वादि-त्यादौ संयोगाद्यात्मकस्य साध्याभावस्य सकलहेत्वधिकरणा-वृत्तित्वेऽपि नाव्याप्तिः। जलादिवृत्तित्वविशिष्टगोत्वाद्यभावस्या-भावस्तु जलवाद्याभावो, न तु धूमाद्यभावो जलादावपि तद-भावप्रत्ययप्रसङ्गात्। यत्समानाधिकरणानां साध्यतावच्छेदका-वच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां याव-दभावानां प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं, तत्त्वं वा तत्, ज्ञेयत्वत्वादिना वाच्यत्वादीनामभावः सुलभएव शेषं दर्शितदिशावसेयम् अत आह प्रतियोग्यवृत्तिस्येति। केचित्तु व्याप्यवृत्तेर्हेतुसमानाधिकरणसाध्याभावस्य प्रति-

योगिताया अनवच्छेदकं हेतुसमानाधिकरणस्य व्याप्य-वृत्तेः प्रतियोगिव्यधिकरणस्य वा अभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिः एवञ्च व्याप्तेरव्यभिचारित्वमन्यरूपतापि सङ्गच्छते हेतौ साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्तित्वस्यैव साध्यतावच्छेदके हेतुमन्निष्ठसाध्याभावप्रतियोगितावच्छेदकत्वस्यापि व्यभिचारत्वात् अवच्छेदकत्वञ्चेह तत्-पर्य्याप्त्यधिकरणत्वं, तेन विशिष्टवह्न्यभावस्य ह्रदत्ववह्नित्वोभयावच्छिन्नाभावस्य च प्रतियोगितावच्छेदकत्वेऽपि वह्नित्वस्य न क्षतिः। सत्त्ववति गुणादौ संयोगाद्यभावोऽपि व्याप्यवृत्तिर्वक्ष्यमाणं वा प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमेव तदवच्छेदकत्वमिहापि बोध्यम्। भवति च गुणत्वगुणावृत्तित्वद्रव्यमात्रसमवेतत्वाद्यवच्छिन्नप्रतियोगिताकव्याप्यवृत्त्यभावप्रतियोगितावच्छेदक गुणत्वाद्यनतिरिक्तवृत्त्येव संयोगत्वमित्याहुः। साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यावच्छेदकत्वसमानाधिकरणसाध्याभावत्वकत्वं यत्समानाधिकरणसाध्याभावप्रमायां साध्यवत्ताज्ञानप्रतिबन्धकत्वं नास्ति तत्त्वं वा व्याप्तिरिति तु न युक्तं सर्व्वत्र साध्याभावपदवैयर्थ्यात्। यत्तु साध्याभाववति यद्वृत्तौ प्रकृतानुमितिविरोधित्वं नास्ति तत्त्वं व्याप्तिरिति तन्न अनुमित्यविरोधित्वज्ञानस्यानुमितिजनकत्वे साध्याभाववद्वृ-

त्तित्वज्ञानस्यानुमित्यविरोधितया व्यभिचारिण्यतिप्रसङ्गात्। केचित्तु यावन्तः साध्याभावाः प्रत्येकं तत्तत्सजातीया ये तत्त-दधिकरणवृत्तित्वाभावास्तदलं तत्त्वम् साजात्यञ्च समाना समानाधिकरणधर्म्मावच्छिन्नप्रतियोगिताकत्वान्यतररूपेण, साध्या-भावस्य पूर्व्वोक्तद्वितीयरीत्या प्रत्येतव्यो व्याप्यवृत्तिस्य, प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यधिकरणो वा तेन तत्तत्साध्यव्यक्तेरव्याप्यवृत्तेर्वा साध्यस्याभाववति वृत्तावपि हेतौ नाव्याप्तिः। तद्वृत्तित्वाभावश्च तत्तत्साध्याभाववद्वृत्ति त्वत्वव्यापकव्याप्यवृत्तिधर्म्मानवच्छिन्नप्रतियोगिताको बोध्यः तेन साध्याभाववद्व्यक्तिविशेषवृत्तित्वस्य पार्थिवत्वादिविशिष्ट तस्य द्वित्वाद्यवच्छिन्नस्य वा साध्याभाववद्वृत्तित्वस्याभावमा-दाय नातिप्रसङ्गः। अत्र च हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वं बोध्यं, तेन वह्न्यभाववति स्वावयवे धूमस्य वृत्तावपि न दोषः। इत्यञ्च साध्याभावोऽपि हेतुता-वच्छेदकसम्बन्धेन कस्यचिदधिकरणे वर्त्तमानो ग्राह्यः तेन जातिमान् सत्त्वादित्यादौ हेतुतावच्छेदकसम्बन्धेन साध्याभाववद्वृत्तित्वस्याप्रसिद्धावपि न क्षतिः। यद्वा यावन्त-स्तादृशाः साध्याभावाः प्रत्येकं तेषां सजातीयस्य व्यापकी-भूतस्य व्याप्यवृत्तेरभावस्य प्रतियोगितावच्छेदकेन धर्म्मेण यद्रूपावच्छिन्नं प्रति व्याप्यत्वमवच्छिन्नं तद्रूपवत्त्वं

तत्त्वम्, साधनस्य तादृशाभावप्रतियोगित्वं, तदवच्छेदकत्वं वा साधनतावच्छेदकस्येति तु न वक्तव्यम् द्रव्यं सत्त्वादित्यादौ सत्त्वादेर्गुणकर्म्मान्यत्वविशिष्टसत्तात्वाद्यवच्छिन्नप्रतियोगिताक तादृशाभावप्रतियोगित्वादतिव्याप्तेः। इयं प्रमेयादित्यादौ प्रमेयत्वादेस्तादृशप्रतियोगितानवच्छेदकत्वादव्याप्तेश्च प्रमेयत्वव्यधिकरणप्रतियोगित्वस्याप्रसिद्धेः। यद्वा यावन्तस्तादृशाः साध्याभावाः प्रत्येकं तत्प्रयोगितावच्छेदकेन धर्म्मेण यद्रूपावच्छिन्नं प्रति व्यापकत्वमवच्छिद्यते तद्रूपवत्त्वं वा तत्त्वमित्याहुः। परे तु वृत्तिमद्वृत्तयो यावन्तः साध्याभाववदवृत्तित्वाभावास्तद्वत्त्वं व्याप्तिः येन सम्बन्धेन हेतुता तेनैव वृत्तिमत्त्वमपि बोध्यम्। तेन व्यधिकरणधर्म्मावच्छिन्नवह्न्यभाववति संयोगेन या वृत्तिस्तदभावस्य जात्यादौ वर्त्तमानस्य धूमादावसत्त्वेऽपि न क्षतिः। साध्याभावश्च पूर्ववद्बोध्यः तदवृत्तित्वाभावोऽपि स्वव्यापकतत्तत्साध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकः। तत्तत्साध्याभाववद्वृत्तित्वातिरिक्तेन समानाधिकरणेन साध्याभाववद्वृत्तित्ववृत्तिना वा धर्म्मेणानवच्छिन्नप्रतियोगिताको बोध्यः तेनालोकाद्यवृत्तित्वेन रूपेण यो वह्निसामान्याभाववद्वृत्तित्वस्य, यत्नेन्धनत्वाद्यवच्छिन्नवह्न्यभावाधिकरणीभूतमहानसवृत्तित्वादेरभावस्य धूमादौ स्वनिष्ठसाध्याभाववद्वृत्तित्वविरहस्य च हेत्वन्तरवृत्तेः स्वाश्रयसत्त्वेऽपि न क्षतिरित्याहुः। अन्ये तु वृत्तिमद्वृ-

न्तयो यावन्तः साध्याभावसमुदायाधिकरणवृत्तित्वाभावा स्तदन्यं तादृशवृत्तित्वाभावस्य स्वव्यापकतादृशवृत्तित्वव्यापकप्रतियोगिताको बोध्यः प्रयोजनन्तूक्तप्रायम् साध्याभावाधिकरणवृत्तित्वव्यापकप्रतियोगिताकस्य व्यधिकरणधर्म्मावच्छिन्नस्यैवाभावस्य वृत्तिमद्वृत्तित्वाद्व्यभिचारिण्यतिव्याप्तिरतः समुदायेति। साध्याभावस्य साध्यतावच्छेदकसम्बन्धेन बोध्यः, तेन समवायेन वह्नेः साध्यत्वे, धूमे संयोगेन च तथात्वे, वह्न्यवयवे पर्व्वतवह्न्यवयवसंयोगे च पर्व्वतस्य वह्न्यवयवस्य च सम्बन्धद्वयावच्छिन्नवह्न्यभावद्वयानधिकरणत्वेऽपि नातिव्याप्तिः। तथा स्वव्यापकीभूतसाध्यतावच्छेदकव्यापकप्रतियोगिताकोऽपि बोध्यः तेन यत्र पृथिवीत्वाभावादौ साध्ये तत्तद्विपचावृत्तित्वाद्यवच्छिन्नप्रतियोगिताकाभावकूटाधिकरणमप्रसिद्धम् तत्र सद्धेतौ पृथिवीत्वादौ साध्ये जातित्वाद्यवच्छिन्नाभाववति सामान्यादाववर्त्तमाने द्रव्यत्वप्रकारकप्रमाविषयत्वादौ च नाव्याप्तिरतिव्याप्तिर्वा, नाप्यभावत्वादिना अभावादौ साध्ये तत्तत्साध्याभावकूटाधिकरणाप्रसिद्धा अव्याप्तिरित्याङ्कस्तत्र द्रव्यत्वपृथिवीत्वोभयवान् द्रव्यत्वादित्यादौ तदुभयान्यतरत्वावच्छिन्नाभाववति द्रव्यत्वादेरवृत्तेरतिव्याप्तेः, अपिच इदं पृथिव्यन्यद्रव्यत्ववत् द्रव्यत्वादित्यादौ द्रव्यत्वत्वावच्छिन्नाभावकूटाधिकरणगुणाद्यवृत्तित्वस्य द्रव्यत्वे

सत्त्वादतिव्याप्तेः, द्रव्यत्वत्वाद्यवच्छिन्नप्रतियोगिताया: पृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वसमव्याप्तत्वात्। किञ्च रूपाभावसाध्यके सद्धेतौ साध्याभावसमुदायनिविष्टसकलरूपव्यक्त्यधिकरणाप्रसिद्धेः। यावतामभावानामैकाधिकरण्यं तावतां समुदाये विवक्षितेऽपि इदं पृथिवीवृत्तिगुणशून्यं सत्तान्यपृथिवीसमवेतशून्यं वा वायुत्वात् रूपवदन्यत्वादित्यादावतिव्याप्तिः तत्र तादृशसाध्याभावस्तोमस्य नियमतो रूपादिघटितत्वेन तद्वति सद्धेतोरवृत्तेः। वस्तुतो निखिलानामेव रूपाणां तादृशाभावसहस्रसमानाधिकरणत्वात्समानाधिकरणयावदभावाधिकरणाप्रसिद्धिर्दुर्वारैव। किञ्च हेतुतावच्छेदकसम्बन्धेन या साध्याभाववति वृत्तिस्तदभावो वक्तव्यः अन्यथा धूमादावव्याप्तिः साध्यतावच्छेदकसम्बन्धेन साध्याभाववति कालादौ वृत्तिमन्मात्रस्यैव वृत्तेर्व्यभिचारित्वतिप्रसङ्गो वा, तथा च सत्तादिसाध्यके संयोगेन समवायेन वा हेतावव्याप्तिः। साध्याभाववति तेन सम्बन्धेन वृत्तेरप्रसिद्धेः, साधनसमानाधिकरणत्वेन साध्याभावो विशेषणीया इति चेद्विशेष्यतां तथापि भूतत्वमूर्त्तत्वयोरन्यतरत्वेनाभावे साध्ये स्पर्शवदन्यत्वादावतिव्याप्तिः, तादृशसाध्याभावसमुदायवति पृथिव्यादौ तस्यावृत्तेः। किञ्च महाकालान्यत्वादिसाध्यके व्यभिचारिणि कालिकविशेषणताविशेषेण हेतावतिव्याप्तिः तादृशसाध्याभावसमुदायवति महा-

काले तेन सम्बन्धेन वृत्तिमन्मात्रस्यैव वृत्तेः । एतेन साध्यताव-च्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताक-व्याप्यवृत्तिस्वसमानाधिकरणयावदभावाधिकरणवृत्तित्वाभावा यावन्तो वृत्तिमद्वृत्तयस्तद्वत्त्वं व्याप्तिः केवलान्वयिनः संयोगाद्य-भावस्याभावाः संयोगादयो न व्याप्यवृत्तयः एवं साध्यस्य गुणसामान्यस्याभावो द्रव्यत्वाधिकरणे उत्पत्तिकालावच्छेदेन वर्त्तमानोऽपि नव्याप्यवृत्तिः उक्तरूपावच्छिन्नप्रतियोगिताकाः क्वचिदप्रसिद्ध्यादिसम्पादकाः पुनरभावा न हेतुसमानाधि-करणाः उक्तसमुदायाधिकरणवृत्तित्वतदभाववृत्तिमत्त्वानि पू-र्व्वोक्तरीत्या प्रत्येतव्यानीत्यादिकमपास्तम् । तद्विशिष्टेति । विशेषणतावच्छेदकविशिष्टज्ञानस्य विशिष्टवैशिष्ट्यप्रत्यय हेतुत्वात्, अभावप्रत्ययो हि घटत्वादिविशिष्टस्य घटादेः प्रतियोगित्वमवगाहमानो विशेषणस्यापि घटत्वादेस्तदवच्छे-दकत्वमगाहते न स्वातन्त्र्येण घटो नास्तीत्येव प्रतीतेः तद्विशिष्टाभावप्रत्ययो यदि व्यधिकरणधर्म्मेण विशिष्टं प्रतियो-गिनं नावगाहते नावगाहतएव तदा तस्यापि प्रतियोगि-तावच्छेदकत्वम् अथावगाहते तर्हि भ्रमएव स च ततो-ऽर्थसिद्धिरिति भावः । यदि पुनरानुभविका लोकानां स्वर-सवाही घटत्वेन पटो नास्तीत्यादिप्रत्ययो न तदा तादृशाभाव-निवारणं गीर्वाणगुरूणामपि शक्यमिति मन्तव्यम् ।

साध्येति साध्यस्यासामानाधिकरण्यं येषु तेषामनधिकरणत्वं तदभाववत्त्वमिति यावत् तस्मिन् सति साधिकरणत्वं तदवच्छि-न्नाधिकरणताकत्वम् सति सप्तम्यावच्छेदकत्वलाभात् तच्चेहा-न्यूनवृत्तित्वम् एवञ्च साध्यवद्वृत्तिसकलपदार्थाभाववत्त्वं यद-धिकरणताया अन्यूनवृत्ति तत्त्वमिति तु फलितार्थः। यथा सन्निवेशे अधिकरणत्वस्य न वैयर्थ्यम् हेतुतावच्छेदकसम्बन्ध-लाभाय वा तत्। येन येन सम्बन्धेन यो यः साध्यवद्वृत्ति स्तेन तेन सम्बन्धेन तत्तदभावो बोध्यः एतेन साध्यवद्वृत्तित्वं यदि साध्यतावच्छेदकसम्बन्धेन विवक्षितं तदा समवायेन साध्यतायां साध्यवदसमवेतस्य सार्व्वत्रिकत्वात्सकलतच्छून्याप्र-सिद्धिः। अथ तदभावोपि तेनैव सम्बन्धेन वाच्यस्तदा जाति-मान् प्रमेयत्वादित्यादावतिव्याप्तिः जातिमदसमवेतानां समवा-येनाभावस्य केवलान्वयित्वात् अतएव न संयोगेन, समवायेन वा, इदं न जातिमज्जातित्वादित्यादौ साध्यवत्समवेताद्यप्रसिद्धेश्च नापि साधनतावच्छेदकसम्बन्धेन इदम् एतद्रूपभिन्नं गुणत्वादित्यादावति व्याप्तेः। नापि विषयतया, घटभिन्नं मेयत्वादित्यत्राप्यतिव्याप्तेः सविषयमात्रस्यैव घटभिन्नविषयत्वात्। घटनिर्विकल्पकेऽपि घट-त्वादिभानात्। नापि सम्बन्धमात्रेण, द्रव्यं सत्त्वादित्यादावति व्याप्तेः वृत्तिमन्मात्रस्यैव स्वरूपसम्बन्धेन महाकाले वृत्तेरवृ-त्तेरभावस्य च केवलान्वयित्वादिति प्रत्युक्तम्। विशेषणताविशेषेण

वा साध्यवदवृत्तित्वं वक्तव्यम् सर्व्वत्रैव तत्तद्व्यक्तित्वे तत्तद्-न्यान्यत्वे तत्प्रकारकप्रमाविषयत्वे वा तत्त्वलभम् तेनैव सम्बन्धेन तदवच्छिन्नसामान्याभावो वाच्य इति। केचित्तु नञ्व्यत्यासे-नासाध्यानि साध्यविरोधीनि साध्यासमानाधिकरणानीति यावत् तानि सामानाधिकरण्यानधिकरणानि यस्य तत्त्वम् साध्यसामानाधिकरण्याभावव्यापकाभावप्रतियोगिसमानाधि-करण्यसामान्यकत्वमितिफलितार्थः। अत्र च साध्यसामाना-धिकरण्यं साध्यतावच्छेदकसम्बन्धेन साध्यवति हेतुतावच्छेदक सम्बन्धेन वृत्तिः। परन्तु सामानाधिकरण्यं हेतुतावच्छेदक-सम्बन्धेन हेतुमति तेनैव वृत्तिः तेन समवायेन पृथिवीत्वादेः साध्यतायां व्यभिचारिणि कालिकसम्बन्धेन हेतौ द्रव्यत्वादेश्च सम वायेन साध्यतायां समवायेन हेतौ सत्त्वगुणत्वादौ नातिप्रसङ्गः। न वा संयोगेन वह्न्यादौ साध्ये समवायेन तद्व्याप्यस्य रूपविशे-षादेः कालिकसम्बन्धेनाधिकरणे कालेस्पन्दे च कालपरिमाण स्पन्दत्वादेः समवायेन तदधिकरणे घटादेः संयोगेन वृत्तावपि चाप्रसङ्गः, सम्बन्धविशेषेण व्याप्यत्वलाभाय साधिकरणत्वमित्या-द्यस्त्वचिन्त्यम्। यथाश्रुत यथासम्भवं विकल्प्य दूषयति नेत्यादि नञ्प्रतियोगिपदेन प्रतियोगितानवच्छेदकावच्छिन्नं वक्तव्यमत आह द्रव्यत्वादेरिति प्रतियोगिविरोधित्वं प्रतियोगितदधि-करणावृत्तित्वं व्याप्यवृत्तित्वं स्वसमानाधिकरणात्यन्ताभा-

वाप्रतियोगित्वम्। अधिकरणेति तथा सत्यभावएव न सिध्येदिति भावः। संयोगाद्यत्यन्ताभावस्य द्रव्ये प्रतियोगिसामानाधिकरण्यम् अव्याप्यवृत्तित्वस्य प्रतियोग्यधिकरणीभूतद्रव्यवृत्तित्वं स्वाधिकरणीभूतद्रव्यनिष्ठात्यन्ताभावप्रतियोगित्वं गुणे च प्रतियोग्यसामानाधिकरण्यं, व्याप्यवृत्तित्वस्य प्रतियोग्यनधिकरणीभूतगुणवृत्तित्वं स्वाधिकरणीभूतगुणनिष्ठात्यन्ताभावाप्रतियोगित्वम् एतानि च न भेदकान्यविरोधात् सामान्यतस्त्वाव्याप्यवृत्तौ प्रतियोगिसमानाधिकरणे च न तथात्वयतिरेक इति भावः। ननु साध्यवान् यस्येति साध्यवति सम्बन्धोऽन्वेष्टव्यः स चाधिकरणत्वं साध्यसाधनयोरपि सामानाधिकरण्यमेवेत्यतो दूषणान्तरमाह साध्येति। साध्यत्वसाधनत्वे व्याप्तिप्रतियोगित्वानुयोगित्वे यत्तद्भ्यामेव व्याप्तिनिर्वक्तव्येत्यत आह वह्निमदिति। ननु यत्समानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नं न भवति तद्रूपावच्छिन्नेन समं तस्य सामानाधिकरण्यं व्याप्तिरित्यर्थः। नच धूमसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदको वह्नित्वावच्छिन्नो वह्निः धूमवान् वह्निमानित्यप्रतीतेरत आह विशेषेति। यएव प्रत्येकं वह्निमद्भेदाः धूमसमानाधिकरणास्तएव चैकाधिकरणवृत्तित्वावच्छिन्ना वह्निमत्सामान्यभेदबुद्धिं जनयन्ति तत्प्रतियोगितावच्छेदको वह्नित्वावच्छिन्नो वह्निरिति भवत्यव्याप्तिः। साध-

नेति वैयधिकरण्यं तदनधिकरणवृत्तित्वं तच्च केवलान्वयिनः साधनस्याप्रसिद्धम् अतिप्रसञ्जकञ्च पृथिवी द्रव्यत्वादित्यादौ अतः समानाधिकरणोपादानं धूमादेरपि न वह्न्यादिसमानाधिकरणद्रव्यत्वाद्यनधिकरणवृत्तित्वमतोयावदिति। यद्यपि पृथिवीत्वादिसमानाधिकरणघटत्वपटत्वाद्यनधिकरणवृत्तित्वं द्रव्यत्वादेस्तदनधिकरणमात्रवृत्तित्वञ्च निखिलघटपटादिरूपाणां तथापि तादृशधर्म्मानधिकरणमात्रवृत्तित्वानवच्छेदकसाध्यतावच्छेदकवत्त्वं बोध्यं नहि पृथिवीत्वसमानाधिकरणस्तादृशः कश्चिदेको धर्म्मो यदनधिकरणमात्रवृत्तितावच्छेदकं रूपत्वादि धूमत्वादिकन्तु वह्न्यादिसमानाधिकरणायोगोलकत्वाद्यनधिकरणमात्रवृत्तितावच्छेदकं तदवच्छेदकत्वञ्च तदनतिरिक्तवृत्तित्वं तच्च तच्छून्यधर्म्मावृत्तित्वं तेन मेयत्वसमानाधिकरणगुणत्वाद्यनधिकरणमात्रवृत्तितानधिकरणगगनादिवृत्तित्वेऽपि द्रव्यत्वस्य द्रव्यसाध्यकमेयत्वेनातिप्रसङ्गः वस्तुतस्तु तादृशधर्म्मानधिकरणमात्रवृत्तित्वावच्छिन्नाधिकरणताकत्वं तदवच्छेदकत्वं वाच्यं तेन सत्ताद्रव्यत्वोभयवान् गुणान्यत्वविशिष्टसत्तावान् वा जातिमत्त्वादित्यादौ नातिप्रसङ्गः सत्ताया गुणत्वाभाववन्मात्रवृत्तित्वविरहेऽपि उभयत्वाद्यवच्छिन्नाधिकरणतायाः गुणत्वाभाववन्मात्रवृत्तित्वात् प्रमेयत्वादेरिति। ननु व्यतिरेकित्वेन धर्म्मोविशेषणीयः

वस्तुतस्तु यावत्पदं तादृशस्य कस्यापि न वैयधिकरण्याव-च्छेदकमेतावन्मात्रस्फोरणाय तथा च साधनसमाधिना-करणधर्म्म निरूपितवैयधिकरण्यावच्छेदकं यद्यत्तद्भिन्न-धर्म्मवता यावत्तादृशावच्छेदकत्वशून्यधर्म्मवता वा सम-मामानाधिकरण्यमिति पर्य्यवसितं अतोदोषान्तरमाह सहा-नमादाविति तथा च तदनधिकरणत्वं तदभावाधिकरणत्वं तद्वद्भिन्नत्वं वा इयमपि दुष्टमित्यर्थः एतेन तदधिकरणा-वृत्तित्वमत्र वैयधिकरण्यमिति निरस्तं समवायितया सहा-नसवृत्तित्वं वह्नौ नास्तीति प्रतीतेर्वह्न्यादेरपि तादृशवैयधि-करण्याधिकरणत्वात्सम्बन्धविशेषेण वैयधिकरण्यविवक्षायान्तु नोक्तदोष इति ध्येयम्। उपाधिपदस्य साध्यसमव्याप्तवचन-तया आत्माश्रयप्रसङ्गादाह साध्यव्यापकेति। व्यापकत्वं व्याप्तिनिरूपकत्वमात्माश्रयादिग्रस्तमत आह तद्वन्निष्ठेति। यत्रोपाधिरव्याप्यवृत्तिर्नानाव्यक्तिको वा तत्रापि व्याप्यवृत्ति-रखण्डश्चान्ततस्तद्वद्भिन्नत्वप्रकारक प्रमाविषयत्वाभावादिरे-वास्ति यदि च तस्यापि विशेषणान्तरविशिष्टस्य द्वित्वाद्यव-च्छिन्नस्य वा तत्राभावसम्भवस्तदा साध्यसमानाधिकरणात्य-न्ताभावप्रतियोगितानवच्छेदकीभूतसाधनसमानाधिकरणा-त्यन्ताभावप्रतियोगितावच्छेदकधर्म्मवत्त्वं दलद्वयार्थो बोध्यः। अनवस्थान्निरसितुमाह प्रतियोगित्वमिति। सद्धेति। एक-

देशकालावच्छेदेनेति पूरणीयं तेन नाव्याप्य वृत्तेरभावस्य प्रागभावादेश्च प्रतियोगितायामव्याप्तिः। अन्योन्येति अत्र समवायादिसम्बन्धावच्छिन्नप्रतियोगिताकाभाववति महानसादौ संयोगादिना वह्न्यादेर्वृत्तेर्येन सम्बन्धेनाभावः तद्वति तेनावृत्तिर्वक्तव्या इत्थञ्च तेन सम्बन्धेनासम्बद्धत्वोक्तौ नायं दोषः अन्योन्याभावस्य तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकतया तद्वति तेन सम्बन्धेन प्रतियोगिनोऽसम्बद्धत्वात् परन्तु समवायेन सत्ताया अभावस्य प्रतियोगितायामव्याप्तिः तद्वति समवायेन वृत्तेरप्रसिद्धेः तादृशस्वसम्बन्धाधिकरणावृत्तितत्कत्वाभिधाने च व्यधिकरणसम्बन्धावच्छिन्नाभावप्रतियोगितायामव्याप्तिः सिद्धान्तलक्षणवक्ष्यमाणरीत्या च खण्डशः प्रसिद्ध्या तत्परिहारोऽपीति ध्येयम्। अभावविरहात्मत्वमिति न चान्योन्याभावप्रतियोगितावच्छेदकयोरप्रसक्त्यतिप्रसक्तौ प्रकृतोपयोगिप्रतियोगितामात्रस्य लक्ष्यत्वे तु लक्षणेऽत्यन्ताभावपदवैयर्थ्यं सर्वत्र नित्यस्य नित्यसाधारणरूपावच्छिन्नस्य वा उपाधिता सम्भवात् इतरथा तु भेदप्रतियोगितावारणाय संसर्गाभावपरतया तस्य सार्थकत्वादिति वाच्यम् विरहपदस्य तज्ज्ञानप्रतिबन्धकज्ञानविषयार्थकत्वात् प्रतिबध्नाति हि तादात्म्येन प्रतियोगिज्ञानमन्योन्याभावबुद्धिं प्रतिबन्धकत्वञ्चात्रैककालावच्छेदेन एक-

तावत्त्वमानत्वम् अभावपदस्य स्वाभावपरत्वात् वस्तुतस्त्वे-कसम्बन्धावच्छिन्नायास्तत्समानाधिकरणाभावप्रतियोगिताया अनवच्छेदकमपि भवत्येव सम्बन्धान्तरावच्छिन्नायाः तस्या अवच्छेदकम् अतो यत्सम्बन्धावच्छिन्नायाः साध्यसमानाधि-करणाभावप्रतियोगिताया अनवच्छेदकं तत्सम्बन्धाव-च्छिन्नाया एव साधनसमानाधिकरणाभावप्रतियोगिताया अवच्छेदकं तद्वाच्यम् तथा च संसर्गाभावत्वमनुपादेयमेव वाशब्दोऽत्रास्वरससूचनाय स च व्यधिकरणसम्बन्धेन सर्वस्य प्रतियोगिनस्तादृशभ्रमे मानाभावात् स्वाभावसम्बन्धित्वस्य स्वाभावज्ञानविषयत्वस्य वा लघोः सर्वत्र सम्भवित्वात् स्वाभा-वेत्यादौ षष्ठ्यर्थप्रतियोगितायाः प्रवेशात् तत्र स्वरूपसम्ब-न्धस्य शरणीकरणीयतया तस्यैवावश्यकत्वेन तथात्वौचित्याच्च अभावत्वप्रतिबन्धकत्वयोः प्रतियोगिताघटितत्वात् तथाविध-व्यवहारगोचरस्यापि विना प्रतियोगितां निर्वक्तुमशक्यत्वाच्च । यत्साध्यस्य यत्समानाधिकरणसाध्यस्य । तथाहीत्यादि यत्स-मानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकं यावत् साध्य-समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकम् साध्य-समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकं यावत् यत्समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकं तत्त्व-मित्यर्थे तु नोक्तदोष इति ध्येयम् । प्रतियोगितयोरैकस-

म्बन्धावच्छिन्नत्वं विशेषणताविशेषावच्छिन्नत्वं वा वक्तव्यम् तेन प्रतियोगितावच्छेदकमात्रस्यैव यत्किञ्चित्सम्बन्धावच्छिन्न-साध्यसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वेऽपि एकसम्बन्धावच्छिन्नसाध्यसमानाधिकरणात्यन्ताभावप्रतियो-गितानवच्छेदकस्य सम्बन्धान्तरावच्छिन्न साधनसमाना-धिकरणाभावप्रतियोगितावच्छेदकत्वेऽपि च न क्षतिः। व्यभिचारिणि तु यत्राधिकरणे व्यभिचारो विशेषणतावि-शेषावच्छिन्नतन्निष्ठाभावप्रतियोगितावच्छेदकं साध्यवत्त्व-प्रकारक प्रमाविषयत्वम् विशेषणताविशेषावच्छिन्नसा ध्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकमिति नाति-प्रसङ्गः। वस्तुतो हेतुसमानाधिकरणान्योन्याभावप्रतियोगि-तावच्छेदकं यावद्यद्धर्मावच्छिन्नसमानाधिकरणान्योन्याभाव-प्रतियोगितावच्छेदकं तद्धर्मावच्छिन्नसामानाधिकरण्यम् साध्यसमानाधिकरणान्योन्याभाव-प्रतियोगितानवच्छेदकम यावत्स्वसमानाधि-करणा योन्याभाव-प्रतियोगिता-नवच्छेदकं तत्त्वं वा व्याप्तिरिति ध्येयम्। साध्यमिति यावतां तेषा-मित्यर्थः। दूषितं केवलान्वयित्वव्याप्त्या सा च यथोक्तलक्ष-णेऽपि गौरवं परमतिरिच्यत इति कात्स्न्र्यं साधनस्य साध्यस्य साध्याश्रयस्य साध्यसमानाधिकरणस्य साधनाश्रयस्य साधन-समानाधिकरणस्य वा आद्ये कृत्स्नसाधनसामानाधिकरण्यं

साध्ये कृत्स्नेषु साधनेषु साध्यसामानाधिकरण्यं वार्थः प्रथमे एकेति नानेति च व्याप्तेश्चाहेतुवृत्तित्वम् पृथिवी पृथिवीत्वव्यापकजातेरित्यादावतिव्याप्तिश्च अतएव नेतरः। अर्थाभिधानपूर्वकं द्वितीयं निरस्यति अतएवेति अतएव एकव्यक्तिसाध्यकाव्याप्तेरेव विषमव्याप्तेः समव्याप्तेऽपि च संख्यापरिमाणादावेकत्र साधने सकलसाध्यसम्बन्धस्याभावात् भावाच्च शब्दवान् द्रव्यत्वादित्यादौ। तृतीये साध्याश्रययावद्‌वृत्तित्वं चतुर्थे साध्यसमानाधिकरणयावत्सामानाधिकरण्यमर्थः तत्र च यथासम्भवमेकमात्रवृत्तिसाध्यके वह्न्यादौ साध्ये धूमादावव्याप्तिरतिव्याप्तिश्च सत्त्वादौ। अर्थपरिष्कारपूर्वकं पञ्चमं निरस्यति न चेति। एकमात्रवृत्तिसाधने चाव्याप्तिश्च तथैव षष्ठं निरस्यति नापीति तादृशानां सर्वेषां महानसत्वादीनां प्रत्येकनिरूपितान्यपि सामानाधिकरण्यानि न कुत्रापि वह्नौ। अथ यद्धर्मावच्छिन्नसामानाधिकरण्यत्वेन साधनसामानाधिकरण्यव्यापकत्वं तद्धर्मावलीढसामानाधिकरण्यं विवक्षितमिति चेत् इतोऽपि लघुतया साधनव्यापकतावच्छेदकरूपावच्छिन्नसामानाधिकरण्यमेव व्याप्तिरिति सिद्धान्तयिष्यते। अविनेति। साध्यं विना साध्याभाववति यो भावोवृत्तिस्तद्विरहः साध्यं विना अभावः साध्याभावव्यापकीभूताभावप्रतियोगित्वमिति वा। अथेति सम्बन्धः सामा-

नाधिकरण्यं व्यभिचारिसम्बन्धस्य केनचित्किञ्चिद्रूपावच्छिन्नेन धूमादेरपि द्रव्यत्वादिना वह्निव्यापकत्वात्। तद्बाधादिति न च व्यभिचाराग्रहसहकृतस्तद्बोधस्तथा व्यभिचारतद्व्यतिरेकयोः अनुपस्थितावपि समानाधिकरणधर्म्मवत्ताज्ञानमात्रादनुमित्यनुत्पादस्य सर्वानुभवसिद्धत्वात् हेत्वन्तरे तत्रैव च रूपान्तरेण व्यभिचारग्रहे हेतुतावच्छेदकाग्रहेऽप्यनुमित्युत्पादाच्च विवदन्ते च सामानाधिकरण्यज्ञानस्यैव हेतुतायां व्यभिचारज्ञानाभावकारणत्वमपेक्ष्य कारणीभूतसामानाधिकरण्यज्ञाने लाघवेनाव्यभिचारस्य विषयतयावच्छेदकत्वमुचितम् न च व्यभिचारसंशयेऽनुमित्यनुत्पादादव्यभिचारनिश्चयत्वेन कारणत्वेऽपि गौरवम् व्यभिचारज्ञानस्य हि भ्रमत्वनिश्चयदशायामेवाविरोधितया भ्रमत्वेनानिश्चीयमानस्य विरोधित्वं वाच्यम् अव्यभिचारनिश्चयस्य च भ्रमत्वाज्ञायामप्यनुमित्यजनकतया भ्रमत्वेनागृह्यमाणस्यैव हेतुत्वमिति तत्रैव गौरवात् नानाविधव्यभिचारज्ञानाभावानां नियतपूर्ववर्त्तित्वेन क्लृप्तानामपि हेतुत्वमपेक्ष्य वक्ष्यमाणैकविधाव्यभिचारज्ञानस्यैव हेतुत्वं युक्तमित्यप्याहुः। सामानाधिकरण्यविशिष्टपक्षधर्म्मत्वं तु पक्षे साध्यग्रहं विना दुर्ग्रहमिति केवलान्वयित्वस्याग्रहे सामानाधिकरण्यमात्रग्रहादनुमित्यनुत्पत्तेस्तद्ग्रहोऽपि वाच्यः तच्च वृत्तिमदत्यन्ताभावा-

प्रतियोगित्वादिकमन्योन्याभावप्रतियोगितानवच्छेदकत्वं वा तथा च सर्वसाधारण्याय लाघवात्साधनवतस्तद्वृत्तित्वस्य वा वृत्तेरन्योन्याभावस्य वा विशेषणत्वमुचितमिति सिद्धान्तरहस्यं शेषं केवलान्वयिखण्डने वक्ष्यामः ।

प्रतियोग्यसमानाधिकरणेति प्रतियोग्यसमानाधिकरणयद्रूपविशिष्टसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदको यो धर्मस्तद्धर्मावच्छिन्नेन येन केनापि समं सामानाधिकरण्यं तद्रूपविशिष्टस्य तद्धर्मावच्छिन्नयावन्निरूपिता व्याप्तिरित्यर्थः दण्डादौ साध्ये परम्परासम्बद्धं दण्डत्वादिकमेव साध्यतावच्छेदकमतो नाव्याप्तिः इत्थञ्च इदं द्रव्यं गुणकर्मान्यत्वे सति सत्वादित्यादौ सत्त्वाद्यधिकरणगुणादि निष्ठात्यन्ताभावप्रतियोगित्वेऽपि द्रव्यत्वादेः नाव्याप्तिः साधनस्य विशिष्टसत्त्वादेर्गुणादाववृत्तेः सामानाधिकरण्यव्यक्तीनां भेदेऽपि निरूपकतावच्छेदकस्याधिकरणतावच्छेदकस्य चैक्याद्व्याप्तेरैक्यं वस्तुतस्तु धूमत्वादिविशिष्टव्यापकवह्निसामानाधिकरण्यस्य रासभादि साधारणत्वाद्धूमत्वादिमति तादृशसामानाधिकरण्यं तद्वति धूमत्वादिकं वा व्याप्तिः आद्या भिन्ना द्वितीया त्वभिन्नैवेति ध्येयम् । अयं कपिसंयोगि एतद्वृत्तत्वादित्यादिसंग्राह्यासमानाधिकरणान्तम् । यत्तु इदं संयोगि द्रव्यत्वादित्यत्रा-

व्याप्तिवारणाय तत् संयोगस्य शाखाद्यवच्छेदेनवृत्ते वृक्षत्वावच्छेदेन तत्सामान्याभाववत्त्वाविरोधात् तत्र चातीन्द्रियस्य संयोगस्य सत्त्वात्परितः प्रतियोग्युपलम्भदोषाद्वा वृक्षेन संयोग इत्यादि नाध्यक्षमिति तत्र द्रव्ये संयोगसामान्याभावे मानाभावात् न च यो यदीययावद्विशेषाभाववान् स तत्सामान्याभाववानिति व्याप्तेर्यावत्संयोगाभावा एव मानं यत्तदर्थयोरननुगमात् एकावच्छेदेन यावद्विशेषाभाववत्त्वस्योपाधित्वाच्च एतेन अयं संयोगसामान्याभाववान् संयोगयावद्विशेषाभाववत्त्वादिति निरस्तं व्यर्थविशेषणत्वादप्रयोजकत्वान्निर्गुणत्वादेरुपाधित्वाच्च । न च प्रतियोग्यनवच्छेदकतयैव वृक्षत्वादेरभावावच्छेदकत्वं गुणाद्यनवच्छेदकप्रमेयत्वादेस्तदभावावच्छेदकत्वप्रसङ्गात् यथा च घटपूर्ववर्त्तित्वस्य प्रतिदण्डं वह्निसामानाधिकरण्यस्य वा प्रतिधूमं भिन्नत्वेऽपि दण्डत्वं धूमत्वं वा तत्सामान्यस्यावच्छेदकं तथैव संयोगसामान्यस्यावच्छेदकं द्रव्यत्वादिकमित्यस्यापि सुवचत्वाच्चेति सम्प्रदायविदः । नवीनास्तूत्पत्तिकालावच्छेदेन घटादौ गुणस्य प्रलयावच्छेदेन गगनादौ संयोगस्य सामान्याभावो वर्त्तते तथा धूमवत्यपि विरहो दहनस्य इह पर्वते नितम्बे हुताशनो न शिखरे इति प्रतीतेः संयोगेन द्रव्यस्याप्यव्याप्यवृत्तित्वात् वृत्तेरव्याप्यवृत्तित्वे वृत्तिमतोऽव्याप्यवृत्तित्वस्या-

त्यन्तमसम्भावितत्वाच्च एवं प्रतियोगिमतोरपि कालदेशयोर्द्देशकालभेदावच्छेदेन तदभावः तथा च तत्तत्साध्यकाव्याप्तिवारणाय तत् नोपादेयञ्च सर्व्वथैव व्याप्यवृत्तिसाध्यके साध्यसाधनभेदेन व्याप्तिभेदादिति वदन्ति । प्रतियोग्यसामानाधिकरण्यञ्च प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यं तेन अयं गुणकर्म्मान्यत्वविशिष्टसत्तावान् जातेः भूतत्वमूर्त्तत्वोभयवान् मूर्त्तत्वादित्यादौ नातिव्याप्तिः । न चोभयत्वमेक विशिष्टापरत्वं विशिष्टञ्च केवलादन्यदिति तदभावो मनसि सहजत एव प्रतियोगिव्यधिकरण इति वाच्यम् उभयत्वं हि न विशिष्टत्वादनतिरिक्तं न वा तदवच्छिन्नाभावस्तदवच्छिन्नाभावात् वैशिष्ट्यविरहेऽपि घटत्वपटत्वयोरुभयत्वस्योभयत्वेन तदभावस्य च प्रत्यक्षसिद्धत्वात् न च तत्र व्याप्तिरेवोभयत्वाधिकरणस्य मूर्त्तत्वस्य मनसि सत्त्वादिति वाच्यं तथात्वेऽप्युभयत्वेन रूपेण तत्रासत्त्वात् नात्रोभयमिति प्रतीतेर्द्दुर्व्वारत्वात् । अत्यन्तपदञ्चात्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यस्य अत्यन्ताभावत्वनिरूपकप्रतियोगितायाश्च लाभाय अन्यथा सर्व्वस्यैवाभावस्य स्वसमानाधिकरणाभावान्तरभिन्नत्वात्तद्भेदस्य स्वस्वरूपानतिरिक्ततया प्रतियोग्यसामानाधिकरण्यस्यैव दुर्ल्लभत्वापत्तेः सर्व्वेषामेवाभावानां हेतुसमानाधिकरणात्यन्ताभावत्वनिरूपकप्रतियो-

न्यसमानाधिकरणाभावान्तरात्मकस्य स्वभेदस्य प्रतियोगि-त्वादभावसाध्यकाव्याप्तेश्चेति सम्प्रदायविदः। अथ यदा गोत्वं तदा गौरित्यत्रातिव्याप्तिः प्रलयस्य गोध्वंसवत्त्वेन गवात्यन्ताभावानधिकरणत्वात् संसर्गाभावमात्रोक्तावपि यदा स्पन्द स्तदा द्व्यणुकं यदा अदृष्टं तदा जन्यं ज्ञानं दुःखं वा यदा तस्यादृष्टं तदा तदीयं ज्ञानमित्यादावति-व्याप्तिः द्व्यणुकत्वादेर्द्व्यणुकादिशून्यखण्डप्रलयादिनिष्ठध्वंस-प्रागभाव प्रतियोगितानवच्छेदकत्वात् न हि तयोः सामा-न्याभावत्ववादिमतेऽपि एकविशेषप्रागभावविशेषान्तरध्वंस-वत्यपि समये सामान्यवच्छिन्नध्वंसप्रागभावयोः सम्भव इति चेन्न प्रतियोगिमत इव ध्वंसादिमतोऽपि कालस्यात्यन्ता-भाववत्त्वेऽविरोधात् अन्यथा अत्यन्ताभावस्य कालमात्रावृत्ति-त्वप्रसङ्गात्। इयांस्तु विशेषो यदेकस्य देशभेदावच्छिन्नं तथात्वमपरस्य तु स्वरूपावच्छिन्नमिति देशे कालस्येव कालेऽपि देशस्यावच्छेदकत्वात् तच्छून्ये च काले तदभावस्य प्रतियोगिव्यधिकरणत्वात्। न च संसर्गाभावविशेषोऽत्यन्ता-भावः संसर्गाभावत्वञ्च संसर्गारोपजन्यप्रतीतिविषयाभावत्वरूपं जन्यताघटकनियमघटितमिति वाच्यम् तद्वदन्या वृत्तित्वरूप-नियमस्य तत्र घटकत्वात् एवं नियमान्तरस्यात्र प्रवेशेऽपि न क्षतिरित्याहुः। वक्ष्यते च नियमाघटितमेव संसर्गा-

भावादिलक्षणम् अनुपदमेव च विवेचयिष्यते संसर्गाभाव-त्वप्रवेशे प्रयोजनविरहोऽव्याप्तिश्च । अथ ज्ञानवान् द्रव्यत्वात् विशेषगुणवान् मनोऽन्यद्रव्यत्वात् जातिमान् भावत्वादित्यादौ समवायेन ज्ञानादेः साध्यतायामतिव्याप्तिः साध्यशून्यानामपि हेतुमतां विषयत्वविशेषणत्वै कार्थसमवायौ साध्यवत्त्वादिति चेन्नैवम् प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिनो यदधिकरणं सम्बन्धि वा तद्वृत्तित्वाभावस्योक्तत्वात् भवति चैव मन्योन्याभावोऽपि प्रतियोग्यसमानाधिकरणः तद्विशिष्टस्य च हेत्वधिकरणवृत्तित्वं वाच्यं तेन नाव्याप्यवृत्तिसाध्यकासंग्रहः तद्वृत्तिभिन्नत्वन्तु नार्थः अव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिप्रसङ्गात् । अत्र सामानाधिकरण्यवतो न तदभाववत्त्वं प्रतीतेरन्यथैवोपपादितत्वादित्यस्वरसात् प्रतियोगिवैयधिकरण्येत्यादिविशेषणं वक्ष्यति तच्च हेत्वधिकरणे बोध्यं प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावेति पुनरभावान्तार्थनिष्कर्षः । ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचित्तत्सामान्यस्य प्रतियोगितावच्छेदकयत्किञ्चिदवच्छिन्नस्य वा अनधिकरणमुक्तम् आद्ये अव्याप्यवृत्तिसाध्यकाव्याप्तिः एकप्रतियोग्यधिकरणस्यापि तद्व्यक्त्यन्तरानधिकरणत्वात् द्वितीये संयोगसामान्याभाववान् द्रव्यत्वाभाववान् वा सत्त्वादित्यादावतिव्याप्तिः साध्याभाववती द्रव्यस्य तत्प्रतियो-

गिसंयोगविशेषाभाववत्वात् नित्यत्वादिविशिष्टद्रव्यत्वाभावात्मकतत्प्रतियोगिनोऽधिकरणत्वाच्च स्वाभावाभावात्मकस्य विशिष्टस्यापि द्रव्यत्वस्य द्रव्यत्वानतिरेकात् तृतीये कपिसंयोगाभाववान् आत्मत्वादित्यादावव्याप्तिः साध्याभावानां कपिसंयोगानां गुणानामधिकरणस्यात्मनस्तत्प्रतियोगितावच्छेदकगुणसामान्याभावत्वावच्छिन्नानधिकरणत्वात् मेवम् यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतः तदनवच्छेदकत्वस्योक्तत्वात्। अत्र च ग्राह्यसामानाधिकरण्ये हेतोर्यादृशः सम्बन्धः प्रविष्टस्तेन सम्बन्धेन यो हेतुमान् तत्र वर्त्तमानत्वमभावस्य साध्यस्य च यादृशः सम्बन्धः प्रविष्टस्तत्सम्बन्धावच्छिन्नायाश्च प्रतियोगिताया अनवच्छेदकत्वं बोध्यं तेन धूमसमवायिनिष्ठाभावस्य संयोगावच्छिन्नप्रतियोगिताया धूमसंयोगिनिष्ठाभावस्य च समवायावच्छिन्नप्रतियोगिताया अवच्छेदकत्वेऽपि वह्नित्वस्य न क्षतिः। यद्वा साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धित्वं हेतुमतो वक्तव्यम् तथा च सम्बन्धभेदेन प्रतियोगिता न विशेषणीया एवं स्थिते सामानाधिकरण्यादौ सम्बन्धित्वं निवेशनीयं नत्वधिकरणत्वं तथा च धर्म्मिणोऽपि व्याप्यत्वं व्यापकत्वञ्च निर्वहति तथा हि तादात्म्येन सम्बन्धेन धूमवतः सम्बन्धिनि महानसे वर्त्तमानो योऽन्योन्याभावस्तस्य तादात्म्यसम्बन्धावच्छिन्ना

या प्रतियोगिता तदनवच्छेदकवह्निमत्त्वावच्छिन्नस्य वह्नि-मतस्तादात्म्येन सम्बन्धिनि महानसे धूमवतस्तादात्म्येन सम्बन्धित्वम् एवं धर्म्मिणोधर्म्मव्याप्यत्वव्यापकत्वे बोध्ये अत-एव जलादीनां पृथिवीत्वाभावव्याप्यत्वं तत्र ततोक्तं सङ्गच्छते। यथाच यादृशेन सम्बन्धेन हेतोर्व्याप्यता गृहीता तादृशेन सम्बन्धेन तस्य पक्षविशिष्टत्वज्ञाने यादृशेन सम्बन्धेन च साध्यस्य व्यापकत्वमवगतं तादृशेनैव साध्यपक्षयो-र्विशिष्टानुमितिः तेन न धूमावयवे संयोगेन न वा समवायेन पर्वते वह्निधीः तथैवावगतव्यापकताघटकसम्बन्धेन व्यापक-स्याभावग्रहे गृहीतव्याप्यताघटकसम्बन्धेन व्याप्यस्याभावः सिध्यतीति कथमन्यथा समवायेन वह्निविरहिणि महानसे संयोगेन संयोगेन वा वह्निविरहिणि स्वावयवे धूमः समवायेन न निवर्त्तते निवर्त्तते च संयोगेन वह्निविरहिणि स्वावयवे संयोगिनेति नियम उपपद्यते तथा च तादात्म्यसम्बन्धेन जला-दीनां व्याप्यत्वग्रहाद्व्यापकनिवृत्त्या तादात्म्येनैव तेषामभावः सिध्यति स एव चान्योन्याभावः। इत्थमेव च तादात्म्याद्-वृत्तिधर्मिंणयोर्व्याप्तिनिश्चय इति सङ्गच्छते अतएव गोत्वत्वाद्य-ग्रहदशायां यत्र सास्नादिः सा गौरिति तादात्म्येन गोर्व्या-पकत्वग्रहे सास्नादिना तादात्म्येन गौः तादात्म्येन गोर्व्यति-रेकाच्च सास्नादिव्यतिरेकः सिध्यति एवञ्च संयोगेन गग-

नादेरपि द्रव्यत्वव्याप्यत्वं वृत्त्यनियामकसंयोगमात्रस्याभाव-प्रतियोगितावच्छेदकसम्बन्धरूपत्वे साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धित्वाभिधाने वा पृथिवीत्वादिव्यापकत्वमपि तदभाववतोऽपि पृथिव्यादेः संयोगेन तत्सम्बन्धित्वात् सिद्धिरपि तस्य तथैव न तु वृत्तिनियामकसम्बन्धेन तेना-सम्बन्धित्वादव्यापकत्वाच्च व्यक्तीभविष्यति चैतदुपरिष्टात्। नन्वष्टद्रव्यातिरिक्तद्रव्यात्मककालमात्रवृत्तिधर्म्मस्य विशेषण-ताविशेषेणाव्याप्यवृत्ति किमपि व्यापकं न स्यात् स्वावच्छे-दकसम्बन्धेन प्रतियोगिनोऽसम्बन्धिनि काले वर्त्तमानस्या-भावस्य प्रतियोगितायां तत्सम्बन्धावच्छिन्नत्वस्य तेन सम्ब-न्धेन यत्प्रतियोगिसम्बन्धितदन्यत्वस्य च कालेऽसम्भवात्। न च तादृशसम्बन्धेन हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यवृत्ति-प्रतियोगितावच्छेदक विशिष्टप्रतियोगिसामान्यकत्वमेव व-क्तव्यं तथा चावृत्तिगगनाद्यभावद्वारिकैव तत्सिद्धिः सत्ताद्यधि-करणकर्म्मादौ समवायेन ज्ञानसामान्यस्य संयोगसामान्यस्य चावृत्तेर्नातिप्रसङ्गः भूतत्वमूर्त्तत्वोभयत्वविशिष्टगुणकर्म्मा-न्यत्व विशिष्टसत्तात्वविशिष्टसत्त्वादिकन्तु न मनोगुणादिवृत्ति संयोगसामान्यन्तु न किञ्चिद्द्रव्यावृत्तीति वाच्यं विशिष्टस्या-नतिरिक्तत्वात् समवायेन जातेः साध्यत्वे मेयत्वादावतिव्याप्तिः जातिमन्निष्ठतादृशाभावप्रतियोगिताया जातित्वेनानवच्छे-

दात् जातिशून्ये च तादृशसम्बन्धेन वृत्तेरप्रसिद्धेः संयोगादिसाध्यकगुणकर्म्मान्यत्वादौ चातिव्याप्तिः अद्रव्ये हेतुमति तादृशसम्बन्धेन वृत्तेरप्रसिद्धेः द्रव्ये च संयोगादेरपि वृत्तेः मैवम् साध्यतावच्छेदकसम्बन्धसामान्ये निरुक्तप्रतियोगिप्रतियोगिकत्वहेत्वधिकरणीभूत यत्किञ्चिद्व्यक्त्यनुयोगिकत्वसामान्योभयाभावस्य विवक्षितत्वात् । धूमसंयोगे वह्न्यधिकरणायोगोलकानुयोगित्वस्य चैतान्यत्वविशिष्टैतद्दण्डसंयोगे एतद्दण्डाधिकरणचैत्रानुयोगिकत्वस्य गुणकर्म्मान्यत्वविशिष्टसत्तासमवाये च जात्यधिकरणगुणानुयोगिकत्वस्य विरहान्नातिप्रसङ्गः स्वरूपसम्बन्धेन गगनादेर्वृत्तिमत्त्वे तु निरुक्तप्रतियोग्यनधिकरणहेतुमन्निष्ठाभाव प्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नत्वयद्धर्म्मावच्छिन्नत्वोभयाभावस्तेन सम्बन्धेन तद्धर्म्मावच्छिन्नस्य व्यापकत्वं बोध्यम् । समवायसम्बन्धेन मेयसामान्याभावस्य सामान्यादौ सत्त्वान्मेयत्वादेरप्यभावप्रतियोगितावच्छेदकत्वं सुलभम् अतएव समवायस्यैकत्वेन द्रव्यत्वादिप्रतियोगिकत्वगुणाद्यनुयोगित्वोभयसत्त्वेऽपि द्रव्यं जातेरित्यादौ वह्निधूमोभयवान् वह्नेरित्यादौ संयोगस्य द्वित्वावच्छिन्नप्रतियोगिकत्वविरहेऽपि च नातिव्याप्तिरित्यपि वदन्ति । प्रतियोगित्वादिश्च स्वरूपसम्बन्धविशेषो न सम्बन्धत्वेन निविष्टः सामानाधिकरण्येऽपि स-

म्बन्धः संयोगत्वादिनैव निविशते दर्शितञ्च नियमाघटितमपि सम्बन्धत्वम्। अभावत्वञ्चेदमिह नास्तीदमिदं न भवतीति प्रतीतिनियामकोभावाभावसाधारणः स्वरूपसम्बन्धविशेषः अतो नाभावसाध्यकव्यभिचारिण्यतिप्रसङ्गः तदपि वा नोपादेयं प्रयोजनविरहात् विषयतातत्त्वादिवत् प्रतियोगित्वाधिकरणत्वतत्त्वसम्बन्धत्वादयोऽप्यतिरिक्ता एव पदार्था इत्येकदेशिनः।

नन्ववच्छेदकत्वमिह न स्वरूपसम्बन्धविशेषः सम्भवति च लघौ धर्मे गुरौ तदभावात् प्रमेयधूमत्वकम्बुग्रीवादिमत्त्वघ्राणग्राह्यगुणत्वादेरतथात्वेन तेन रूपेण साध्यतायां व्यभिचारिण्यतिप्रसङ्गात् नाप्यनतिरिक्तवृत्तित्वं प्रतियोगितायाः स्वरूपसम्बन्धात्मिकायाः प्रतिव्यक्तिभिन्नत्वेन धूमत्वादेरपि तदतिरिक्तवृत्तित्वात्। न च तथाविधयत्किञ्चिदेकाभावप्रतियोगितासामान्यशून्यावृत्तित्वं तत् अतएवातिरिक्तसामान्याभावस्याभावे धूमत्वादेरप्यनवच्छेदकत्वापातादग्रे तत्साधनमपि साधु सङ्गच्छत इति वाच्यं वह्निघटवृत्तित्वद्वित्वतार्णतार्ण दहनवृत्तिद्वित्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रतियोगितानतिरिक्तवृत्तिवह्नित्वादावतिप्रसङ्गात् एतेनान्यूनवृत्तित्वविशेषितमपि परास्तम् अतएव नानाप्रतियोगिवृत्त्येकप्रतियोगिताङ्गीकारेऽपि न निस्तारः लघुरूपसमनियतगुरुरूपेण साध्यतायां

सद्धेतावव्याप्तिः तादृशतदवच्छिन्नत्वाप्रसिद्धेरिति चेन्न प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्य विवक्षितत्वात् । स्वसमानवृत्तिकत्वावच्छेदकं ग्राह्यं तत्त्वञ्च स्वपर्य्याप्त्यधिकरणपर्य्याप्तिवृत्तिकत्वं यावत्त्वादिकन्तु न तथा पर्य्याप्तिश्चायमेकोघट इमौ द्वाविति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेष एव त्रित्वादिकमपि न द्वित्वादिसमानवृत्तिकमिति द्वित्वादिना साध्यतायां नाव्याप्तिः घटकत्वावच्छेदकत्वं स्वरूपसम्बन्धविशेष एवञ्च यद्धर्म्मावच्छिन्नेत्यत्र यद्धर्म्मान्यूनवृत्तिधर्म्मावच्छिन्नेति वक्तव्यं तेनोक्ता व्याप्तिनिरासः । वस्तुतस्तु तदवच्छिन्नप्रतियोगिताकाभाववदसम्बद्धस्वविशिष्टसामान्यकत्वं स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतत्कत्वं वा तदनतिरिक्तवृत्तित्वं वक्तव्यम् अतएव सत्तावान् जातेरित्यादौ जातिमन्निष्ठाभावप्रतियोगितावच्छेदकगुणान्यत्वविशिष्टसत्तात्वतुल्यवृत्तिकत्वेऽपि सत्तात्वस्य न क्षतिः एवं स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं बोध्यं तादृशप्रतियोगिताश्च विशिष्योपादेयाः नातोगुरोरवच्छेदकत्वं विना दुर्वचत्वं प्रतियोगित्वं सम्बन्धित्वञ्च साध्यतावच्छेदकसम्बन्धेन बोध्यमतो न सम्बन्धभेदमादाय दोषः । कालिकविशेषणताविशेषेण च साध्यतायां तादृशप्रतियोगितावच्छेदकत्वमनित्यतत्तद्व्यक्तित्वे प्रसिद्धम् अभावश्च

प्रतियोगिव्यधिकरणो बोध्यः। न च मौलमिदमीयञ्च प्रतियोगिवैयधिकरण्यमनुपादेयं संयोगत्वाद्यवच्छिन्नाभाववति संयोगत्वादिविशिष्टस्य वृत्तेर्गुणादिनिष्ठाभावप्रतियोगितावच्छेदकद्रव्यत्वत्वद्रव्यमात्रसमवेतत्वाद्यवच्छिन्नाभाववति-चावृत्तेरव्याप्त्यतिरव्याप्त्योरनवकाशादिति वाच्यं धूमवान् वह्नेरित्यादावतिव्याप्तेः नह्युत्पत्तिकालावच्छेदेनापि महानसादौ किञ्चित् संयोगेन वर्त्तते येन वह्निमदयोगोलकनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकायोगोलकावृत्तिद्रव्यत्वाद्यवच्छिन्नाभाववदवृत्तित्वं धूमत्वविशिष्टस्य सम्भाव्येत। प्रतियोगितयोरेकसम्बन्धावच्छिन्नत्वस्य विशेषणताविशेषावच्छिन्नत्वस्य वा विवक्षणे पुनरनुपादेयमेव प्रतियोगिवैयधिकरण्यद्वयम् यत्राधिकरणे व्यभिचारस्तदन्यत्वत्वतदन्यत्वप्रकारकप्रमाविषयत्वत्वसाध्यवत्त्वप्रकारकप्रमाविषयत्वत्वादीनां साध्यतावच्छेदकविशिष्टसाध्यवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वाद्धेतुतावच्छेदकविशिष्टहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वाच्चातिव्याप्तेरनवकाशात् तथा च विशेषणताविशेषावच्छिन्न यद्धर्म्मविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं तत्सम्बन्धावच्छिन्नसाधनसमानाधिकरणात्यन्ताभावप्रतियोगिता सामान्ये नास्ति साधने सद्धर्म्मविशिष्टसामानाधिकरण्यं व्याप्तिरिति पर्य्यवसितोऽर्थः

यत्र सद्धेतुविशेषे साध्यतावच्छेदकं न प्रतियोगितावच्छेदकं तत्रैवेयं रीतिरुपादेयेत्यपि वदन्ति । गौरवप्रतिसन्धान दशायामपि कम्बुग्रीवादिमान् नास्तीतिप्रतीतिबलात् गुरुरपि धर्म्मोऽवच्छेदकः प्रतियोगितायाः । नचास्यास्तत्प्रतियोगिकाभावमात्रमवलम्बनं तथाविधयत्किञ्चिद्दृत्तिसत्त्व एव तादृशप्रतीतेरनुदयात् अतएवैकघटवति भूतले कम्बुग्रीवादिमान् नास्तीतिशब्दो न प्रमाणं प्रमाणञ्च घटसामान्यशून्ये न चेदेवं लघुरूपसमनियतानां गुरूणामव्याप्यतापत्तिः गुणादिगुणकर्म्मान्यत्वविशिष्टसत्तादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वनिष्ठायाः प्रतियोगिताया लाघवेन द्रव्यादिनिष्ठाभावप्रतियोगितावच्छेदकत्वत्वेनैवावच्छेदात् तत्तदवच्छेदकत्वे व्यक्तीनाञ्च प्रातिस्विकरूपेणाभावानां युगपच्छतेणापि ज्ञातुमशक्यत्वात् एवं द्रव्यत्वत्वादिविशिष्टद्रव्यत्वादेरव्याप्यत्वप्रसङ्गोऽप्यनुसन्धेयः उपदर्शितप्रकाराणामपि स्वत्वादिघटितत्वेन दुर्ज्ञेयत्वात् अतएव घ्राणग्राह्यगुणत्वादिना साध्यतायां द्रव्यत्वादेर्व्यभिचारित्वं साधुसङ्गच्छत इत्यपि केचिदिति कृतं पल्लवितेन ।

ननु यएव मिलिता वह्न्यभावा जलह्रदादौ वह्निर्नास्तीतिधियं जनयन्ति तएव प्रत्येकं धूमवति महानसादौ वर्त्तन्ते तत्र च तेषां स्वस्वावच्छेदकतत्तद्वह्नित्वावच्छिन्न-

वैयधिकरण्यनिरूपिकायाः प्रतियोगितायास्तदवच्छेदकमेव वह्नित्वमतोऽव्याप्तिः नचैवं वह्नित्वावच्छिन्नस्य तद्वृत्तित्वान्न तथात्वं तथा सति ह्रदवृत्तिधर्माभावप्रतियोगितावच्छेदकह्रदावृत्तित्वावच्छिन्नस्य वह्निमदयोगोलकवृत्तित्वादतिव्याप्तेः। अथानुगतं रूपं तत्तदभावप्रतियोगितानां नावच्छेदकम् अनवच्छेदकमेव तत्तदभावप्रतियोगितायाः अभावान्तरे मानाभावात्। तथा च तद्रूपावच्छिन्नसाध्यके व्यभिचारिण्यतिव्याप्तिरत आह सामान्येति। संशयान्यथानुपपत्तिं प्रमाणयति अन्यथेति। वायाविति। यद्यप्ययं संशयो न वायुविशेष्यकः तस्य विशेषणत्वेनोल्लेखात् न वा रूपविशेष्यकः तथा सति रूपतदभावयोर्विरोधिनोरकोटितायां प्रकृतानुपयोगप्रसङ्गात् तथापि वायू रूपवान् तदभाववान् वेति रूपतदभावकोटिकसंशये तात्पर्य्यम् अन्यस्तु रूपवत्तदन्योन्याभावकोटिक इति नाभेद इति सम्प्रदायविदः। विरुद्धयोरेकधर्म्मिसंसर्गावगाहिज्ञानमेव संशयो न तु तदुभयप्रकारतापि नियता तथा च रूपतदभावविशेष्यकोवायुविशेषणकोऽसाविति तु नव्याः। वायुवृत्तित्वतदभावकोटिको रूपधर्म्मिक एवायं संशयः अधिकरणे तत्तदभावान्यतरनिश्चयस्यापि तत्राधिकरणवृत्तित्वसंशयविरोधित्वात् अन्यथा भूतले घटतदभावान्यतरनिर्णयेऽपि घटो

भूतलवृत्तिर्नवेति संशयप्रसङ्गादित्यपरे। अथैतावन्त्येव रूपाणीत्यनिर्णयात् यावद्रूपाभावानिर्णये संशयो न विरुध्यत इति चेत् यावद्रूपाभावानिर्णय इत्यस्य यावन्तो रूपाभावास्तेषां यावत्त्वेन रूपेण तेषां यावन्ति रूपाणि तावदभावानां यावद्रूपत्वेन तदभावानां वा अनिर्णय इत्यर्थः। न प्रथमतृतीयौ तथानिर्णीतत्वात् नेतरौ प्रतियोगितदभावयोर्यावत्त्वानुल्लेखेऽपि योग्यानुपलब्ध्या भूतले घटो नास्तीति निश्चयमात्रादेव घटतदभावसंशयोच्छेददर्शनेन तस्याकिञ्चित्करत्वात्। न चातिरिक्तसम्भावनाविरहसहकृत एवाभावनिश्चयस्तत्प्रतिबन्धकः सम्भावना च रूपं पार्थिवादित्रितयभिन्नं न वेत्याकारा निवर्त्तते सेयं रूपत्वावच्छेदेनैतत्त्रितयभिन्नत्वाभावनिश्चयादेवेति वाच्यम् गौरवात् विनापि अतिरिक्तसम्भावनां विशेषाभावनिश्चये सामान्यसंशयदर्शनाच्च। अथाभावस्य सामान्यावच्छिन्नप्रतियोगिताकत्वनिश्चय एव तादृशसंशयविरोधी अन्यथा तवाप्यतिप्रसङ्गात् स च न प्रकृते अभावस्य च यावद्विशेषाभावाधिकरणवृत्तित्वेन विशिष्टस्य तदवच्छेदेन वा सामान्यावच्छिन्नप्रतियोगिताकत्वं सम्भवति चेदं तादृशाभावप्रतियोगिताया अतिरिक्तत्वात् तेन नैकविशेषवतो विशेषान्तराभाववत्त्वेन सामान्याभाववत्त्वप्रसङ्गः। न च प्रतियोगितावच्छेदकभेद-

स्याभावभेदनियामकतया भेदसिद्धिः प्रतियोगिभेदस्य तत्त्वे एकघटप्रतियोगिकस्य प्रागभावादि चतुष्कस्याभेदप्रसङ्गात् अवच्छेदकन्तु भिद्यत एव तत्र क्वचित्तादात्म्यस्य क्वचित्संसर्गस्य क्वचित्पूर्व्वापरकालीनतद्घटत्वादेश्च तथात्वादिति वाच्यं संसर्ग-प्रतियोगिविशेषणसाधारणस्यैकस्यावच्छेदकत्वस्य दुर्वचत्वात् पूर्व्वापरकालीनत्वादेर्ध्वंसादिप्रतियोगितावच्छेदकत्वे मा-नाभावाच्च। किञ्च अवच्छेदकभेदस्याभावभेदनियामकत्वम् न तज्जनकत्वं अत्यन्ताभावादिस्वरूपस्य तस्याजन्यत्वात् नापि तद्व्याप्यत्वमपि वैयधिकरण्यात् अतएव न तद्व्यापकत्वमपि अभेदेऽप्यविरोधाच्च न च तदितरधर्म्मावच्छिन्नप्रतियोगिता-कत्वं तदवच्छिन्नप्रतियोगिताकान्यत्वस्य व्याप्यं मानाभावात् अतएव च समनियतसुखदुःखादितत्तत्संख्यापरिमाणव्य-क्त्यादि नानाधर्म्मावच्छिन्नोऽप्यभिन्न एवाभावः भेदसिद्धिस्तु भाववदभावस्यापि विरुद्धधर्म्माध्यासादेव अतएव गगनादीना-मवृत्तीनां समनियतानां वा धर्म्माणामेक एवात्यन्ताभावः युगपदुत्पन्नविनष्टानां समानदेशानामसति बाधके एक एव ध्वंसः प्रागभावो वेति। व्यधिकरणधर्मावच्छिन्नप्रति-योगिताकोऽपि चेदभावः प्रामाणिकस्तदा तस्यैकस्यैव प्रतियोगिता सर्व्वैरेव व्यधिकरणैर्धर्म्मैः सर्व्वैश्च समाना-समानाधिकरणैः सम्बन्धैरवच्छिद्यन्ताम् आकाशाभाव एव

वा तथास्तामिति मैवम् एवं हि तत्तद्देशकालाद्यवच्छिन्ना-नवच्छिन्नतत्तदधिकरणवृत्तित्वेन विशिष्टस्य तत्तदवच्छेदेन वा एकस्यैवाभावस्य घटपटगोत्वाश्वत्वादिप्रतियोगिताकत्व-सम्भवेन तत्तद्भेदोऽपि विलुप्येत। तत्तत्प्रतियोगिकत्वं तत्त-त्स्वभावो न च तत्राधिकरणवृत्तित्वस्यान्तर्भावोऽवच्छेदकत्व-ञ्चेति समानम्। अतएव सामान्यावच्छिन्नप्रतियोगिताकत्वं व्यासज्यवृत्तीत्यपि प्रयुक्तम् अव्यासज्यवृत्तेस्तत्स्वभावस्य तत्त्वानुपपत्तेरतिरिक्तकल्पने च किमपराद्धमतिरिक्ताभावेन। किञ्च व्यधिकरणयोर्घटपटयोर्द्वित्वप्रतीतिवद्व्यधिकरणानामपि विशेषाभावानां युगपदिन्द्रियसन्निकर्षे सामान्यावच्छिन्नप्र-तियोगिताकत्वप्रत्ययोऽपि स्यात् अपि च रूपान्तरेण सम्बन्ध-विधया वा व्यासज्यवृत्तिधर्म्मस्य ज्ञानेन यावदाश्रयसन्निकर्षा-पेक्षामानाभावात् एवञ्च एकाभावसन्निकर्षेऽपि सामान्यभाव-बुद्धिप्रसङ्गः यादृशे च तस्य ज्ञाने यावदाश्रयाणां सन्निकर्षो-ऽपेक्ष्यते तत्र तेषां तद्भेदस्य च ज्ञानमपि तदज्ञाने तदभेद-ज्ञाने च तदग्रहात् आश्रयभेदभ्रमेण तद्भ्रमदर्शनाच्च न चात्र यावद्विशेषाभावानां प्रथममुपस्थितिः सम्भवति तत्प्रति-योगिनां विशेषतोऽनुपस्थितेरिति दिक्। केचित्तु अनन्त-विशेषाभावानां सामान्यावच्छिन्नप्रतियोगिताकत्वस्य तद्व्या-सज्यवृत्तित्वस्य च कल्पनामपेक्ष्य लाघवात् सामान्यावच्छिन्न-

प्रतियोगिताकत्वेनैक एवाभावः कल्प्यते कल्पनीयशरीरस्योभयत्र तुल्यत्वेऽपि एतदपेक्ष्य तस्य गुरुत्वात् विनिगमनाभावेऽपि च सामान्याभावसिद्धिरप्रत्यूहैव धर्म्मकल्पनातो धर्मिकल्पनाया गुरुत्वं कल्पनीयानेकत्वप्रयुक्तम्। न चातिरिक्ताभावस्य तत्र च सामान्यावच्छिन्नप्रतियोगिताकत्वस्यानन्तवाय्वाद्यधिकरणवृत्तित्वस्य च कल्पनामपेक्ष्य कॢप्तानन्तवाय्वाद्यधिकरणवृत्तित्वानां यावद्विशेषाभावानामेव सामान्यावच्छिन्नप्रतियोगिताकत्वस्य तद्व्यासज्यवृत्तित्वस्य च कल्पनैव लघीयसीति वाच्यम् एवं सत्यभावमात्रासिद्धिप्रसङ्गादित्याहुः।

यद्वेत्यादि। अथात्र नानाव्यक्तिरूपादिसाध्यकैकव्यक्तिपृथिवीत्वादावव्याप्तिः न च तत्र रूपवत्त्वादिकमेव साध्यं तच्च परम्परासम्बन्धेन रूपत्वादिकमेव तेन च सम्बन्धेन न तदभावः पृथिव्यादाविति वाच्यं रूपादेरसाध्यतापत्तेः द्रव्यान्यत्वादिविशिष्टसत्त्वाद्यभावस्य द्रव्यादिवृत्तित्वात् सत्त्वादिसाध्यकद्रव्यत्वादावव्याप्तेश्च अन्यथा विशिष्टतया सत्तादेः साध्यत्वे व्यभिचारिणि जातिमत्त्वादावतिप्रसङ्गात्। व्युत्पादयिष्यते च विशिष्टाभावस्य विशेष्यप्रतियोगिकत्वं द्वित्वाद्यवच्छिन्नसाध्याभावस्य तत्र सत्त्वाच्च। अथाप्रतियोगित्वं प्रतियोगित्वाभावः स च येन रूपेण तद्रूपावच्छिन्नव्याप्यत्वं हेतौ अस्ति चायं रूपादौ रूपत्वादिना न पृथिव्यादिनिष्ठा-

भावप्रतियोगित्वमिति प्रत्ययादिति चेन्न तादृशप्रतीत्यादिरूपत्वादौ प्रतियोगिताया अवच्छेदकत्वाभावो गम्यते न तु तदभावावच्छेदकत्वं सर्वत्रैव रूपे पृथिवीनिष्ठाभावप्रतियोगित्वं न तु कुत्रापि रूपे तदभाव इत्यबाधितप्रत्ययात् अन्यथा यो यो धर्मो यस्य यस्य नावच्छेदकः तत्तदवच्छेदेन तत्तदभावोऽप्युक्तरीत्या सिध्येत्। प्रमेयधूमत्वेन न वह्निमन्निष्ठाभावप्रतियोगित्वमिति प्रत्ययात्तदवच्छेदेन तादृशप्रतियोगित्वाभावस्यापि सुवचत्वात्। अथ प्रमेयधूमत्वं न गौरवेण सामानाधिकरण्यप्रतियोगितावच्छेदकं विवक्षितत्वात् तथेति चेत् असमानाधिकरणधूमकव्यक्तिवृत्तितया वह्नित्वमपि न तदवच्छेदकं कम्बुग्रीवादिमत्त्वादिना च घटादेरसाध्यतापत्तिरिति बहुव्याकोपश्च। अतएव प्रमेयधूमत्वं गौरवेण प्रतियोगिताया इव तच्छून्यताया अपि नावच्छेदकमित्युक्तावपि न निस्तारः। अत्र वदन्ति अप्रतियोगित्वं प्रतियोगितानवच्छेदकधर्मवत्त्वं न चैवं पूर्वस्मादभेदः तत्र साध्यजातीयसमानाधिकरणसाधनजातीयत्वस्य अत्र च साध्यसाधनयोः सामानाधिकरण्यस्य व्याप्तित्वे तात्पर्य्यात् घटकयोस्तादृशप्रतियोगितावच्छेदकतत्त्वान्योऽन्याभावात्यन्ताभावयोर्भेदेन भेद इत्यपि कश्चित्।

अत्यन्ताभावगर्भत्वसामान्यविशेषभेदेनान्योऽन्याभावगर्भमपि व्याप्तिद्वयमाह यत्समानाधिकरणेत्यादिलक्षणद्वयेन

प्रथमे एकस्य साध्याधिकरणांशस्याधिक्यात् द्वितीयलक्षणम् अत्र यद्यपि नानाव्यक्तिसाध्यकस्थले तत्तत्साध्यवतस्तत्तत्साध्यवत्त्वस्य च साधनसमानाधिकरणान्योऽन्याभावप्रतियोगित्वा-तद्वच्छेदकत्वाच्चाव्याप्तिः तथापि यद्रूपावच्छिन्नवत्त्वं तादृशान्योऽन्याभावप्रतियोगितानवच्छेदकं तद्रूपावच्छिन्न-सामानाधिकरण्यमित्यत्र तात्पर्य्यम् वह्न्यादौ तत्संयोगादौ तद्दादौ वा साध्ये सर्वत्र साक्षात्परम्परया वा अनुगमकं वह्नित्वादिकमेव साध्यतावच्छेदकं तदवच्छिन्नवत्त्वस्य च न तादृशान्योऽन्याभावप्रतियोगितावच्छेदकत्वमिति यत् यद्रूपावच्छिन्नं यादृशरूपावच्छिन्नमनवच्छेदकमिति वा यथा-यथं वक्तव्यं शब्देकस्यानुपादेयत्वात्। अन्येत्यादि। यद्य-प्युक्तरीत्या सर्वत्र तादृशप्रतियोगितानवच्छेदकत्वपर्य्यन्तानु-धावनस्यावश्यकत्वेनाकिञ्चित्करमेव तादृशाभावप्रतियोगित्वं तथापि विशिष्टसामानाधिकरण्यरूपाया व्याप्तेर्व्यधिकरणा-सम्भवित्वमात्रे तात्पर्य्यं व्याप्तिरेवेत्यस्य कालिकेत्यादि अन्योऽन्याभावगर्भलक्षणस्याव्याप्यवृत्तिसाध्यकसङ्केतावव्याप्ति-निरस्यति न चेति। अभेदस्येति। तथा च मूले महीरुहो विहङ्गमसंयोगी नेति प्रतीतेरनुभूयमानविशिष्टभेदोल्लेखिन्या अपि शिखी विनष्ट इति प्रतीतिवद्विशेषणाभावविषयता-मात्रं कल्पयति बाधकबलात् यत्र च विशिष्टभेदेन बाधकं तत्र तथाप्रतीति बलात्तत्सिद्धिरप्रत्यूहैवेति नातिप्रसङ्गः।

अत्र वदन्ति। अभेदस्य भेदाभावस्य ज्ञानं न बाधकं भेदवत्तत् प्रतियोगितावच्छेदकस्य संयोगात्मनस्तदभावस्याव्याप्यवृत्तित्वेन तदुपपत्तेः यथा हि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञाने तदत्यन्ताभावस्याग्रहादभावव्यवहाराच्च स एव तदभाव इति कल्प्यते तथाप्रतियोगितावच्छेदकधर्म्मग्रहे तद्वदन्योऽन्याभावस्याग्रहादभावव्यवहाराच्च स एव तस्याभाव इति निश्चीयते आधिक्येऽपि चाव्याप्यवृत्तित्वात् अतएव न मूलावच्छेदेन कपिसंयोगिभेदाभावज्ञानं तथा असम्भवादसिद्धेश्च नापि कपिसंयोगिभेदस्य वृक्षावृत्तित्वज्ञानमसिद्धेः तद्वृत्तित्वस्यैव ग्रहात् नापि कपिसंयोगिभिन्नभेदज्ञानं कपिसंयोगिभेदवत्तद्भेदस्याप्यव्याप्यवृत्तित्वेनाविरोधात् नापि मूलावच्छेदेन तज्ज्ञानमसिद्धेः तद्धर्म्मवद्भिन्नभेदस्य तद्धर्म्ममात्रपर्य्यवसिततया कपिसंयोगिभिन्नभेदात्मनः कपिसंयोगस्य मूलवृत्तित्वे विरोधाच्च न हि घटभिन्नभेदो घटत्वादतिरिच्यते आवश्यकक्लृप्तघटत्वेनैवोपपत्तौ अतिरिक्तकल्पनायां मानाभावात् अन्यथा सर्वत्राभावस्याभावोऽतिरिक्त एव कल्प्येत अतएवात्यन्ताभावप्रतियोगिनोरन्योऽन्याभावप्रतियोगितावच्छेदकयोः सामान्यत एव क्लृप्तो विरोधः तत्र कपिसंयोगवत्यपि वृक्षे मूले न कपिसंयोग इति प्रतीतेरन्यथानुपपत्त्या तावदाद्ययोः स सङ्कोच्यतां न ह्येषा प्रतीतिः कपिसंयोगिभेदविषयत्वेनोप-

पादयितुं शक्या नियमतः संयोगवत्त्वेन प्रतियोगिनोऽनुपस्थितेः प्रतियोगिकोटौ तदनुल्लेखाच्च मूले न कपिसंयोगीति प्रतीतिस्तु शिखी विनष्ट इति वद्वासमानविशेषणस्याभावमात्रविषयत्वेनोपपन्नत्वान्नान्तिमयोरपीति पराक्रम्। अन्योऽन्याभावान्तरस्य प्रतियोगितावच्छेदकान्तरसमानाधिकरणतया स्वस्वप्रतियोगितावच्छेदकासामानाधिकरण्यपर्य्यवसायिनो विरोधस्य स्वत्वघटितत्वेन विशेष एव विश्रामात् अत्यन्ताभावप्रतियोगिनोरिवान्योऽन्याभावप्रतियोगितावच्छेदकयोरबाधितसामानाधिकरण्यानुभवेन प्रतिविरुद्धतया तथाविधविरोधकल्पनाया अनवकाशाच्च। किञ्च शिखी विनष्ट इति प्रतीतेर्विशिष्टध्वंसोल्लेखिन्या विशिष्ये तद्बाधादास्तां विशेषणध्वंसविषयता न संयोगीति प्रतीतेर्विशिष्टभेदमवगाहमानायाः कथं विशेषणसंसर्गाभावविषयत्वेनोपपत्तिः न खलु सहस्रेणापि बाधकैरिदं रजतमिति प्रतीते रङ्गत्वावलम्बनं व्यपस्थापयितुं शक्यते न च विशेषणभेद एव तस्या विषयः अग्रेऽपि न कपिसंयोगीति प्रतीत्यापत्तेः युज्यते चान्योऽन्याभावोऽव्याप्यवृत्तिः कथमन्यथा पक्वतादशायां घटादावयं न श्यामो दण्डादिविश्लेषसमये चैत्रादौ नायं तद्दण्डवानित्यादयो व्यवहाराः न च तत्र विशेषणसंसर्गाभाव एव प्रतीयते अनुयोगिनि सप्तमीं विना तदनुपपत्तेः न खलु भूतलं न घट इत्यादीनि वाक्यानि कदाचि-

दपि घटसंसर्गाभावं बोधयन्ति तथात्वे वा घटो न घट इत्यादेरपि प्रसङ्गात् अपि च विशिष्टवाचकदण्डयादि-पदेभ्योधर्म्युपसर्ज्जनतयोपस्थितस्य दण्डादेः कथं प्रति-योगित्वेनाभावेऽन्वयः इतरविशेषणत्वेनोपस्थितस्य निराका-ङ्क्षतयान्यत्र विशेषणत्वेनान्वयायोगात् न चात्र विशिष्टोप-स्थापकं पदं विशेषणमात्रपरं तथापि चैत्रो न दण्डी घटो न श्यामं रूपमित्यादावपि दण्डादिसंसर्गाभावप्रतीत्यापत्तेर्दु-र्व्वारत्वात् एतेन नञोऽभाववल्लाक्षणिकतया विनैव सप्तमी-मन्वयबोधसमर्थनं प्रत्युक्तम् एवञ्च चैत्रो न पचतीत्यादौ आख्यातांशस्य लक्षणयावोपस्थितस्य कर्त्तुरेव भेदोभासत इत्यस्तु वस्तुतो न पचति चैत्रो नेदं मैत्रस्येत्यादौ विभक्त्यर्थस्य कृतिसम्बन्धादेरभावान्वयबोधे नञा सप्तमी नापेक्ष्यते अपे-क्ष्यते च प्रातिपदिकार्थस्येति निपुणतरमुपपादयिष्यामः । नञो वैधर्म्म्यपरतया न श्याम इत्यादेः श्यामादिविधर्म्मेत्यर्थः वैधर्म्यञ्च रक्तत्वादिकमेव यदाहुराचार्य्याः श्यामाद्रक्तो विधर्म्मा न तु पृथगित्यपि वदन्तीति कृतं पल्लवितेन ।

सम्बन्धत्वेनेति निरूपिततत्त्वमेतत् । कस्येति इत्थञ्चा-ननुगताया अपि व्याप्तेर्ज्ञानं यथानुमिति हेतुस्तथा वक्ष्यते । एते अन्योऽन्याभावात्यन्ताभावगर्भे । तादृशेति । ननु किं द्वित्वादिकं प्रतियोगितावच्छेदकमेव न भवति किं वा भव-त्येव परन्तु कृप्तानामेव स्वसमानाधिकरणतत्तद्धर्म्मावच्छिन्न-

प्रतियोगिताकानामभावानां लाघवादित्यभिप्रायः नाद्यः एकैकाभावप्रतीतितो द्वौ न स्त इति प्रतीतेर्विलक्षणत्वात् शब्दादिना द्वौ न स्त इति निश्चयेऽप्येकैकाभावसंशयाच्च विषयानुगमं विना अनुगताकारप्रत्ययायोगात्। न चाभावस्य द्वित्वाधिकरणप्रतियोगिकत्वमात्रं द्वित्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वं वा द्वयं नास्तीति प्रतीतेर्विषयः तादृशद्वित्वाधिकरणव्यक्तिविशेषविरहिणि यथाविधौ भयशालिनि तादृशौ द्वौ न स्त इत्यप्रत्ययात् द्वित्व सामानाधिकरण्याभानेऽपि प्रतीतेरनुगताकारत्वाच्च अतएव न तादृश प्रतीतेर्घटत्वपटत्वाद्यन्यतरावच्छिन्नप्रतियोगिताकाभावविषयत्वम् अन्यतरत्वानुल्लेखेऽपि घटपटौ न स्त इत्यनुगतप्रत्ययाच्च न च परम्परासम्बन्धेन तादृशद्वित्वसामान्याभावएव द्वौ न स्त इति प्रतीतेर्विषयः द्वित्वाधिकरणयोरेव प्रतियोगित्वोल्लेखात् द्वित्वादेर्घटादिवृत्तित्वानुपस्थितावपि अन्ततः शब्देनापि घटपटौ न स्त इत्यादिप्रत्ययाच्च अतएवैकैकविशिष्टापराभावोऽपि न तदालम्बनं विरुद्धयोरपि जलत्वपृथिवीत्वयोर्द्वित्वेनाभावप्रत्यय इत्युक्तत्वाच्च। नान्यः तथात्वेऽपि साध्यतद्वतोस्तादृशाभाव-प्रतियोगित्वानपायात् अन्तरेणाभावान्तरमेकैकघटवति जायमानाया यत्किञ्चिद्घटद्वयवति चानुत्पद्यमानाया घटौ न स्त इति प्रतीतेरुपपादयितुमशक्यत्वादित्यत आह अभ्युपगमेदेति। उभयत्वमेव प्रतियोगि-

तावच्छेदकं न तु साध्यतावच्छेदकं साध्यवत्त्वं वेत्यर्थः अश्रूयमाणावच्छेदकत्वांशेऽपि लक्षणे तथैव विवक्षितमिति भावः । तच्चेति स्वं साधनत्वाभिमतं तथा च साधनसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदका यावन्तो धर्म्मा यद्धर्म्मावच्छिन्न-समानाधि-करणात्यन्ताभाव-प्रतियोगितावच्छेदकाः तद्धर्म्मावलीढ़सामानाधिकरण्यमित्यर्थः एतेन सर्व्वत्र तादृशैर्यावद्भिरवच्छिन्नस्य तादृशावच्छिन्नयावत्प्रतियोगिकस्य चातिप्रसञ्जकात् यावत्त्वाद्यवच्छिन्नप्रतियोगिताकादतिरिक्तस्याभावस्याप्रसिद्धिः तादृशावच्छिन्नप्रतियोगिताकानां यावदभावानामधिकरणस्य प्रायशस्तथा रूपादि साध्यकपृथिवीत्वादावव्याप्तिश्च क्वापि रूपादिव्यक्तौ तादृशयावदभावसामानाधिकरण्यासम्भवादिति प्रत्युक्तम् । सर्व्वत्र सोपाधावेकव्यक्तिकस्य सम्भवतोऽप्युपाधेर्द्धर्म्मान्तरविशिष्टत्वादिना अभावो भवत्येव साध्यसमानाधिकरण इत्यवच्छेदकानुसरणम् । साधनसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताका यावन्तोऽभावा यद्धर्म्मावच्छिन्नसमानाधिकरणास्तद्धर्म्मावलीढ़सामानाधिकरण्यमित्यर्थः । अभावश्चात्र भावभिन्नो ग्राह्यस्तेन इदं जलं स्नेहवत्त्वादित्यादौ स्नेहवत्त्वसमानाधिकरणात्यन्ताभाव-प्रतियोगितावच्छेदकरूपसामान्या-भावत्वावच्छिन्नप्रतियोगिताकाभावानां सकलरूपाणां जलत्वसामानाधिकरण्यविरहेऽपि नाव्याप्तिः । घटध्वंसोध्वंसत्वादित्यादौ

च घटध्वंसत्वादेस्तत् प्रकारकप्रमाविशेष्यत्वादेर्वा भावाभाववृत्तिरतिरिक्तोऽभावस्तादृशो न घटध्वंसत्वादिसमानाधिकरण इति नातिव्याप्तिरित्यपि वदन्ति। यावदिति स्वं व्यभिचारियेषां तेषां यावतां व्यभिचारिणा साध्येन सामानाधिकरण्यमित्यर्थः। यावदिति यत्पदं साध्यत्वाभिमतपरं सोपाधिवारणाय यावदिति सुमसप्तमीकस्य द्वितीयात्यन्ताभावस्य विशेषणम्। तथा च साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकात्यन्ताभावत्वव्यापकस्वसामानाधिकरण्यसामान्याभावकत्वमर्थः। केवलान्वयिस्थले त्वाकाशादिरेव तथाविधोऽभावः प्रसिद्ध इति सम्प्रदायः। केचित्तु तादृशयावदभावशून्यत्वं यदधिकरणताया व्यापकं तत्त्वमर्थः। न च तादृशप्रतियोगितानवच्छेदकवत्त्वमेव यावत्त्वेन विशिष्य यावत्तादृशाश्रयत्वं यदधिकरणताया व्यापकं तत्त्वमित्यर्थलाभादेव सामञ्जस्ये ऽभावद्वयोपादानमनतिप्रयोजनकमिति वाच्यं यावतां तादृशामिन्धनादीनामेकाधिकरण्यस्याप्रसिद्धेः नचावच्छेदकांशमपहायाप्रतियोगित्वेन यावत्त्वेन विशिष्यतां साध्यव्यापकस्यापि रूपान्तरेण साध्यसमानाधिकरणात्यन्ताभावप्रतियोगित्वस्योपदर्शितत्वादित्याहुः। साध्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदके यावति यत्सामानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वं नास्ति तत्त्वमर्थ इति तु नव्याः। अवच्छिन्नं सामानाधिकरण्यं सामानाधिकर-

ण्यावच्छेदकरूपं वा व्याप्तिः द्रव्यञ्च धूमत्वद्रव्यत्वत्वादेर्व्याप्यतावच्छेदकत्वं दण्डत्वादेर्नियतपूर्ववर्त्तितावच्छेदकधर्म्मात्मककारणतावच्छेदकत्ववदभेदेऽप्युपहितानुपहितभेदाद्वा समर्थनीयं तत्राद्यमभिप्रेत्याह यत्सम्बन्धितेति सा सम्बन्धिता सामानाधिकरण्यरूपा जनकत्वादिव्यावृत्ता अत्र च विशिष्टसत्तात्वाद्यवच्छिन्नगुणादिसामानाधिकरण्याधिकरणसत्त्वादेः कर्म्मादौ परामर्शात्रणाद्यनुमित्यापत्तेः साध्यसामानाधिकरण्यविशिष्टहेतुमत्तापरामर्शस्तु पक्षे साध्यनिर्णयात् प्रागसम्भवीत्यनुशये न द्वितीयम् अयमालोको धूमोवेत्यादौ विशिष्यसन्देहेऽपि सामान्यतोऽवच्छेदकरूपवत्त्वनिर्णयः सम्भवत्येवेति हृदयम् । अत्रावच्छेदकत्वं नान्यूनवृत्तित्वम् अन्यूनानतिरिक्तवृत्तित्वं वा वह्न्यादौ साध्ये मेयत्वादावतिप्रसङ्गात् धूमत्वादावप्रसङ्गाच्च किन्त्वनतिरिक्तवृत्तित्वं तच्च यद्यपि न तदभाववदवृत्तित्वं गुणवान् सत्त्वादित्यत्र सत्तात्वेऽतिप्रसङ्गात् न च कर्म्मादिवृत्तित्वावच्छेदेन गुणसामानाधिकरण्याभाववत्यां सत्तायां वर्त्तमानत्वान्न तथा तथा सति विशिष्टसत्तात्वे प्रागुपदर्शितदिशा च धूमत्वादावव्याप्तिप्रसङ्गात् तथापि अतिरिक्ते यद्धर्म्मविशिष्टहेत्वधिकरणवृत्तित्वं न वर्त्तते तत्त्वं साध्यासमानाधिकरणावृत्तित्वविशिष्टाधिकरणवृत्तित्वसामान्यकत्वं स्वविशिष्टाधिकरणावृत्ति-यावत्साध्या-समानाधिकरणकत्वमिति तु फलितार्थः । सत्तात्वविशिष्टसत्ताधिकरण-

कर्म्मादिवृत्तित्वस्य साध्यासमानाधिकरणे कर्म्मत्वादौ सत्त्वान्नातिप्रसङ्गः कर्म्माद्यन्यत्वविशिष्टसत्ताश्रयस्य न कर्म्मादिरिति नाप्रसङ्गः एवञ्च मेयत्वादेरपि केवलान्वयिसामानाधिकरण्यावच्छेदकत्वोपपत्तिः। यत्तु वृत्तिमत्त्वादिकमेव तत्र व्याप्तिस्तद्ग्रहस्तु मेयत्वादिनेति तन्न व्याप्तिविरहिवृत्तितया गृह्यमाणेन रूपेण व्याप्तिग्रहासम्भवात् अन्यथा अतिप्रसङ्गात् साध्यतावच्छेदकसम्बन्धेन साध्याधिकरणे येन येन सम्बन्धेनावर्त्तमानत्वं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणेऽपि तेन तेन तथात्वं बोध्यम्। नीलधूमत्वादेर्वारणीयत्वे तु स्वसमानाधिकरणतादृशधर्म्मान्तराघटितत्वेन विशेषणीयं सामानाधिकरण्योपादानाद्धूमप्रागभावत्वादिसंग्रहः तदघटितत्वञ्च तदविषयकप्रतीतिविषयत्वं स्वरूपसम्बन्धविशेष एवावच्छेदकत्वम् अतएव न ह्यतिप्रसक्तमवच्छेदकमित्यादिकमपि सङ्गच्छते अन्यथातिप्रसक्ते अनतिप्रसक्तत्वस्याप्रसक्तत्वेन तन्निराकरणायोगात् विरुद्धयोर्भावाभावयोरधिकरणे एकस्यैकेन सम्बन्धेन वृत्तिर्विरुध्यते अतस्तत्तावच्छेदकभेदापेक्षा अतएव व्यभिचारिणि साध्यतदभावसामानाधिकरण्ययोर्विरुद्धयोरुपपादनायोपाधितदभावावच्छेदकावनुमन्यन्ते न्यायाचार्य्याः। सत्तात्वन्तु गुणाद्यभावस्येव गुणस्यापि न सामानाधिकरण्यावच्छेदकं विरोधात्। अव्याप्यवृत्तेश्च कपिसंयोगादेरधिकरणे वृक्षादौ तदभावस्य संयोगेन

च वह्नेरधिकरणे महानसादौ समवायावच्छिन्नप्रतियोगिताकतदभावस्य सत्त्वेनाविरुद्धत्वात्। वह्निमति च संयोगेन वर्त्तमानस्य धूमादेर्वह्न्यभाववति सावयवे संयोगेनावर्त्तमानत्वान्न तद्वृत्तित्वत्वधूमत्वादेर्न साध्यसामानाधिकरण्यावच्छेदकत्वविरोधः व्यभिचारधीरप्येतद्व्याप्तिबुद्धौ विरोधिन्येव तद्धर्मविशिष्टस्य साध्यानधिकरणवृत्तित्वग्रहे तदवच्छेदेन साध्याधिकरणवृत्तित्वग्रहायोगात् अस्तु वा एतन्मते हेतुवृत्तिधर्मस्य साध्यसामानाधिकरण्यानवच्छेदकत्वमेव व्यभिचारः तद्धीरेव साक्षाद्विरोधिनी व्यभिचारान्तरधीस्तु परम्परयेति नीलधूमत्वादिकन्तु गौरवान्नावच्छेदकम् एवञ्च लघु घटत्वादिकमेव सामानाधिकरण्यावच्छेदकं व्याप्तिः न तु तत्सहचरितकम्बुग्रीवादिमत्त्वादिकं तेन गुरुणापि रूपेण व्याप्तिग्रहे कथायां हेतोरुपन्यासे वानुयोगः प्रकारान्तरव्याप्तिवादिनामपि समानः। एवं द्रव्यं रूपात् रसादित्यादौ सकलगुणसाधारणस्य गुणत्वस्य द्रव्यत्वादिसाधारणस्य गुणासमवेतत्वे सति द्रव्यसमवेतत्वस्य वैकस्यावच्छेदकत्व सम्भवे बहूनां रूपत्वादीनां न तत्त्वं विरुद्धधर्मद्वयाधिकरणयोस्तु एकस्यैकेन सम्बन्धेन वृत्तौ कथं विरोधः कथं वा द्रव्यत्वादौ साध्ये हेतुत्वेन विशिष्टरूपादेः प्रयोगः तथा परामर्शादानुमितिरिति विभावनीयम्। अपरे तु यद्धर्मविशिष्टहेत्वधिकरणत्वं साध्याधिकरणताया अवच्छेदकं

सधर्म्मो व्याप्तिः ग्रन्थस्तु धूमस्य धूमवतः धूमत्वं धूमवत्त्वं वह्नेस्तु वह्निमतस्त्वित्यादिप्रकारेण व्याख्येयः अत्र चावच्छेदकत्वं न स्वरूपसम्बन्धविशेषः विरुद्धदिक्कालावच्छिन्नवृत्तिकस्य न्यूनदेशकालवृत्तिकादेर्य्याधिकरणतायां तदसम्भवात्तुल्यवृत्तिकधर्मद्वयाधिकरणत्वयोर्मिथोऽवच्छेद्यावच्छेदकभावस्य च नियन्तुमशक्यत्वाद्व्याप्यन्यूनवृत्तिकत्वं न्यूनवृत्तिकधूमादेरव्याप्यतापत्तेः किन्त्वनतिरिक्तवृत्तित्वं स्वान्यूनवृत्तितत्कत्वमिति यावत् अतो न केवलान्वयिन्यव्याप्तिः अत्र च यद्न्यूनवृत्ति साध्यं तत्त्वं स्वव्यापकसाध्यसम्बन्धित्वपर्य्यवसन्नमपेक्ष्य गौरवं परमवशिष्यते तच्च ग्रन्थकारएवाग्रे विवेचयिष्यत इत्याहुः।

उपाधिनेति विशेषणतामापन्नेनोपाध्यनुप्रवेशेनेति यावत् वह्नावार्द्रेन्धनप्रभववह्नित्वेन रासभार्द्रेन्धनादौ च तथाविधवह्निविशिष्टत्वेन धूमसम्बन्धोऽवच्छिद्यमाने तथाविधवह्नेरप्यनुप्रवेशात् रासभत्वादिकन्तु निविशते नवेत्यन्यदेतत्। अत्र चेदं स्नेहवत् निःस्नेहं वा स्पर्शादित्यत्र विनाप्युपाधिप्रवेशं शीतत्वेन शीतान्यत्वेन वा साध्यासमानाधिकरणतया साधनव्यापकतया वा स्वयमनुपाधिना केवलेन विशेषणीभूय वा शीतान्यस्पर्शत्वेन चोपाधिना स्वत एव स्पर्शे साध्यसम्बन्धोऽवच्छिद्यत इत्युपाधिनैवेति नियमे न तात्पर्य्यं परन्तु शुद्धस्य साधनतावच्छेदकस्यानवच्छेदकता-

मात्रे यत एव सोपाधौ साधनतावच्छेदकातिरिक्तं नियत-मवच्छेदकम् अतएव तद्विशेषस्तत्रोपाधिरिति वदन्तीत्याह अतएवेत्यादि अत्रावच्छेदकत्वं सामानाधिकरण्येन तत्त्वव्याप्यवृत्तित्वं व्यापकत्वमिति यावत् तत्राधिकरणान्तर्भावेन तेन साध्यविशिष्टसाधनतावच्छेदकावच्छिन्नसाधनवत्त्वव्यापकाधिकरणताकत्वं पर्य्यवस्यति निरुक्तविशिष्टसाधनव्यापकत्वमिति तु निष्कर्षः । इत्यञ्च सत्ताद्येकव्यक्तिकहेतुनिष्ठद्रव्यत्वादिसामानाधिकरण्य व्यापकसामानाधिकरण्यप्रतियोगिनि घटत्वादौ नातिप्रसङ्गः न वा द्रव्यं जन्यत्वे सति सत्त्वादित्यादौ द्रव्यत्वविशिष्टसत्ताव्यापके स्पर्शवत्त्वादावप्रसङ्गः निःस्नेहं स्पर्शात् द्रव्यं सत्त्वादित्यादौ शीतस्पर्शान्यत्वरूपान्यत्वादेर्वारणाय तत्रेत्यादि । तत्र साध्यविशिष्टे साधने विशेषणं साध्याभावविशिष्टात्साधनात्सामानाधिकरण्येन व्यावर्त्तकं साध्याभावविशिष्टनिरुक्तसाधनवदवृत्तीति यावत् एवञ्च द्रव्यं सत्त्वादित्यत्र सत्ताया अभेदेऽपि गुणकर्म्मान्यत्वेनाव्याप्तिः नापि द्रव्यं कर्म्मान्यत्वे सति सत्त्वादित्यत्र गुणान्यत्वादौ इत्यञ्च साधनतावच्छेदकस्यानवच्छेदकत्वद्योतनाय परं तद्भिन्नत्वमुक्तं न तु विवक्षितमेव तत् वैयर्थ्यात् इदं दधि जन्यं वा दध्न इत्यादौ दधित्वाद्यव्याप्तेश्च । यद्वा प्रकृतसाधनतावच्छेदकानवच्छेद्यप्रकृतसाधननिष्ठसाध्यसम्बन्धितावच्छेदकत्वं पूर्वदलार्थः अ-

नवच्छेदकत्वञ्च तस्य साध्याभावविशिष्टसाधनवृत्तितया तद्विशिष्टसाधनस्य साध्याभाववद्वृत्तित्वेन साध्याभाववतस्तद्विशिष्टसाधनवत्त्वेनेति यावत् एतेन धूमवान् मेयत्वत इत्यादौ मेयानवच्छेद्य साध्यसम्बन्धाप्रसिद्धिः गुणवद्गुणकर्मान्यत्वे सतीति जातिमत्त्वादित्यादौ जातित्वघटकनित्यत्वादेर्वैयर्थ्येन विशिष्टस्यानवच्छेदकतया गुणकर्मान्यत्वादेरुपाधितापत्तिश्चेति निरस्तम् अवच्छेदकत्वञ्च सामानाधिकरण्येन तथा च साध्यविशिष्टस्य साध्यसम्बन्धितानवच्छेदकसाधनतावच्छेदकावच्छिन्नसाधनस्य व्यापकत्वमर्थः पर्यवस्यति उपदर्शितशीतस्पर्शान्यत्वादिवारणाय तत्रेत्यादि तत्र साधनतावच्छेदकविशिष्टे साधने विशेषणं साध्यशून्याद्यावृत्त्यौपधिकं यत्सामानाधिकरण्यविशिष्टप्रकृतसाधनवत्त्वं साध्याभाववति न वर्त्तत इति यावत् साध्याभावविशिष्टप्रकृतसाधनाधिकरणसामान्यात् साध्यविशिष्टप्रकृतसाधनाधिकरणसामान्यस्य व्यावर्त्तकमिति समुदायार्थनिष्कर्ष इत्याहुः। केचित्तु विशेषणं सामानाधिकरण्यं तथा च सामानाधिकरण्यप्रत्यासत्त्या येनावच्छिद्यते अवच्छेदकीभूतसामानाधिकरण्यप्रतियोगीति यावत् अवच्छेदकत्वञ्चेदमन्यूनानतिरिक्तवृत्तित्वं गुरोरप्युपाधिसामानाधिकरण्यस्याक्षतमेव यद्यपि प्रत्यक्ष उद्भूतरूपवत्त्वादित्यत्र महान् अनित्यद्रव्यत्वादित्यत्र महत्त्वस्यानित्यद्रव्यसमवेतत्वस्य च वक्ष्यमाणलक्ष-

णाक्रान्तस्योपाधेः सामानाधिकरण्यं साध्यसामानाधिकरण्यन्यूनातिरिक्तवृत्ति तथापि हेतुनिष्ठसाध्यसामानाधिकरण्यस्य हेतुनिष्ठं यत् सामानाधिकरण्यमन्यूनानतिरिक्तवृत्तित्वं विवक्षितं सत्त्वनिष्ठद्रव्यत्वसामानाधिकरण्यस्य च तन्निष्ठकर्मान्यत्वसामानाधिकरण्यमतिरिक्तवृत्ति गुणे तदभावावच्छेदकावच्छिन्नवृत्तिकत्वात् पृथिवीत्वादिसामानाधिकरण्यन्तु न्यूनवृत्ति जलादौ तदवच्छेदकावच्छिन्नवृत्त्यभावप्रतियोगित्वात् साध्यव्यापकानां सद्धेतावुपाधित्ववारणाय साधनतावच्छेदकभिन्नेनेति तदनवच्छेद्यार्थकमित्याहुः। ननु सर्वत्र सोपाधौ सर्वेणोपाधिना साध्यसम्बन्धोऽवच्छिद्यत इति न नियमः अयं प्रत्यक्षो मूर्त्तत्वादित्यादावुद्भूतरूपवत्त्वादेः तदसम्भवादित्यत आह अतएव च तत्रेति यत एवोद्भूतरूपवत्त्वादेर्न तथात्वसम्भवः अतएव तत्र तादृशनियमवादिमते इदं लक्षणमिति साधनाव्यापकत्वमिह साध्याभावविशिष्टसाधनव्यापकीभूताभावप्रतियोगित्वं तादृशसाधनासामानाधिकरण्यमिह पर्य्यवसितं तेनोपदर्शितोद्भूतरूपवत्त्वव्युदासः। अथ प्रत्यक्षो द्रव्यत्वादित्यादौ घटत्वादावतिव्याप्तिः साध्यव्यापकत्वेन विशेषणे च स श्यामो मित्रातनयत्वादित्यादौ शाकपाकजत्वादावव्याप्तिरत उक्तं साधनावच्छिन्नेत्यादि साध्याभावसम्बन्धिनि विरुद्धस्य साध्यसम्बन्धस्यावच्छेदभेदं विनानुपपद्यमानस्यावच्छेदकीभूया-

पपादनमुपाधिफलं तदसमर्थानाञ्चोपदर्शितोद्भूतरूपवत्त्वादीनां नोपाधिभावः सम्भवतीत्याह व्यभिचारिणीति व्यभिचारः सपक्षविपक्षवृत्तित्वम् अथ विपक्षगामित्वरूपव्यभिचारोन्नयनमेवोपाधिफलं तच्चोद्भूतरूपादीनामप्यस्तीत्यत आह अतएवेति यतएव साध्यसम्बन्धितावच्छेदकं रूपं व्याप्तिः सोपाधौ तु स्वाभाविकं हेतुतावच्छेदकं न साध्यसम्बन्धितावच्छेदकम् यतएव स्वसमीपवर्त्तिनि स्वसमानाधिकरणे व्यभिचारिणि हेतौ स्वनिष्ठसाध्यसम्बन्धितावच्छेदकरूपलक्षण व्याप्तिसंक्रामकतया साध्यव्याप्यस्यैवोपाधित्वमाचार्य्यैरनुमन्यत इत्याह अतएवेति साध्यन्यून वृत्तावुपाधिव्यवहारं दूषणौपयिकरूपस्यावश्यं वाच्यतयोपाधिपदस्य योगरूढ़ित्वव्यवस्थापनेन निराकुरुते लक्षणन्त्विति लक्षणं दूषणौपयिकं रूपम् । साध्येति अत्र साध्यव्यापकमात्रं विवक्षितं तावतैव साधनवृत्तित्वातिरेकेण साध्यव्यतिरेकानुमानसम्भवात् साधनवति व्यापकनिवृत्त्या साध्यसाधनसम्बन्धनिवृत्तिसिद्धावर्थात्साध्यनिवृत्तिः सिद्धतीति प्रकारान्तरप्रदर्शनाय परं तथाविधोक्तिः । रूढ़ा न्यून वृत्तावुपाधित्वव्यवहारं निरस्य योगेनाधिकवृत्तौ तन्निरस्यति विषमेति प्रवृत्तिनिमित्तं यौगिकं व्यभिचारोन्नायकत्वमेवेत्येवकारेण योगार्थादरं सूचयति उपाधित्वम् उपाधिपदप्रवृत्तिनिमित्तम् उपाधिता उपाधिपदवाच्यता

योगादरे तु लाघवात्साध्यव्यापकतामात्रे रूढ़िरिति भावः।

व्याप्तिस्वरूपं निरूप्य परमतनिराकरणपूर्वकं स्वमतेन तद्ग्रहोपायमभिधातुं प्रथमं प्राभाकरमतमुपदर्शयति सेयमित्यादिना दर्शनानां प्रत्येकं वा हेतुत्वं मिलितानां वा मिलनमपि स्वरूपतो व्यापारतो वा आद्ये दर्शनानामिति द्वितीये आश्विति क्रमिकाणामपि स्थिराणामस्थिराणामपि सहोत्पन्नानां मिलनमस्तीत्युभयमुपात्तम्। तृतीयमाशङ्का निराकुरुते न चेति व्यापकसाध्यसामानाधिकरण्यात्मिकायां व्याप्तौ साध्यसामानाधिकरण्यांशस्य प्रथममेव गृहीतत्वाद् गृहीतव्यापकत्वांशग्रहे सहचारदर्शनजन्यसंस्काराणां हेतुत्व वाच्यं तच्च न सम्भवति भिन्नविषयकत्वादित्याह समानेति भ्रमस्त्वगृहीतभेदं ज्ञानद्वयं ननु वैशिष्ट्यावगाहीति भावः न तथा न व्याप्तिग्राहकं व्यभिचारदर्शनं व्यापारतया सहकारीति व्यभिचारादर्शनसहचारदर्शनसहकृतस्तर्क एव व्याप्तिग्राहकः भूयो दर्शनन्तु क्वचित्तर्कप्रवृत्तावुपयुज्यत इति निर्गलितम्। नैयायिकमतमाशङ्क्य निराचष्टे नचैवमिति। जातमात्रस्येति तथाच तन्मूलको व्याप्त्यन्तरग्राहकतर्कावतार इति भावः। तर्हीति न च व्याप्तिप्रत्यक्षं प्रति तर्को हेतुस्तत्तु स्मरणमिति न व्यभिचारावकाशः विनानुभवं स्मरणस्यायोगात् न च जन्मान्तरीणः स जन्मान्तरेऽपि पर्य्यनु-

योगतादवस्थ्यात् अनादित्वेन च परिहारः परतो विचारयिष्यते। न चेति मानाभावात् तर्कस्य च हेतुत्वासिद्धेः यदि चागृहीतस्यागृहीतपुरोवर्त्ति संसर्गस्य वा प्रत्यासत्तित्वेऽति प्रसङ्गस्तदा पुरोवर्त्तिनि तद्ग्रहो मृग्यतां नतु सामान्यत्वेनेत्याह नन्विति साध्यव्यापकत्वं साध्यसमानाधिकरणाभावप्रतियोगित्वं तद्ग्रहश्च साध्याधिकरणैकव्यक्तिवृत्तितया गृह्यमाणस्य तादृशव्यक्त्यन्तरग्रहं विना न सम्भवति इति भूयो दर्शनापेक्षा तदाहितः संस्कारोवहिरिन्द्रियमात्रस्य सहकारीमनसोऽपि वा आद्ये तद्व्यापारं विनेति द्वितीये नापीति परिशेषात्साध्यसाधनसम्बन्धग्राहकातिरिक्तानपेक्षग्राहकत्वात् उपाध्यभावग्राहकस्यापेक्षणीयत्वादसिद्धिं निरस्यति तथाहीति। उपाधिस्मरण इत्यादि नन्वेवमसन्निकृष्टादि हेतुकानुमितिर्न स्यात् उपाधियोग्यानुपलम्भविरहादत आह तद्व्यवहारेति तथाच तद्व्यवहारस्य हेतुरेवानुमिति हेतुः तच्चोपाध्यभावत्वेन ज्ञानम् उपाधिस्मरण इत्यादि तु तत्कारणप्रदर्शनपरम् अभावत्वञ्चेदमिह नास्तीति प्रतीति साक्षिकः स्वरूपविशेषोऽतिरिक्तः पदार्थोवेत्यन्यदेतत्। एवञ्चोपाध्यभावत्वेन ज्ञानेऽधिकापेक्षां न वारयाम इति भावः। व्याप्तिस्वरूपे संशयाभाव आपद्यते निरुपाधिसम्बन्धरूप व्याप्तित्वेन वा आद्ये इष्टापत्तिः द्वितीयमपि किमुपाधिस्मरणादिकं विना तत्त्वमवधार्य्य सति वा सम्बन्धग्रहे आद्ये

किं विद्यमान इति तथाच तद्ग्रहमात्रं ननु तदभावत्वेनापि ग्रह इति समानप्रकारकं निश्चयाभावात्तत् संशयोनानुपपन्न इति भावः द्वितीये ज्ञानप्रमाणेति प्रथमेति सत्युपाधिस्मरणादावित्यादिः। नचाश्वापीति सर्वत्र रासभादावित्यर्थः अवगत इति स्वरूपकथनमात्रं महानस इति अग्निन्नित्यादिः। महति वायौ योग्यायोग्योद्भूतरूपसामान्यतद्वतोरिव योग्ये वह्नौ सादृश्यप्रतियोगित्वसामान्यतद्वतोरत्यन्तान्योऽन्याभावयोर्योग्यत्वादितिभावः। न प्रतियोगिनावच्छेदकमिति न धूमसामान्यसमानाधिकरणतादृशाभावप्रतियोगितासामान्यावच्छेदकमित्यर्थः। अथ साधनाव्यापकव्याप्यत्वाभावः साध्येऽधिकरणस्वरूपमेव एवं साधननिष्ठसाध्यसम्बन्धे साधनतावच्छेदकातिरिक्तावच्छेद्यत्वाभावोऽपीत्यनुशयानो येन रूपेण ज्ञाता व्याप्तिरनुमित्यङ्गं तद्रूपविशिष्टा न सकृद्दर्शनगम्या सामानाधिकरण्यमात्रस्य च तथाभावं न वारयाम इत्याशयेनाह किञ्चेति। विशेषणज्ञानसाध्यत्वात् तत्सामग्रीसाध्यत्वाद्वान चेति उपलक्षणमेतत् उपाधेरयोग्यस्यापि सम्भवात् उपाधिसामान्यतद्वतोर्मूर्त्तत्वादिसामान्यतद्वतोरिवात्यन्तान्योऽन्याभावयोरयोग्यतया प्रत्यक्षेण ग्रहीतुमशक्यत्वात् न च योग्योपाधिव्यतिरेकग्रह एवानुमानाङ्गम् अयोग्योपाधिग्रहेऽप्यनुमितिप्रसङ्गात्। यथाश्रुतं दूषयति यत्त्वोक्तमित्यादिना व्यभिचारेत्यादि अत्र प्रत्यक्षे ग्राह्यसंशय-

स्यापि प्रतिबन्धकत्वमादृत्य व्यभिचारशङ्कायास्तथात्वाभिधानम् अन्यथा पुनरसाधारणतत्तत्कारणमेलकरूपा सामग्री प्रतिबन्धिका बोध्या विवेचितञ्चेदं प्रत्यक्षमणिदीधितौ वक्ष्यते चाधिकमुपरिष्टात्। अत्र च यद्यपि साधनगोचरसाध्याभाववद्वृत्तित्वग्रहाभावो हेतुरिति न युक्तं केवलान्वयिनि ग्राह्याप्रसिद्ध्या ग्रहाप्रसिद्धेः खण्डशः प्रसिद्ध्या क्वचित्ताहृशभ्रमसम्भवेऽपि सर्वत्र तथाभ्रमे मानाभावात् अतएव साध्यतावच्छेदकगोचरसाधनवन्निष्ठाभाव-प्रतियोगितावच्छेदकत्वग्रहोऽपि प्रत्युक्तः सकलसाध्यतावच्छेदके तादृशग्रहे मानाभावात् तथापि साध्यतावच्छेदके तत्पुरुषीयतादृशावच्छेदकत्वग्रहस्य विषयतयाभावः तद्विषयत्वाभावो वा तत्पुरुषीयव्याप्तिग्रहे हेतुः वस्तुतो व्याप्तेः साध्यसाधनभेदभिन्नतया विशिष्यैव कार्य्यकारणभावः तथाच यत्र साधनं साध्याभाववद्वृत्ति साध्यतावच्छेदकं साधनवन्निष्ठाभावप्रतियोगितावच्छेदकमेकविधमनेकविधं वा व्यभिचारज्ञानं प्रसिद्धं तत्र यथायथं तदभावः पुरुषनिष्ठो व्याप्तिग्रहहेतुः अतएवैकविधव्यभिचारज्ञानविरहेऽन्यविधव्यभिचारग्रहाद्व्याप्तिधीविरोधः। एवञ्च क्वचिद्व्यभिचारज्ञानस्याप्रसिद्ध्या तदभावस्याहेतुत्वेऽपि न क्षतिः। प्रसिद्धायाः साधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वादिबुद्धेः समानविषयतया तदभावबोधविरोधित्वानुरोधेन तु तथात्वकल्पनं न वयं

वारयामः यदि तत्तत्प्रकारादिनिवेशेन विशेषे न पर्य्यवस्ये-दिति दिक् व्याप्तिश्च धूमादिव्यापकवह्निसमानाधिकरण-वृत्तिधूमत्वादिकं तादृशसामानाधिकरण्यमात्रस्य रासभादि-साधारण्यात् अत्र च व्यापकत्वांशग्रहे व्यभिचाराग्रहः समाना-धिकरणवृत्तित्वांशग्रहे च तद्विशेषणतया सामानाधिकरण्यस्य ग्रहो हेतुरिति वक्तव्यम्। साध्यसम्बन्धितावच्छेदकरूपवत्त्वल-क्षणव्याप्तिग्रहे विशेषणतया सम्बन्धस्य ग्रहो हेतुरित्यपि के-चित्। यत्तु विरुद्धे सहचारभ्रमेण व्यापकत्व भ्रमात्सामान्यत एव सहचारज्ञानं हेतुरिति तन्न असिद्धत्वात् विरुद्धेऽपि व्यापकत्वसामानाधिकरण्ययोग्रर्ग्राहकसामग्रीक्रमयौगपद्याधीनं ग्रहणक्रमयौगपद्यं न तु मिथः कार्य्यकारणभाव इति। इदं पुनरवधेयं यथा विद्यमानमपि वह्नित्वे व्यवहितविप्र-कृष्टरासभादिदेशनिष्ठाभावप्रतियोगितावच्छेदकत्वं न गृ-ह्यते अभावदेशविप्रकर्षादिना ग्राहकाभावात् तथा धूम-वन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्य सत्त्वेऽप्यग्रहसम्भवात्। नानुपलब्धेः प्रतियोगिसत्त्वविरोधित्वादिलक्षणा योग्यतेति न तत्सामान्याभावो लौकिकप्रत्यक्षगम्यः परन्तु कथञ्चिद्विरोध-स्फुरणादिवशाद्धूमत्वादौ गृहीतोधूमवन्निष्ठात्यन्ताभावप्रति-योगितावच्छेदकत्वाभावो वह्नित्वादावुपनयमर्य्यादया गृह्यते अतएवानुमानादिना व्यभिचारग्रहेऽपि न व्याप्तिधीः निर्णया-त्मनि साधारणे वा दोषविशेषाजन्योपनीतभाने संशयादि-

साधारणस्य निश्चयात्मनो वा विपरीतज्ञानमात्रस्यैव प्रतिबन्धकत्वात् तत्तद्धूमादौ देशान्तरवृत्तित्वसम्भावनाविरहादिवशात् गृह्यमाणो वह्न्याद्यभाववद्वृत्तित्वाभावो धूमत्वाद्यवच्छेदेन गृह्यते लाघवादित्यपि वदन्ति। हुताशनरासभादिपदार्थसार्थस्यान्वयव्यतिरेकयोरन्वयव्यतिरेकौ धूमस्योपलभमानोऽवश्यमेतेषामन्यतमं कारणं धूमस्येत्यवधार्य सन्दिग्धे किमेतानि सर्वाण्येव कारणानि किं वा कानिचित्तथा कानिचिन्नेति अत्र च यस्य व्यतिरेकेऽपि इतरेभ्यस्तथाविधेभ्यो धूमोत्पत्तिमुपलभते तस्याहेतुत्वमेवावधारयति यथा रासभादेर्यस्य व्यतिरेके तादृशापरसकलान्वयेऽपि धूमानुत्पत्तिं पश्यति तस्य कारणत्वमेव निश्चिनुते यथा वह्नेः तत्र चाकारणत्वसन्देहो विरोधितामासादयन्निवर्त्तते येन तर्केण तमाह धूम इत्यादि। अनुसन्धेयश्चावश्यं कार्य्यकारणभावग्रहः तदधीनत्वाद्व्याप्तिबुद्धेः सामानाधिकरण्येनान्वयव्यतिरेकग्रहात् जायमानस्य तथैवहेतुहेतुमद्भावं गृह्णतस्तस्यैव वा व्याप्तिपरिच्छेदकत्वात् विपर्य्यये तत्कोटिमात्रपर्य्यवसायिनस्तु तर्कस्य तदभावकोटिकशङ्कानिवर्त्तकत्वम् अन्यथा धूमो यदि वह्नितच्छून्यजन्यान्यतरो न स्यात् जन्यो न स्यादित्यादेरपि तथात्वापत्तेः तथा पर्य्यवसायिता च क्वचिद्विशेषतो व्याप्त्या सामान्यतोऽपि क्वचित्पक्षधर्म्मताबलात् तत्सम्पत्तये चात्र वह्न्यसमवहिताजन्यत्वेन पक्षो विशेषः विशे-

षणवत्वेनोपस्थितेर्विशिष्टाभावबुद्धेर्विशेष्याभावमात्रावलम्बित्वात् तथोपस्थितिविरोधि चावह्नेरित्यादि शङ्काद्वयमग्रे निरसनीयम्। वस्तुतो वह्न्यजन्यमपि वह्निसमवहितजन्यं वह्न्यसमवहिताजन्यञ्च सम्भवतीति वह्निजन्यत्वपर्य्यवमितं वह्निसमवहितजन्यत्वं वाच्यं तथा च घटादौ व्यभिचारवारणाय आपाद्यकोटिप्रतियोगिविशेषणार्थकं सत्यन्तम् अजन्ये जन्ये च नान्तरीयके व्यभिचारवारणाय जन्य इति तदर्थस्तु वह्न्यसमवधानकालीन वह्नितत्समवधानेतरयावत्कारणजन्यत्वं तथाविधयावत्कारणकत्वमिति यावत् तथाच वह्न्यसमवहिताजन्यत्वे सति वह्न्यसमवधानकालीनवह्नितत्समवधानेतरयावत्कारणको न स्यादिति पर्य्यवसितोऽर्थः। यत्तु नान्तरीयवह्निके व्यभिचारवारणाय आपादककोटावेव विशेषणं सत्यन्तार्थः स च वह्न्यघटितसामग्र्यजन्यत्वमिति तन्न प्राक् तदसिद्धेः। आद्या द्वयी शङ्का इष्टापत्तिपर्य्यवसायिनी तृतीया पुनरापादकाद्यप्रसिद्धपर्य्यवसायिनी अवह्नेः वह्निशून्यात् तदुपादानमिति करणव्युत्पत्त्या तदीयकार्य्यप्रयोजकताज्ञानपरम् तादृशान्वयव्यतिरेकानुविधानबोधपरं वा अग्रेतनमपि स्वक्रियापदं तत्परमेव कृत्यादेः शङ्का प्रतिबन्धकत्वे मानाभावात् कारणतायश्चोत्तरकालीनत्वाच्च। यद्यपि चैतावता धूमत्वावच्छिन्नं प्रति वह्नेर्जनकत्वं नायाति तृणारणिमणिन्यायेन वैकल्पिककार-

णतायामपि तथात्वसम्भवात् तथापि विशेषाणां कार्य्यकारण-भावग्रहस्तर्केण तद्विरोधशङ्कायामपनीतायां जायमानः सामान्यव्यभिचारानिश्चयानुगतागुरुविशेषरूपान्तरानुपस्थि-तिलाघवप्रतिसन्धानादिवशात्सामान्यत एव तं परिच्छिनत्ति प्रामाणिकौ च तथैवान्वयव्यतिरेकौ फलबलेन लाघवज्ञाना-दिशून्याया एव सामान्यव्यभिचारशङ्कायाः प्रतिबन्धकत्वं कल्प्यते। अपरे तु धूमत्वावच्छिन्नस्य वह्न्यजन्यत्वेन जन्यत्वविशिष्टस्य यथाश्रुतवह्न्यसमवहिताजन्यत्वस्य व्यति-रेक एवापादनीयः तच्चोक्तन्यायेन तादृशवह्नियुक्तकारण-कलापजन्यत्वग्रहेण तद्व्यतिरेकजन्यत्वशङ्कानिरासात् वह्नि-विरहेऽपि निरतिशयस्यैव तादृशसमूहस्य धूमजनकत्वसन्दे-हस्य च तथाविधात् धूमानुत्पाददर्शनेनैवायोगात् तादृश-स्यैव क्वचिद्वह्निं क्वचिच्चेतरदासाद्य जनकत्वसम्भावनायाञ्च क्वचिद्धूमानुत्पादप्रयोजकत्वेनावधृतस्य वह्निविरहस्यैव तथा-विधसमूहत्वे धूमानुत्पत्तिसामान्यं प्रतिलाघवात्प्रयोजक-त्वनिर्णयेनापनयात्मनसैव सुग्रहं वह्नेर्वह्निसमवहितस्योपा-दानम् अत्र च नियमव्यवच्छेद्यस्य वह्न्यसमवहितानुपादा-नस्य प्रयोजके तदजन्यत्वज्ञाने परम्परया वह्निसमवहितो-पादानस्य वा प्रयोजके तत्र तात्पर्य्यम्। यत्त्वन्वयव्यतिरे-कानुविधायित्वज्ञानमेव विशेषदर्शनतया शङ्काप्रतिबन्धकं तदेव तर्कघटकं तदिदमुक्तं यदि गृहीतान्वयव्यतिरेकं हेतु-मितीति तन्न यादृच्छिकस्य तदनुविधानस्य व्यभिचारित्वा-

नियतस्य चोक्ताभेदसम्पादकत्वादिति वदन्ति तच्चिन्त्यम् । केचित्तु कार्य्यकारणभावग्रहानन्तरं व्याप्तिग्रहाय व्यधिकरणस्य जनकत्वशङ्का निरासार्थमयं तर्कः तथा च धूमो यदि सामानाधिकरण्यातिरिक्तप्रत्यासत्त्या वह्न्यजन्यत्वे सति सामानाधिकरण्यप्रत्यासत्त्या वह्निजन्यो न स्यात् वह्निजन्यो न स्यात् । अप्रत्यासन्नस्याजनकत्वात् तादृशाजन्यत्वञ्च प्रत्यासत्त्यन्तरशालिवह्निसत्त्वेऽपि धूमानुत्पादादिना ग्राह्यमिति इदमेव च वाचोभङ्ग्या परे परिष्कुर्वन्ति धूमो यदि वह्न्यनधिकरणदेशानुत्पत्तिकत्वे सति वह्न्यधिकरणदेशोत्पत्तिको न स्यात् जन्योन स्यात् तादृशानुत्पत्तिकत्वग्रहश्च धूमानुत्पत्तिं प्रति वह्निसम्बन्धाभावस्य प्रयोजकत्वे ग्राह्ये उपस्थितत्वाल्लाघवाच्च तादृशसम्बन्धाभावस्यैव तथात्वावधारणादिति तच्चिन्त्यम् । मिश्रास्तु परं प्रति व्याप्तिग्रहोपाये प्रदर्श्यमाने व्यभिचारशङ्कानिरासहेतुत्वेनोपदर्शिते तर्के मूलशैथिल्यादिशङ्कोद्भावकं तं प्रति व्याघातोऽयमुपदर्श्यते मैवं शङ्किष्ठाः तथा सति तत्तत्कार्य्यार्थितया तत्र तत्र कारणे तवैव प्रवृत्तयो व्याहन्येरन् यदाह न हि सम्भवति स्वयं वह्न्यादिकमितीति प्राहुः । तच्चेति तत् व्यभिचारादर्शनं व्यभिचारज्ञानसामान्याभावः योग्यतादिसन्देहेऽपि शब्दादिना अर्थनिश्चयात् तत्तर्कस्वरूपमिति केचित् । ननु वस्तुतो व्याप्तिसत्त्वे तर्काभासात् प्रमाभ्रमयोरुत्पादानुत्पादाभ्यां व्यभिचार इत्यत आह विशेषदर्शनेति । तथा च यथा तत्र

बोध्यतदभावतद्विषयत्वे सत्यत्वासत्यत्वे तथा तर्कस्यापीति अत्र च सत्यत्वादिसम्पादके धर्म्मिणो बोध्यादिमत्त्वे बोध्यादिमद्धर्मिसन्निकर्षे वा तात्पर्य्यं लाघवात् तर्कस्य व्यभिचारेणाहेतुतायाः स्वयमेव दर्शितत्वाच्च अथ विपरीतज्ञानोत्तरप्रत्यक्षे तन्निवर्त्तकत्वेन विशेषदर्शनस्य हेतुत्वं तच्च तर्कस्यापीति चेत् अस्तु तावदापाततस्तथा तथाप्यन्यत्र क्लृप्तप्रामाण्यादिप्रयोजकादेव तत्र प्रामाण्याद्युपपत्तौ न तस्यापि विशेषतः कारणत्वं गौरवात्। उक्तञ्च विशेषणज्ञानस्य विशिष्टज्ञानकारणत्वमते सर्वत्र विशेष्य सम्बन्धासम्बन्धविशेषणज्ञानमेव प्रमाभ्रमप्रयोजकमिति वदन्ति तत्र प्रमाणेति इदमनादिसिद्धत्वज्ञानस्य प्रयोजकत्वमभिप्रेत्य परार्थाभिप्रायेण वा अनुमानत्वात् व्याप्तिग्रहाधीनप्रवृत्तिकत्वात्। व्यभिचारशङ्केति द्वारेण द्वारिणो नान्यथा सिद्धिरिति भावः। अनुमानमात्र इति अनिश्चितसाध्यपक्षके सर्वत्र सम्भवित्वात् पक्षे साध्यनिर्णयेऽनुमानवैयर्थ्यात् उपाधित्वेन स्वव्यभिचारेण व्यभिचारोन्नायकत्वेनानुमानमात्रोच्छेदकताज्ञानमेव साध्यव्यापकताबुद्धिं विरुन्ध्यादित्याशङ्क्याह अपि चेति। करवक्षीति। परमते न इदं स्वमते तु वाय्वादौ स्पर्शादिना रूपादिसाधने शक्त्यतिरिक्तविशेषणाप्रक्षेपेण वा तद्बोध्यम्। उक्तव्याप्तीति प्रतियोग्यसामानाधिकरण्यादिविशेषणविरहेण लाघवात्। अथ संयोगाभावस्येव संयोगवद्वृत्तेरपि हेतुसामानाधिकरण्यग्रहेऽप्यनुमिति दर्शनात्तत्रापि तदवश्यं

मिवेशनीयमिति क्व लाघवम् । नन्वेवं प्रतियोग्यसामानाधिकरण्याद्यनुपस्थितौ हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वग्रहेऽप्यनुमितिर्न स्यात् न च प्रतियोगिसमानाधिकरणत्वेनाज्ञायमाना यावन्तो हेतुसमानाधिकरणा अभावास्तत्प्रतियोगितावच्छेदकत्वाभावग्रहो हेतुरिति वाच्यं तादृशाभावग्रहो हि न हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वेन रूपेण प्रतियोगिसमानाधिकरणतादृशाभावप्रतियोगितावच्छेदकत्वग्रहे तदसम्भवात् नापि प्रातिस्विकरूपेण जन्मसहस्रेणाप्यसम्भवात् नापि रूपान्तरेण वह्नित्वावच्छिन्नप्रतियोगिताकाभावस्य धूमसामानाधिकरण्यभ्रमेऽपि वह्नित्वानवच्छिन्नप्रतियोगिताकधूमसमानाधिकरणनिखिलाभावप्रतियोगितानवच्छेदकं वह्नित्वमिति ज्ञानादपि अनुमितिप्रसङ्गात् न च हेतुसमानाधिकरणत्वेन ज्ञायमाना इति वाच्यं वह्नित्वे धूमाधिकरणरासभाद्यभावप्रतियोगितावच्छेदकत्वभ्रमेऽप्युक्तरूपेण तथाग्रहसम्भवात् धूमाधिकरणान्तरानुपस्थितौ वह्नित्वे रासभत्वादौ च तादृशप्रमोत्पादेऽपि रासभादेरिव वह्नेरप्यननुमानाच्च । एवं वह्नित्वावच्छेदेन शुक्लत्वाभावभ्रमदशायां शुक्लप्रतियोगिका वह्नीतरप्रतियोगिताकाश्च ये धूमसमानाधिकरणाभावास्तत् प्रतियोगितानवच्छेदकं वह्नित्वमिति ग्रहेऽपि । मैवं प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वग्रहविरोधिग्रहविषयत्वेन तेषां तादृशावच्छेदकत्वग्रहविरोधित्वेन

तद्बुद्धीनां वाननुगमात् विरुणद्धि च सामान्याभावबोधोऽपि सामान्यघटितविशेषवत्ताबुद्धिं सत्यां हि घटो नास्तीति बुद्धौ जात्वपि नीलो घटोऽस्तीति बोधानुदयात् तत्कस्य हेतोस्तद्विशिष्टप्रतियोगिमत्ताबुद्धिं प्रति तदवच्छिन्नप्रतियोगिताकाभावबुद्धेर्विरोधित्वात् अवगाहते च नीलघटवत्ताबुद्धिरपि घटत्वविशिष्टतद्वत्तां अतएवावच्छेदकतत्त्वयोरन्योऽन्यात्यन्ताभावयोरुपसंग्रहः हेत्वाभासे च वक्ष्यमाणरीतिरिहाप्यनुसन्धेया यदि च साध्यतावच्छेदकस्याभावप्रतियोगितानवच्छेदकत्वादिग्रहान्नानुमितिस्तदा तादृशावच्छेदकत्वग्रहाविरोधित्वेन विशेषणीयम् अन्योऽन्याभावस्याव्याप्यवृत्तितापक्षे तु सुतरां विशेषणदानमिति सत्यं तथाप्यन्योऽन्याभावे प्रतियोग्यवृत्तित्वस्यैव विशेषणत्वं न वा प्रतियोगितावच्छेदकसम्बन्धभेदानुधावनमतो लाघवमिति यथाश्रुतग्रन्थानुरोधिनः। अपरे त्वन्योऽन्यात्यन्ताभावगर्भव्याप्त्योरेकतराग्रहेऽप्यन्यतरज्ञानादनुमितेरानुभविकत्वात्तदुभयज्ञानमेव हेतुः इन्द्रियसंयोगादिवच्च विशिष्यैव कार्य्यकारणभावान्न व्यभिचारः। यत्तु यद्रूपावच्छिन्नप्रतियोगिताकत्वेनोपस्थितोऽभावो धर्मिणि गृह्यमाणः साध्यवत्ताबुद्धिं विरुणद्धि तद्रूपावच्छिन्नप्रतियोगिताकाभावसामानाधिकरण्यावगाहिनो ग्रहस्य विरोधित्वेन व्याप्तिबुद्ध्योऽनुगमनीयाः प्रतिबध्नीतस्य साध्यतद्वदत्यन्तान्योऽन्याभावग्रहो साध्यवत्ताबुद्धिं केवलान्वयिस्थले च भ्रमरूपस्यैव तद्ग्रहस्य कथञ्चित् प्रसिद्धिरिति तच्चिन्त्यम्

साध्यतावच्छेदके साधनसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वावगाही साध्यतावच्छेदकावच्छिन्नसाध्यवत्त्वे च साधनसमानाधिकरणान्योऽन्याभावप्रतियोगितावच्छेदकत्वावगाही यो ग्रहस्तद्विरोधित्वं साध्याभाववद्वृत्तित्वसाध्यवदन्यवृत्तित्वोभयावगाहिग्रहविरोधित्वादिकं वानुगमकं वाच्यं प्रसिद्धिः पूर्ववत् अधिकं हेत्वाभासे वक्ष्यमाणरीत्या बोध्यं ग्रन्थस्तूपलक्षणपरोऽनौपाधिकत्वमात्रस्यावच्छेदाय वैद्यति अनौपाधिकत्वन्तु तल्लक्षणमितीति वदन्ति । व्यभिचाराज्ञानस्य व्याप्तिधीहेतुत्वात् व्याप्तिग्रहप्रतिबन्धकग्रहविषयत्वेन व्यभिचारस्याभासत्वम् सोपाधित्वज्ञानन्तु न साक्षाद्व्याप्तिधीविरोधि विरोध्यविषयत्वात् किन्तु व्यभिचारधीद्वारा वक्ष्यते चानुमितेस्तत्कारणज्ञानस्य साक्षाद्विरोधिन एवाभासत्वं निरुपाधित्वस्य ज्ञानन्तु न व्याप्तिधीहेतुः मानाभावात् तथात्वेऽप्युपाधेराभासत्वायोगाच्चेति ।

इदं पुनरिहावधेयम् यदन्योऽन्याभावस्याव्याप्यवृत्तित्वे प्रतियोग्यवृत्तित्वविशेषिततद्घटितलक्षणस्य संयोगादिसाध्यकव्यभिचारिण्यतिव्याप्तिः संयोगान्योऽन्याभावस्य केवलान्वयित्वात् । अथ व्याप्यवृत्तिसाध्यके स्वव्यापकसाध्यसामानाधिकरण्यमेव व्याप्तिः अव्याप्यवृत्तिसंयोगादिसाध्यके तु स्वव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकात्यन्ताभावेन तादृशरूपविशिष्टावच्छिन्नप्रतियोगिताकान्योऽन्याभावेन वा सममसामानाधिकरण्यमिति चेत् स्मृतिसंस्कारजन्यज्ञान-

विषयत्वादिकेवलान्वयिसाध्यकेषु का गतिः। अथ स्वाधिकरण यत्किञ्चिद्व्यक्तिवृत्तिधर्मानवच्छिन्नप्रतियोगिताकान्योऽन्याभावप्रतियोगितानवच्छेदकसाध्यवत्त्वकत्वं यद्धर्मविशिष्टयत्किञ्चिदधिकरणवृत्तिधर्मानवच्छिन्नप्रतियोगिताकान्योऽन्याभावप्रतियोगितानवच्छेदकसाध्यवत्त्वकत्वे सति तद्धर्मविशिष्टत्वं वा सेति चेत् अत्र किं यथा कथञ्चित्सम्बन्धेन तदधिकरणवृत्तित्वं विवक्षितं साध्यतावच्छेदकसम्बन्धेन वा आद्ये गुणः स्पन्दत्वादित्यत्रातिव्याप्तिः गुणत्वस्य स्वरूपसम्बन्धेन स्पन्दवृत्तितया तद्वत्त्वस्य स्पन्दनिष्ठतादृशान्योऽन्याभावप्रतियोगितानवच्छेदकत्वात्। द्वितीये समवायेन जातिः साध्यत्वे मेयत्वादावतिव्याप्तिः जातिमन्मेयव्यक्तिनिष्ठतादृशान्योऽन्याभावप्रतियोगितायाः जातिमत्त्वेनावच्छेदाज्जातिशून्यमेयव्यक्तौ समवायेन वर्त्तमानस्याप्रसिद्धत्वात्। एतेन ग्रहो व्याख्यातः। एवं तथात्वेऽत्यन्ताभावगर्भमपि दुर्वचं तथाहि प्रतियोग्यनधिकरणीभूतहेत्वधिकरणनिष्ठात्यन्ताभावेत्यादिगर्भमव्यापकमेव संयोगादिसाध्यकद्रव्यत्वादौ स्वाधिकरणीभूतयत्किञ्चिद्व्यक्त्यवृत्ति प्रतियोगिकात्यन्ताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्न समानाधिकरणहेतुत्वमित्यत्रापि पूर्ववत् गुणः स्पन्दत्वात् जातिमान्मेयत्वादित्यत्रादिव्याप्तिः एवं स्वप्रतियोगिनिष्ठाधेयत्वानिरूपकहेत्वधिकरणवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्न समानाधिकरणहेतुत्वमित्यत्रापि उत्पत्ति-

कालावच्छेदेन जन्यानां द्रव्याणामजन्यानाञ्च प्रलयावच्छेदेन वा संयोगनिष्ठाधेयत्वानिरूपकत्वोपगमे संयोगसाध्यकद्रव्यत्वे कालपरिमाणे च हेतावव्याप्तिः कृतं पल्लवितेन। अत्र वदन्ति साध्यसमानाधिकरण तत्सम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वव्यापक स्वसमानाधिकरण तत्सम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वकत्वं स्वसमानाधिकरण तत्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वव्यापकसाध्यसमानाधिकरण तत्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वकत्वं वा स्वसमानाधिकरणाः सर्वे यद्धर्मावच्छिन्नसमानाधिकरणास्तद्धर्मावलीढसामानाधिकरण्यं साध्यसामानाधिकरण्याभावव्यापकतावच्छेदकस्वसमानाधिकरण्यसामान्याभावत्वकत्वं वा व्याप्तिः। अत्र च साध्यतावच्छेदकसम्बन्धेन साध्याधिकरणं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणं तद्वृत्तिद्वयञ्च एकेन सम्बन्धेन विशेषणताविशेषेण वा बोध्यमिति।

प्रसङ्गात् सामान्यलक्षणां व्यवस्थापयितुमाह व्याप्तिग्रहश्चेति। केचित्तु समानाधिकरणयोरेव व्याप्तिरिति पक्षे पर्वतीयधूमे वह्निव्याप्तिविशिष्टधीर्न पर्वतीयवह्निव्याप्तिग्रहं विना स च न सामान्यलक्षणां विनेति कथितव्याप्तिविशिष्टेत्यादिलक्षणोपोद्घातोऽप्यौत्याहुः। अत्र च सामान्यं लक्षणं स्वरूपं यस्या इत्यर्थे सामान्यमेव प्रत्यासत्तिः सामान्यं लक्षणं निरूपकं यस्या इत्यर्थे तु तज्ज्ञानम्। तचाद्यमाह

मात्रेन्द्रियेति इन्द्रियेण सम्बद्धं धूमादि तस्य विशेषणं तद्विशेष्यकज्ञानप्रकारो धूमत्वादिरित्यर्थः। विशेषणतेत्यत्र भावार्थो न विवक्षितः तत्र विशेषणत्वं यस्या इति बहुव्रीहिर्वा सम्बद्धपदस्यैव वा परम्परासम्बन्धस्तत्सम्बन्धविशेष्यकज्ञानप्रकारोऽर्थः तथाच सैव विशेषणतेत्यर्थः अत्र च वह्नि-रिन्द्रियस्य लौकिकः सम्बन्धो ज्ञानस्य तदिन्द्रियजन्यत्वञ्च नियामकम् एवञ्चाणुत्वेन यत्किञ्चिदणूपस्थितावपि सकलाणुगोचरो मानसो बोध इति वदन्ति एतेन धूलीपटले धूमभ्रमे तत्र च वह्निव्याप्तिग्रहे तत्रासता धूमत्वेन धूमेषु व्याप्त्यग्रहाद् मदर्शनाद्वह्न्यनुमितिर्न स्यात् हेत्वभावेन परामर्शानुत्पादात् किञ्च धर्म्मिणि दोषवशान्नयनेनागृह्यमाणेन स्मरणप्रकारीभवता सामान्येन गृह्यमाणेन वा लौकिकसन्निकर्षविगमेऽपि चाक्षुषज्ञानापत्तिरिति परास्तम्। सामान्यञ्च सखण्डाखण्डभेदेन द्वेधा सखण्डे चाखण्डमेव परम्परया सम्बद्धं प्रत्यासत्तिः येन सम्बन्धेन चेन्द्रियसम्बद्धे सामान्यं ज्ञायते तेन सम्बन्धेनाधिकरणानां प्रत्यासत्तिरिति। ननु यत्र नानाधिकरणप्रत्यासन्न एकव्यक्तिर्घटादिस्तत्प्रागभावादिर्वा नित्यः प्रत्यासत्तिस्तत्र तदभावदशायां तया प्रत्यासत्त्या तज्ज्ञानानुदयप्रसङ्ग इति चेन्न तत्रापि तत्तद्व्यक्तिद्वारा प्रत्यासन्नस्य घटत्वादेरेव प्रत्यासत्तित्वात् एतदस्वरसेनैव वा द्वितीयं पक्षमाह अतिरिक्तै वेति अतिरिक्ता इन्द्रियसम्बद्धे तादृशसामान्यज्ञानात्मिका प्रती-

तायनुरोधात्सामान्यज्ञानं प्रत्यासत्तिः अपेक्षणीयञ्च तदि-न्द्रियकरणकतद्धर्म्मवत्त्वबोधसामाग्र्यन्तरम् अतएवान्धतमसे सौदामिनीसम्पातजनितेऽपि द्रव्यप्रत्यक्षे चरमं न चाक्षुषो निखिलद्रव्यसाक्षात्कारसन्तान इति तु नव्याः। इयञ्च धर्म्म-विषयकं ज्ञानं धर्म्मिणां प्रत्यासत्तिरितरा तु यद्विषयकं ज्ञानं तस्य अतएव सुरभिचन्दनमित्यादौ सौरभत्वादेरपि भानमिति। ततः स्मृता सेति धूमसमानाधिकरणात्यन्ता-भावाप्रतियोगिवह्निसमानाधिकरणवृत्तिधूमत्वं वह्निमदन्या-वृत्तित्वं वह्निसम्बन्धितावच्छेदकरूपवत्त्वं वा व्याप्तिः एकैव च सा सर्व्वधूमसाधारणीति भावः। व्याप्तिनानात्वे तु पर्व्व-तीयवह्नेरसन्निकर्षे तत्सामानाधिकरण्यग्रहायोगः अन्यदीय-वह्निसामानाधिकरण्यस्य तत्र भानाङ्गीकारे भ्रमत्वापत्ति-रिति द्रष्टव्यम्। गवादिपदेष्वपीति शक्त्यनुभवशक्यस्मरणे हेतु हेतुमान् वाक्यार्थबोधः। नचैवं जातिशक्तिवादविरोधः जातौ व्यक्तौ च शक्तिः परन्तु जातिविषयत्वेनैव ज्ञाता शक्ति-र्व्यक्तिं स्मारयति अनुभावयति चेति तदर्थादिति वक्ष्यमा-णत्वात्। अतद्गुणसंविज्ञानबहुव्रीहिणापक्षादिलिङ्गादिपदा-भिप्रायेण परोत्या वेत्यपि कश्चित्। विशेषणज्ञानसाध्येति। न च पक्षतावच्छेदकज्ञानजन्यतया सिद्धसाधनं यद्विशिष्ट-ज्ञानं तत्तद्धीसाध्यमिति सामान्यव्याप्त्यादरात् अभावत्व प्रतियोगित्वयोरप्यनुपस्थितयोरप्रकारत्वात्। वह्निविशिष्ट-ज्ञानत्वेन तद्वह्निविशिष्टज्ञानत्वेन वा तज्ज्ञानजन्यत्वसाध-

नाद्य विशिष्टवैशिष्ट्येत्याद्यभ्युपगमवादः वस्तुतो विशेषणतावच्छेदकादीनां युगपदिन्द्रियसन्निकर्षात्तादृशप्रत्यक्षम् अनुमित्यादेस्तु तादृश्येण व्याप्त्यादिग्रहात् अतएवानेकव्यक्तिकद्रव्यादिविशेषणतावच्छेदककानुमित्या तज्ज्ञानार्थं न सामान्यलक्षणादरः। अस्तु वा दण्डीत्यादि प्रत्यक्षे दण्डत्वादिना दण्डसंयोगवानित्यादौ च दण्डसंयोगत्वादिना यत्किञ्चिद्व्यक्तिज्ञानं कारणम्। दृष्टान्ताभावादिति विशेषणज्ञानत्वेन हेतुत्वस्य विशेष्यज्ञानादेरपि कारणत्वापत्त्या मानाभावेन च निरस्तत्वादिति एतेनास्तु विशेष्यज्ञानमपि कारणं जन्यतां निर्विकल्पमपि सामान्यलक्षणया सर्वज्ञत्वापत्त्या तस्यास्तदजनकत्वे तु तत एव बाधकात्र तत्कारणमिति निरस्तम्। प्रसिद्धधूम इत्यादि धर्मिज्ञानस्य संशयहेतुत्वानङ्गीकारेऽपि संशय एव धर्मिभानार्थं सा स्वीकार्य्या धर्मितावच्छेदकप्रकारकज्ञानस्य प्रत्यासत्तित्वाभ्युपगमेत्वविवादात् तद्धर्मप्रकारकज्ञानस्य तद्धर्माश्रयप्रत्यासत्तित्वोपगमात्। अत्र वदन्ति प्रसिद्धधूमे धूमत्वेन व्याप्तिज्ञानं एतद्धूमत्वेन वा आद्ये संशयोऽसिद्धः द्वितीये धूमत्वावच्छेदेन व्याप्तिग्रहस्यैव तद्विरोधितया संशयोनानुपपन्नः कथमन्यथा पृथिव्यादिरूपे वायुत्वाभावव्याप्यतानिर्णयेऽपि रूपं वायुत्वाभावव्यभिचारि नवेत्यादिसंशयः नचातिरिक्तसम्भावनया तथा विशेषतश्चोपस्थितानामतिरिक्तानां विशेषदर्शनाक्रान्ततया अतिरिक्तान्तरोपस्थितये अवश्यं सा स्वीकरणीयेति

वाच्यं यतो रूपेषु नातिरिक्तत्वसम्भावना तेषु विशेषदर्शनात् नाप्यतिरिक्ते रूपत्वसम्भावना रूपान्यत्ररूपं द्रव्यादयो रसादयश्च न रूपं प्रसिद्धरूपभिन्नं यद्रूपभिन्नं द्रव्यं रसादि वा तत्सर्वं न रूपं रूपत्वाभाववत्त्वेत्यादिविशेषदर्शनेन तस्या अप्ययोगात् तदानीन्त्वोक्तसंशयस्य सर्वजनानुभवसिद्धत्वात् अतिरिक्तसम्भावनाया गौरवेणाप्रयोजकत्वाच्च तस्मात्तत्रैव धूमे रूपे वा धूमत्वेन रूपत्वाद्यवच्छेदेन व्याप्तेरग्रहाद् व्यभिचारसंशयो नायुक्तः। यत्तु सामान्याभावभानार्थं सा स्वीकार्य्या तां विना सकल तत्प्रतियोगिज्ञानासम्भवादिति तन्न तदभावस्य ज्ञानमात्रे लौकिकप्रत्यक्षे वा प्रतियोगिज्ञानं कारणं तत्र सामान्यलक्षणया द्रव्यत्वादिना च भाने व्यभिचाराज्ञानाभावाच्च अतएवेदन्त्वादिनोपस्थिते तमसि भावत्वाभावत्वसंशयः तेजोऽभावत्वेनोपस्थितेतदयोगात् प्रतियोगिविशेषिततज्ज्ञानन्तु विशिष्टवैशिष्ट्यबोधमर्य्यादां नातिशेते सकलप्रतियोगिविषयत्वन्तु तस्या सिद्धं प्रतियोगिज्ञानस्य हेतुत्वेऽपि प्रतियोगितावच्छेदकविशिष्ट यत्किञ्चित् प्रतियोगिज्ञानादेव तत्सम्भवात् यावत्प्रतियोगिज्ञानत्वेन गौरवेण हेतुत्वात् न च तदभावबुद्धौ तज्ज्ञानहेतुत्वात् यावत् प्रतियोगिज्ञानस्य हेतुत्वमर्थायातं सामाभावात् ध्वंसप्रागभावात्यन्ताभावाश्च प्रतियोग्यादित्रितयप्रतियोगिकाः इयागृह्णेऽप्येकगृहादेव गृह्यन्त इत्यभ्युपगमाच्च अन्धकारस्तु तेजो विशेषसामान्याभावो नाभावसमु-

द्याय: यावत्तदभावानामेकत्वासम्भवात् अननुगमाद्गौरवा-त्तेजोविशेषत्वादिज्ञानस्य तेज:सामग्र्याश्च विरहेऽपि तेजो-विशेषात्यन्ताभावप्रागभावानां प्रत्यक्षानभ्युपगमाच्च प्राग-भावप्रत्ययोऽपि च प्रतियोगिवृत्तिघटत्वादिप्रकारकज्ञान-साध्यो न प्रतियोगिज्ञानमपेक्षते। अथ घटो भविष्यतीति प्रत्यक्षं प्रतियोगिविशेषितं प्रागभावमवगाहते न च प्राची-नास्तत्प्रतियोगिनस्तत्प्रतियोगित्वावगाहने च भ्रमत्वं नचा-नागते घटे प्रत्यासत्त्यन्तरमस्ति अत: सामान्यप्रत्यासत्त्या घटत्वेनानुभूतं स्मृतञ्च तं तदालम्बते। न च चरमकारण-रूपसामग्रीव्यङ्ग्य: प्रागभावो वाच्य: अन्यदा तदप्रत्ययात्तस्या: स्वरूपसत्या: स्वरूपेण वा ज्ञातायास्तथात्वेऽतिप्रसङ्गात् व्याप्यत्वेन गृहीतायास्तथात्वं वाच्यं तथा च तद्धेतुका प्रागभावस्यानुमितिरेव तावत्कालं प्रागभावस्यासत्त्वेन प्रत्य-क्षायोगाच्चेति वाच्यं यादृशकारणकलापानन्तरं कार्य्योत्पादो दृष्टस्तद्बुद्धेरेव व्यञ्जकत्वाभ्युपगमात् अनुयोगिताविशे-षादिरूपप्रागभावत्वादे: क्वचिदप्रतीतौ तादृश्येणानुमाना-सम्भवाच्चेति चेत् भविष्यत्त्वं हि न वर्त्तमानप्रागभावप्रति-योगित्वं श्वोभाविन्यद्य भविष्यतीति प्रत्ययप्रसङ्गात् किन्तू-त्पत्स्यते भविष्यतीत्यादे: समानार्थकत्वाद्वर्त्तमानप्रागभाव-प्रतियोग्युत्पत्तिकत्वं वर्त्तमानकालोत्तरकालोत्पत्तिकत्वं वा तच्च नचेदमध्यक्षम् उत्पत्तेरतीन्द्रियत्वात् इहाद्य घटो भविष्यतीत्यादौ च तादृशोत्पत्तेर्देशविशेष: कालविशेष-

स्वाधिकरणत्वेन प्रतीयते न तु प्रागभावस्योत्पत्तिमतो वा अतएव कपालनाशजन्यघटनाशस्य घटाद्यात्मकतत्प्रागभाववत्यपि तत्र कपाले नेह घटध्वंसो भविष्यतीति बुद्धिः न वा भवने श्वः समुत्पद्य प्राङ्गणे परश्वो गमिष्यति मैत्रे प्राङ्गणे परश्वो भविष्यतीति धीः। अत्र च धातुनोत्पत्तिः प्रत्याय्यते प्रत्ययेन च धात्वर्थनिष्ठं तादृशप्रतियोगित्वं तादृशकालीनत्वं वा नङ्क्ष्यति नश्यति नष्ट इत्यादौ च प्रत्ययेन यथायथमनागता वर्त्तमानातीता चोत्पत्तिः तस्यामेव च कालविशेषादिर्विशेषणत्वेनान्वेति एतेन श्वोभाविनाशके परश्वो नङ्क्ष्यतीति नष्टे च नश्यतीति च व्यवहारः स्यात् न स्याच्च नाशस्य क्रियमाणत्वान्नष्ट इत्यादिव्यवहारः। न च तत्रातीतकालसम्बन्धित्वं वर्त्तमानत्वं वा निष्ठादेरर्थः चिरविनष्टेऽपि पूर्वेद्युर्नष्टोऽधुना वेतिव्यवहारप्रसङ्गादिति परास्तम्। कर्त्तरि विहितेनाख्यातेन कृता वा यथायथमाश्रयत्वप्रतियोगित्वलक्षणं कर्तृत्वं आश्रयप्रतियोगिरूपश्च कर्त्ताभिधीयते। कार्य्यानुत्पाददशायाञ्चाभावधीः सामयिकात्यन्ताभावमवगाहते न च प्रतियोगिसमवायिनि समयावच्छेदेनात्यन्ताभाववृत्तौ मानाभावः भाविनि नष्टे वा घटे इह कपाले घटो नास्तीति प्रत्ययात् नह्ययं घटप्रतियोगिकमभावमात्रमवगाहते यत्किञ्चिद्घटवत्यपि तादृशप्रत्ययप्रसङ्गात् परन्तु घटत्वावच्छिन्नप्रतियोगिताकं न च ध्वंसप्रागभावौ तथा सम्भवतो वा न तत्र कपाले ततः पूर्वं परतश्च बहूनां घटानां

नष्टत्वादुत्पत्स्यमानत्वाच्च। अथैवं कपालादौ कथं घटध्वंसादिशून्यताबुद्धिः अत्यन्ताभावस्य ध्वंसाद्यविरोधित्वादिति चेत् तत्तदधिकरणस्वरूपादतिरिक्तादेवाननुगतादभावाद्वा इहेदानीं घटप्रागभाव इति च प्रत्ययो न लौकानाम् अथैवं जातो घट इत्यादिवदुत्पन्नो घटध्वंस इत्यादिविलक्षणप्रत्ययबलेन नाशोऽनतिरिच्यतां ननु प्रागभावः पूर्व्वत्वतत्पूर्व्वत्वादिव्यवहारस्यातीत-कालवृत्तित्वतदुत्पत्तिकालीनध्वंस-प्रतियोगिकालवृत्तित्वादिविषयक एवास्तु दुःखात्यन्ताभावस्य स्वस्मिन्नुत्तरकालाननुवृत्तिं दुःखसाधनध्वंसं वा समुद्दिश्य क्रियाविशेषे प्रवृत्तिरस्तु मानान्तरसिद्धं हि प्रयोजनमुद्दिश्य पुमांसः प्रवर्त्तन्ते न तु प्रवृत्त्यैव तत्सिद्धिः उत्पन्नस्य पुनरुत्पादप्रसङ्गस्य लाघवात्कार्य्यादेः प्रतिबन्धकत्वेनापि निरसनीयः तदुत्पत्तिश्च महाप्रलयमनङ्गीकुर्व्वतां मते स्वाधिकरणसमयध्वंसानधिकरणसमयसम्बन्धः तदुक्तम् अध्वस्त क्षणयोगस्य क्षणयोगो जनिर्म्मतेति क्षणः समयः तदङ्गीकारे तु क्वचिदपि यदीयसमयसम्बन्धे यत्समयवृत्तिध्वंसप्रतियोगित्वं नास्ति तस्य तत्समयसम्बन्धः तदधिकरणक्षणावृत्तित्वव्याप्यस्ववृत्तिध्वंसप्रतियोगिताकसमयवृत्तित्वं वा क्षणत्वञ्च स्ववृत्तिध्वंसप्रतियोग्यनाधारत्वं स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकयावद्ध्वंसविशिष्टसमयत्वं स्ववृत्तियावद्ध्वंसविशिष्टसमयत्वं स्ववृत्तियावदभावविशिष्टसमयत्वं स्वस्वपूर्व्ववर्त्तियावत्पदार्थविशिष्टसमयत्वं वा स्वपूर्व्वत्वञ्च स्वाधिकरणयावत्कालवृत्तिध्वंसप्रति-

योगित्वं जन्यमात्रस्यैव कालोपाधित्वाददोषः यो यत्काल-वृत्तिध्वंसप्रतियोग्यवृत्तिस्तस्य तद्वृत्तित्वमुत्पत्तिरित्यपि केचिदिति चेन् नैवमपचीयते किञ्चिदस्माकमित्येकदेशिनो वर्णयन्ति। अथ पटस्य स्वानधिकरणेषु तन्तुषूत्पत्तिवारणाय सहस्रादीनां तत्तत्तन्तुत्वेन तत्तत्पटजनकत्वं वाच्यं तथा च लाघवादेक एव प्रागभावः कल्प्यते स च स्वाश्रय एव प्रति-योगिजनक इति नातिप्रसङ्गः इत्यञ्चानेकत्र प्रागभावसिद्धौ प्रागभावत्वेन प्रतियोगिजनकत्वाद्द्वितन्तुकेऽपि तत्सिद्धिरिति चेत् त्रिचतुरेष्वेव तन्तुषु उत्पन्नेषु संयुक्तेषु च तत्पटोत्पत्ति-प्रसङ्गः तावत्तन्तुवृत्तेः पटस्य कतिपयविरहे कथमुत्पत्तिरिति चेन्न कार्य्यानुत्पादस्य विना कारणविरहमनभ्युपगमात् सामग्रीसत्त्वेऽग्रिमक्षणे कार्य्यसत्त्वस्यावश्यकत्वाच्च तत्पट-प्रागभावाश्रययावत्तन्तुत्वेन तत्पटजनकत्वमिति चेत् अव-च्छेदककोटौ प्रागभावस्य प्रवेशाप्रवेशयोः कारणत्वे प्रमाणा-भावः परस्परासंयुक्तेषु कतिपयतन्तुषु तत्पटो जायेत न च तत्पटप्रागभावव्याप्ययावत्संयोगानामपि जनकत्वं कतिपय-तन्तुसंयोगेष्वतीतेषु अनागतेषु वा तत्पटानुत्पत्तिप्रसङ्गात् तत्पटप्रागभावमपेक्ष्य स एव पटो लघीयान् यावत्त्वानिरु-क्तेश्च। एतेन विलक्षणोत्पत्तिर्व्याख्यातेति। परे पुनरिहेदानीं घटध्वंस इतिवदिहेदानीं घट प्रागभाव इति साधारणमेव लोकानां प्रत्यक्षं कल्पयन्तस्तद्बलेन प्रागभावं सामान्यलक्ष-णाञ्च व्यवस्थापयन्तो वर्णयन्ति। अव्याप्यवृत्तेः कार्य्यस्य

द्वितीयक्षणे धारावाहिकस्थले च प्राथमिकनिर्विकल्पकस्य चतुर्थक्षणे उत्पत्तिवारणाय एकावच्छेदादिना कार्य्याभावस्योत्तरज्ञानाभावस्य च कारणत्वं वाच्यं तथा च लाघवात् प्रागभावस्य तत्त्वं कल्प्यते स्वभावाधीनत्वाच्च तत्प्रादेशिकत्वात्प्रदेशनियमः संयोगादीनामिति। अन्ये तु सर्वत्र तत्तत्संख्यादिविशेषाणां विशिष्य हेतुत्वोपगमेनैव तत्तद्द्रव्योत्पादनियमसम्भवेऽपि युगपदुत्पन्नेषु नित्येषु च द्वित्वाद्युत्पत्तिनियामकत्वेन प्रागभावः कल्प्यत इत्याहुः। यत्तु ज्ञानेच्छाकृतीनां कार्य्यकारणभावग्रहो न तदुपस्थितिं विनेति न चेच्छाकृतिकाले ज्ञानेच्छासाक्षात्कारो योग्यविशेषगुणयौगपद्यस्यात्मनि निषेधात् अतो ज्ञानाद्यन्तरसाक्षात्कार एव ज्ञानत्वादिनेच्छाजनकज्ञानादिकं गृह्णातीत्यभ्युपेयमिति तन्न पौर्वापर्य्यापरिचये धर्मिस्वरूपग्रहेऽपि कारणत्वग्रहासम्भवात् इच्छाकृत्यनुत्पादस्थले ज्ञानेच्छयोः साक्षात्कारात् ज्ञानेच्छासामान्यव्यतिरेकनियतेच्छाकृतिव्यतिरेकग्रहे मनसा कार्य्यकारणभावग्रहस्यावश्याभ्युपेयत्वात् कृत्यनुत्पादस्थले ज्ञानेच्छयोः कृत्यनन्तरमिच्छाकृत्योः समूहालम्बने साक्षात्कारस्य स्मरणेन च ज्ञानानुमानस्य च सम्भवात् विंशत्यङ्गुल्यवच्छेदेन युगपद्विंशतिप्रयत्नोत्पादवदिच्छाकृतिकाले ज्ञानोत्पादस्याविरोधाच्च गोत्वे च गोनिष्ठात्यन्ताभावाप्रतियोगित्वेन समवेतत्वेन च विशेषितमविशेषितं वा गवेतरासमवेतत्वं व्याप्यतावच्छेदकं नतु सकलगोवृत्तित्वविशे-

षितं सामान्यलक्षणयापि गृहीतुमशक्यत्वात् । ननु समानविषयकत्वेनापीति स्यादेतत्समानप्रकारतामात्रस्य प्रयोजकत्वे क्वचिदेव रजतत्वप्रकारिकेच्छा क्वचिन्नेति नियमो न स्यात् तादृशप्रकाराश्रय एव तदुत्पादोपगमे कथमरजते रजतत्वप्रकारिकेच्छा अनुपस्थिते चासंसर्गाग्रहोऽपि न नियामकः वस्तुतोऽसंसर्गाग्रहमपेक्ष्य लघीयसस्तद्विषयतामात्रस्यैव नियामकत्वमुचितम् सामान्यतश्च तदिच्छायां व्यवस्थितहेतुभावस्य तद्विषयकज्ञानस्य तत्प्रकारकत्वमवच्छेदकं कल्प्यते लाघवात् । अस्तु वा समानप्रकारकत्वेन व्यवस्थिते कार्य्यकारणभावेऽतिप्रसङ्गभङ्गाय सामानाधिकरण्यमिव समानविषयत्वमपि प्रत्यासत्तिः । असंसर्गाग्रहादेः कारणतामपेक्ष्य समानविषयत्वस्यावच्छेदककोटिनिवेशोऽपि लघीयान् कारणयथार्थत्वायथार्थत्वाधीनस्तु कार्य्यस्य तथाविधो विशेषः एतेन रजतत्वप्रकारकेच्छायां तत्प्रकारकं ज्ञानं संवादिन्यां तस्यां दोषाभावसहितं विसंवादिन्यान्तूपस्थिता रजतगतभेदा ग्रहसहितं हेतुरिति परास्तम् त्वद्दिशापि च संवादिन्यामुपस्थितरजतभेदाग्रस्यैव हेतुत्वौचित्यात् दोषाणां रजतभेदग्रहप्रतिबन्धकानामभावमपेक्ष्य लघुत्वात् । अत्राहुः सिद्ध एव सुखे सुखत्वेन रूपेणेच्छालाघवात् तत्प्रकारकेच्छायां तत्प्रकारावच्छेदेन सिद्धत्वज्ञानमेव हि विरोधि न च तत्प्रकृते तमस्ते इच्छोत्पत्तेस्त्वयाप्यनङ्गीकारात् कथमन्यथा चिरप्रोषितस्याज्ञातकान्तामरणस्य तत्कान्तावलो-

कमादाविच्छा ज्ञातावलोकनादीनां सिद्धत्वज्ञानात् अति-
रिक्तस्य चासत्वादित्यादिबहुतरमूहनीयम्। अथ सिद्धत्व-
निश्चयाभावापेक्षया लाघवादसिद्धत्वज्ञानमेव हेतुः। न च
सिद्धत्वेन ज्ञाते तत्सम्भवतीत्यसिद्धत्वज्ञानार्थं सामान्यलक्ष-
णेति चेन्न विशेषरूपावच्छेदेन सिद्धत्वेन ज्ञात एव सामा-
न्यरूपेणासिद्धत्वग्रहसम्भवात्तदेकं ज्ञानं ज्ञानद्वयं वेत्यन्य-
देतत् सामान्यलक्षणासहस्रेणाप्यसिद्धत्वस्य ज्ञातुमशक्यत्वाच्च।
वस्तुतस्तु सामान्यलक्षणां विनाप्ययं कालः सुखप्रागभाववान्
सुखोत्पादकालीनध्वंसप्रतियोगी वा कालत्वादेतादृशकाल-
त्वाद्वेत्यनुमानादसिद्धसुखस्य तदसिद्धत्वस्य च ज्ञानं सुलभमेव
निपुणतरमुपपादयिष्यते चेदं शब्दमणिदीधिताविति कृतं
पल्लवितेन। घटः स इत्यादि संशयसमानाकारो हि नि-
श्चयस्तद्विरोधी घटो न वेति संशयः कोटितावच्छेदके
घटत्वांशे निष्प्रकारकश्च न च प्रमेयवानिति प्रत्ययस्तथा
अतएव जातिमानिति निश्चयेऽपि घटो न वेति संशयः घटत्व-
वान्निश्चयस्तु घटेतरावृत्तित्वविशिष्टमवगाहमानो घटान्यतास-
न्देहं विरुणद्धि पुरुषावृत्तित्ववक्रकोटरादिनिश्चय इव पुरुषत्व-
संशयम्। स्वसामग्रीविरहादिति घट इति निश्चयं प्रति-
घटत्वांशे निर्विकल्पकं ज्ञानं कारणं जातित्वादिना घटत्व-
ज्ञानेऽपि तदनुदयात् सामान्यलक्षणायाश्च सामान्यप्रकारक-
ज्ञानजनकत्वनियमात् विशिष्टज्ञानसामग्रीसत्त्वात्।

प्रसङ्गादुपाधिं निरूपयितुमाह उपाधीति सोपाधौ

साध्यत्वसाधनत्वे न सम्भवतः अतोऽभिमते इति यो यद्व्यापकत्वे सति यद्व्यापकः स तत्रोपाधिरिति निर्गलितोऽर्थः व्यापकत्वाव्यापकत्वे एकरूपेण विवक्षिते नत्रूपाधिः साध्यव्यापकत्वं साध्यानिष्ठव्याप्तिनिरूपकत्वं सा च यावदुपाधिव्यापकव्यापकत्वरूपानौकाधिकत्वज्ञानादेव ग्राह्या उपाधिव्यापकयावदर्थान्तर्गतस्य चोपाधेः साध्यव्यापकत्वग्रहस्य साध्यनिष्ठ व्याप्तिग्रहादित्यन्योऽन्याश्रय इत्यत आह अनौपाधिकत्वेति व्यापकत्वं व्याप्तिनिरूपकत्वं साचानौपाधिकत्वग्रहाद्ग्रहीतव्या तत्प्रविष्टव्याप्तिज्ञानमपि अनौपाधिकत्वान्तरग्रहादित्यनवस्थेत्यत आह अनौपाधिकत्वेति अन्योऽन्याश्रयपदमनवस्थापरमिति सम्प्रदायः। अव्याप्यवृत्तिनां व्यापकत्वमुपपादयितुमाह प्रतियोगित्वञ्चेति तदधिकरणानधिकरणत्वन्तदधिकरणाधिकरणत्वविरोधि यत् प्रतियोगित्वं प्रतियोगिव्यधिकरणाभावप्रतियोगित्वं तदिह ग्रहीतव्यम् प्रतियोगिव्यधिकरणत्वेनाभावो विशेषणीय इति फलितोऽर्थः। साधनेति अनयोरसङ्करोऽग्रे दर्शयिष्यते। पक्षेतरेति पक्ष इतरो यस्मादिति बहुव्रीहिः भावप्रधानश्च निर्देशः। पक्षमितरयति व्यावर्त्तयतीति व्युत्पत्त्या तदवृत्तिधर्म्मवचन इत्यपि कश्चित्। तादात्म्येन धर्म्मिण एव व्यापकत्वमिति तु परमार्थः अतएवाग्रे पर्व्वतेतरान्यत्वादिति साधु सङ्गच्छते इतरथा तु व्यापकाभावस्यैव व्यापकवह्न्योऽन्याभावस्यापि गमकत्वमाश्रित्य सङ्गमनीयम्। व्यतिरेक इति यद्यपि

व्यापकाभावमुद्रया गमकत्वे तथावैयर्थ्यं न दोषाय तथापि वास्तववैयर्थ्यशून्यत्वमेव विशेषणं देयमिति भावः। यत्तु ययोर्व्यतिरेकव्याप्तिस्तयोरेव व्याप्यवृत्तिव्यतिरेकिणोरन्वयव्याप्तिरिति नियमः इह तु व्यर्थविशेषणतया व्यतिरेके व्याप्त्यभावादन्वयेऽपि न तथा अतः साध्याव्यापकत्वान्नायमुपाधिरिति भाव इति तन्न अहेतुकत्वशरीराहेतुकत्वयोर्व्यभिचारात् एवमपि संयोगादौ केवलान्वयिनि च साध्ये पक्षेतरातिव्याप्तितादवस्थ्याच्च। वस्तुगत्येति तथा च पक्षे साध्यवति तदितरत्वं साध्याव्यापकं तद्रहिते च बाधोन्नीतत्वादुपाधिरेवेति भावः। यद्विषयतया ज्ञानस्य प्रतिबन्धकत्वं तदेव प्रकृते उपाधित्वं वाच्यं नान्यदनुपयुक्तत्वात् तच्चेदुक्तं रूपं तदा तद्वत्तया पक्षेतरस्यापि ग्रहादनुमितिमात्रोच्छेद इत्यभिप्रायवानाह अस्त्विति। उपाधिमात्रमिति सत्प्रतिपक्षोन्नायकतया दूषकत्वमिति मते इतरथा तु पक्षाप्रवृत्त्युच्छेदो बोध्यः। विपक्षेति विपक्षव्यावर्त्तकधर्मान्तरविशिष्टपक्षेतरत्ववारणाय निषेधद्वयगर्भता विपक्षाव्यावर्त्तकविशेषणानवच्छिन्नसाध्यव्यापकत्वमात्रेण व्यापकत्वशालित्वं तद्विवक्षितमित्याशङ्क्य पक्षेतरत्वस्योपाधित्वमनङ्गीकुर्वतस्तव मते नातिव्याप्तिरभिहिता वस्तुतो दूषकताप्रयोजकरूपवतस्तस्यानुपाधित्वाभ्युपगमस्तद्वारणाय च विशेषणोपादानं इयमपि न युक्तमित्यभिप्रायवानाह तथापीति तावन्मात्रस्य साध्यव्यतिरेकोन्नयनक्षमसाध्यव्यापकतामात्रस्य दूषकत्वादोषो-

न्नयनोपयोगित्वात्। जातित्वादिति। तदुत्तरस्येत्यादि। उपाधित्वाभावेऽपीति उपाधित्वानङ्गीकारेऽपीत्यर्थः। दूषकतावीजसत्त्वे तस्योपाधित्वं दूषकतावीजञ्च न व्यभिचारादेरुन्नायकत्वम् अपि तु सत्प्रतिपक्षस्य तच्च नास्तीत्यतो न स उपाधिरिति शङ्कते अथेति व्यभिचारोन्नायकतया व्यभिचाराद्युन्नायकतया अव्याप्यत्वया अव्याप्यत्वादिना अव्याप्यत्वमव्याप्यत्वादि। सत्प्रतिपक्षान्तरवदिति व्याप्तिपक्षधर्म्मतारूपबलसत्त्वे नैकेनापि बहूनां प्रतिरोधसम्भवात् बहुत्वस्याबलत्वात् यत्र प्रमाणतत्त्वबोधादौ बहुत्वमपि बलमुक्तं तत्र सत्प्रतिपक्षतायां किन्त्वेकत्वाङ्गभङ्गप्रसङ्गे बहुषु तत्कल्पनागौरवमेकत्र च लाघवमिति तर्कोत्थापकतयेति नोपाधेः सत्प्रतिपक्षोत्थापकतया तत्र दूषणत्वसम्भव इति भावः एवं सत्प्रतिपक्षोन्नायकतया दूषकत्वे बाधस्यानिश्चयेऽसाधारण्यानिश्चये च वैयर्थ्यात् माभूत् सोऽप्युपाधिरित्यभिप्रायेण शङ्कते नन्विति। हेतुमतीति नचासङ्कीर्णबाधस्थले व्यभिचारः प्रतियोगिव्यधिकरणसाध्याभावस्यैव प्रकृते बाधत्वात् तदनभ्युपगमाद्वा। अतेजस्त्वं विनेति तत्समग्रीत्वं विना शुद्धसाध्यव्यापकस्योपाधेरभावादित्यर्थः तेन भास्वररूपशून्यत्वादेरूपवत्तावच्छिन्नसाध्यव्यापकगुरुत्वादेश्च सत्त्वेऽप्यदोषः नचैतद्व्यतिरेकोनासाधारणः पक्षे साध्यस्यासिद्धौ सपक्षाभावात् सिद्धौ तु तत्रैव सपक्षे वर्त्तमानत्वादिति वाच्यं पक्षमात्रवृत्तिरसाधारण इत्यभिप्रायात् जलादावुष्णत्वभ्रम-

दशायां तथात्वमित्यपरे । ग्रीष्मोष्मणि तेजस्त्वाग्रहदशाया-मप्रतीतसाध्यतदभावसहचाररूपत्वमसाधारण्यमित्यन्ये । अ-साधारणे हि साध्यसहचारग्रहप्रतिबन्धेन व्याप्तिग्रहप्रतिबन्धः व्यतिरेकव्याप्त्यादरे तु साध्यतदभावयोर्द्वयोरपि तदविशेषात् सत्प्रतिपक्षो दूषकताबीजम् । नचेहाद्योव्यतिरेकित्वात् न द्वितीयः सत्प्रतिपक्षे तदनवकाशात् अतः पक्षेतरोऽपि सत्प्रतिपक्षोन्नायकतयोपाधिरेवेत्याह व्यतिरेकिणीत्यादिना । नन्वेवं प्रागुक्तरीत्या व्यभिचारा-द्युन्नायकत्वस्य सत्प्रतिपक्षेऽनुद्भावनीयत्वापत्त्या च सत्प्रतिपक्षोन्नायकत्वस्य दूषकतायामबीजत्वे उपाधिदूषणमेव न स्यात् बीजाभावात् अत आह तस्मादिति । तदुक्तमुपाधेर्व्यभिचारशङ्कैवेति भवतु वा पक्षेतरो नोपाधिः उपादेयताञ्च तद्व्यावृत्तये विपक्षाव्यावर्त्तकेत्यादिकं विशेषणं तथापि लक्षणमति व्यापकमेव अणवो जन्याणवो वा सकर्तृकाः कार्य्यत्वादित्यादावनणुत्वादौ । ननु व्यभिचाराद्युन्नायकतामात्रेणोपाधित्वे व्यापकव्यभिचारित्वादावतिप्रसङ्ग इत्यत आह तथेति तथा तेन रूपेण स्वव्यभिचारेण स्वव्यतिरेकेण वा दूषकतायां व्यभिचारस्य सत्प्रतिपक्षस्य वोन्नायकतायामतिप्रसङ्गभञ्जिकायां साध्यव्याप्यत्वस्य व्यर्थत्वात् साधनाव्यापकधर्म्मस्योपाधित्वे साध्यान्वयव्यतिरेकोन्नायकान्वयव्यतिरेकशालित्वरूपं साध्यप्रयोजकत्वं नियामकम् अन्यथातिप्रसङ्गादित्याशङ्कते अथेति

अभवतोऽसतः भवतः सतः। व्यर्थत्वादिति नचैवं पचेतरत्वेऽतिप्रसङ्गः तत्रापि पचेतरसाध्यवत्त्वादावतिप्रसङ्गात्। विषमव्याप्तस्यानुपाधित्वे योगाभावं नियामकमाशङ्कते नन्विति उप समोपवर्त्तिनि आदधाति स्वीयं धर्म्ममित्युपाधिः यद्धर्म्मबोधकशब्दसमभिव्याहारेण चोपाधिपदं प्रयुज्यते तद्धर्म्मसंक्रामकत्वं तद्बोधयति यथा स्फटिकलौहित्ये जवाकुसुममुपाधिरित्यत्र लौहित्यसंक्रामकत्वं प्रयुज्यते च शास्त्रे व्याप्यत्वबोधकशब्दसमभिव्याहारेण तत् यथात्र साधने असावुपाधिरित्यतो व्याप्तिसंक्रामकत्वलाभः। यदभाव इति अस्ति तावदिह हेतावुपाधिर्नेह हेतावुपाधिरिति प्रतीतिर्व्यवहारश्च तावालम्ब्य चेदं लक्षणवाक्यं तत्र यदि साधने उपाधिव्यभिचाराव्यभिचारौ तदव्याप्यत्वव्याप्यत्वे वा यदि वा तेन सम्बन्धेन तद्वृत्त्यवृत्ती एव तदालम्बनमुभयथापि नेह क्षतिः यदभावशब्देनापि तथैव वक्तुं शक्यत्वात् तदभावस्य च व्यभिचारविरोधित्वं तत्सत्त्वेऽवश्यं व्यभिचार विरहस्तद्विरहिणि धर्मे चावश्यं व्यभिचारकत्वं तत्सत्त्वेऽवश्यं व्यभिचार विरहः व्यभिचारविरहिणि धर्मे चावश्यं तत्सत्त्वमिति वा ईदृशश्च विरोधो न विषमव्यापकाभावस्य तत्सत्त्वेऽपि व्यापकएव व्यभिचारसत्त्वात् नापि विषमव्याप्याभावस्य साध्यएव तद्विरहेऽपि व्यभिचाराभावात् तादृशधर्मस्य चोक्तसम्बन्धेनोक्ततत्सम्बन्धस्य वा यत्र वृत्तिस्तत्रायमुपाधिः स एव च सोपाधिः अतएव तदभावलक्षणमनौपाधिकत्वं व्याप्तिरिति गीयते विरो-

धघटकद्लद्वये च एकैकस्य व्याप्तिशरीरघटकता दूषकता वा न स्यादित्युभयोपादानमिति सर्वं सुस्थम्। यदि च समव्याप्ताकाशोभयमात्रवृत्तिधर्म्मेणाकाशस्योपाधित्वं वारणीयं तदा यत्पदं वृत्तिमत्परं बोध्यम् अत्र च व्यभिचारस्य घटकत्वेऽग्रे प्रमेयत्वपदं व्यतिरेकिधर्म्मोपलक्षकम्। अथैतादृशो- पाध्यभावस्य व्याप्तिलक्षणत्वे यत्र व्यभिचारिणि नैतत्सम्भव स्तत्रातिव्याप्तिः तस्यात्यन्तासत्त्वेनाभावानिरूपणे तु तत्तत्- सङ्केतावव्याप्तिरत आह व्यभिचारे चेति यस्य यद्व्यभिचा- रस्य यद्व्याप्यत्वस्य वा अभावः साध्यव्यापके व्यभिचारवि रोधी स साधनाव्यापक उपाधिरित्यपि वदन्ति। यद्व्यभि- चारित्वाभावः साधने साध्यव्यभिचाराभावापादकः स साध्य- व्यापक उपाधिरित्यपि केचित्। न तु यद्व्यतिरेक इति यद्व्यतिरेकेऽनुमितिप्रयोजकं रूपं व्याप्त्याद्यन्यतमं भवत्येव यथा असिद्धिव्यतिरेके सिद्धिरित्यर्थः। विरुद्धत्वादेरिति विपक्षमात्रगामित्वसपक्षविपक्षगामित्व लक्षणविरोध-व्यभिचा- रयोरेकैकविरहेऽपि व्याप्तेरनियमादित्यर्थः यत्र पक्षे हेतु- मति च साध्यं हेतुश्च पक्षावृत्तिस्तत्रैकः पक्षावृत्तिर्हेतु- समानाधिकरणः अपरश्च पक्षनिष्ठः साध्यवति हेत्वसमा- नाधिकरणः हेत्वसमानाधिकरण एव वा उपाधिस्तत्र साधन- पक्षधर्म्मावच्छिन्नसाध्यव्यापकयोरसङ्करो बोध्यः यथा घट- प्रत्यक्षो नित्यद्रव्यत्वा द्विभुत्वादित्यादौ साधनावच्छिन्न- साध्यव्यापकमात्मत्वं पक्षधर्म्मावच्छिन्न साध्यव्यापकमुद्भूत-

रूपवत्त्वं प्रत्यक्षस्पर्शाश्रयत्वं वा मिथोऽसङ्कीर्णमुपाधिः । अश्रावणत्वेति । घटो मेयो द्रव्यत्वादित्यादौ गन्धवत्त्वाद्यवच्छिन्नसाध्यव्यापकपृथिवीत्वादावतिव्याप्तिर्द्रष्टव्या । नवानेन रूपेण ज्ञातस्य दूषकत्वमित्याह आर्द्रेन्धनेति । पक्षधर्मेति विरुद्धस्थलीयोपाध्यव्याप्तिरपि द्रष्टव्या । साधनावच्छिन्नेति स्वावच्छिन्नेत्यर्थात्साधनवतीति विशेषणाद्वा न व्यभिचारः । ननु शुद्धसाध्याव्यापकस्थल एवासिद्धिशङ्कानिरासायावच्छेदकांशोऽपि निवेशनीयोऽखण्डाभावस्य घटकतया च न वैयर्थ्यं येन रूपेणोपाधिता विशेषणवति तद्रूपावच्छिन्न व्यभिचारस्यैव वा हेतुत्वं शुद्धसाध्यव्यापकस्थले तु साध्यव्यापकव्यभिचारो व्यापकतावच्छेदकार्द्रेन्धनत्वाद्यवच्छिन्नव्यभिचारो वा हेतुरूपन्यसनीयः प्रायशस्तद्धर्मवति तद्धर्मविशिष्टसाध्यव्यापकव्यभिचारित्वस्य हेतुत्वेऽपि न वैयर्थ्यं अखण्डाभावस्यातिरिक्तत्वात् वस्तुतस्तूपाधिना असाधकत्वासाधनेऽपि न क्षतिः उद्भावितयावद्दोषेणैव तत्साधनीयमिति नियमाभावात् तद्ग्रीतव्यभिचारेण तत्साधनसम्भवात् । सन्दिग्धोपाधिसमशील: सन्दिग्धो व्यभिचार इत्यत आह किञ्चेति । केवलेति तथा च केवलस्यैव साध्यस्य व्यभिचारो व्यतिरेको वा जिज्ञासितो विरोधित्वात् न तु विशिष्टस्याविरोधित्वादिति भावः उद्भाव्यो विशेषणाव्यभिचारित्वे सति विशिष्टसाध्यव्यभिचारेण साधनीयः तत्र विशिष्टसाध्यव्यभिचारेऽसिद्धावुद्भावितायां तत्सिद्धये उपाधिरुद्भाव्य इति । तहीति प्रकृतानु-

मिति विरोधिशुद्धसाध्यव्यभिचारा साधकत्वादिति भावः। अथ वक्ष्यमाणरीत्यावच्छिन्नसाध्यव्यापकेनाप्युपाधिना आहत्यैव साध्यव्यभिचारः साधनीय इत्यत आह किञ्चेति पक्षधर्मावच्छिन्नेत्यादिकमुपाधिमात्रव्यभिचारोपलक्षकं न प्राधान्येनोपाधिर्व्याप्त्यादिविरहेणाहेतुत्वात्। पर्य्यवसितेति अत्र लक्ष्यतानियामकं दूषकताबीजं सत्प्रतिपक्षोन्नायकत्वं व्यभिचारोन्नायकत्वस्य तत्त्वे साध्यवत्पक्षावृत्तौ व्यभिचारोन्नायकेऽव्याप्तेः वक्ष्यमाणकृतकत्वोपाधेरदूषकत्वापत्तेश्च न हि तद्व्यभिचारेण हेतौ शुद्धसाध्यव्यभिचारः शक्योन्नयनो बाधानवतारदशायां तादृशव्यभिचाराप्रसिद्धेः न च पर्य्यवसितसाध्यव्यभिचारः साध्यव्याप्यताबोधविरोधीति नचैवमपि कथं तत्र सङ्केतावुपाधिसम्भवो मीमांसकमतेन तदभिधानात् शब्दशब्दयोर्भावप्रधानत्वाद्वा पक्षतावच्छेदकादेरुपाधितावारणाय पक्षावृत्तित्वे सतीति विशेषणीयम्। यदि चेति एतच्च स्वतन्त्रकृतकत्वसाधनदशायां बोध्यम् अनित्यत्वसाधनोपयोगितया तु कृतकत्वसाधने द्वयोरपि सन्दिग्धत्वे नैकतरव्यतिरेकस्यान्यतरव्यतिरेकासाधकत्वात्। एवं हीत्यादि असमवेतत्वेन द्रव्यासमवेतत्वेन वा अर्थान्तरवारणाय सावयवत्व इति साध्ये द्रव्यपदं नित्यद्रव्यवृत्तितायाः स्फुटतरसिद्ध्यर्थं द्रव्यसमवेतेऽनित्यद्रव्यासमवेतत्वस्य नित्यद्रव्यसमवेतत्वमादाय पर्य्यवसानात् हेतौ च जन्यपदं परमाणुनित्यत्वासिद्धिदशायामाकाशादौ व्याप्तिग्रहाय विशिष्टाभावस्यातिरिक्तत्वान्न

वैयर्थ्यं नित्यमहत्त्वव्यावृत्तानित्ययावन्महत्त्ववृत्तिजातिपरि-
चयाय तदिति तु न तादृशजातौ मानाभानात् वैभवा
पेक्षिकापकर्षव्यवहारस्याननुगतजातिभिरेव सम्भवात् तुल्य-
न्यायतया त्र्यसरेणुमहत्त्वापेक्षिकोत्कर्षेणैकजात्या सङ्कर प्रस
ङ्गाच्च । निःस्पर्शेति साध्यापाध्योर्व्याप्तिदार्ढ्यप्रदर्शनाय द्रव्य-
पदं गमकता तु तेन विनापि पर्य्यवसितसाध्यसमव्याप्त एवो-
पाधिरिति मतेनेदमित्यपि कश्चित् । ननु भवतां शुद्धसाध्य-
व्यापकस्पर्शवदसमवेतत्वं कथं नोपाधिः अनवस्थाभिया कस्य-
चिन्निरवयवस्य स्पर्शवतः सिद्धौ तत्समवेतद्रव्ये साध्याव्याप-
कत्वादिति चेत् तुल्यं ममापीत्यत आह किञ्चेति सोपाधौ
सोपाधितया निश्चिते । ननु लभ्यत्वं लाभयोग्यत्वं पक्षे यादृशं
साध्यं सेद्धुमर्हति तद्व्यापकत्वे सति पक्षावृत्तित्वं पक्षे साध्य
सिद्धिविरोधिव्यापकताशालित्वमिति यावत् स्वव्यतिरेकेण पक्षे
साध्यसिद्धिविरोध्युन्नायकत्वमिति तु निर्गलितोऽर्थः । भवति
च शब्दधर्म्मातिरिक्तधर्म्मरहिते शब्देऽनित्यत्वाभावसिद्धिर्यथोक्त-
साध्यसिद्धिविरोधिनी तथा साधनादिमति साधनाद्यवच्छि
न्नसाध्याभाव सिद्धिरपि । वस्तुतस्तु पक्षधर्म्मावच्छिन्नसाध्य-
व्यापकत्वे सति पक्षावृत्तित्वमेवोपाधित्वं सिध्यति च विशेष-
णवति विशिष्टसाध्यव्यापकव्यतिरेकेण शुद्धसाध्यव्यतिरेकः
तादृशस्य साधनव्यापकः संग्राह्यो व्यभिचारोन्नायक इव
पक्षवृत्तिरितरेषाम् अपरेषां सत्प्रतिपक्षोन्नयनक्षमस्य साध
नव्यापकस्यैवास्माकमपि व्यभिचारोन्नायकस्य पक्षवृत्तेरसंग्रहा

न दोषाय परेषां साधनभेदादिवास्माकमपि पक्षभेदादुपाधिभेद इति चेदत्र वक्ष्यते ग्रन्थकृतैव। लक्ष्यतावच्छेदकमाह यद्व्यभिचारित्वेनेत्यादि उन्नीयत इति शेषः उन्नायकत्वं तद्योग्यता सा च व्याप्तिपक्षधर्म्मतेति तथाच यद्व्यभिचारो यद्धर्म्मावच्छिन्नाभावाधिकरणीभूत यत्किञ्चिदधिकरणवृत्तित्वं साध्यव्यभिचारव्याप्यं साधनवृत्ति च तद्धर्म्मावच्छिन्नं तत्रोपाधिरित्यर्थः तेनार्द्रेन्धनाभाववद्वृत्तित्वेन वह्नौ धूमव्यभिचारसाधनेऽप्यार्द्रेन्धनं द्रव्यत्वादिना न तत्रोपाधितद्रूपावच्छिन्नाभाववद्वृत्तित्वस्य वह्न्यवृत्तित्वात् शुद्धसाध्यव्यापके तदभाववन्मात्रवृत्तित्वं साध्यव्यभिचारव्याप्यम् अवच्छिन्नसाध्यव्यापके त्ववच्छेदकाधिकरणीभूततदभावाधिकरण वृत्तित्वमित्युभयत्रापि सङ्गतिः। द्रव्यत्वेन रूपवत्त्वे न साध्ये सत्ताद्रव्यत्वजलत्वमात्रविशिष्यिका या धीस्तद्विशेष्यत्वे जलसमवेतनित्यत्वे वा सति पृथिवीत्ववद्वृत्तित्वादित्यादिना प्रकारेण व्यभिचारोन्नयनसमर्थोऽपि पृथिवीत्वाभावादिर्नोपाधिः। न हि पृथिवीत्वात्मक तदभावाधिकरणं तादृशं किञ्चिदस्ति यद्वृत्तित्वसामान्यं साध्यव्यभिचारव्याप्यम् पृथिवीत्वादाविव व्यभिचारात् न च व्यभिचारोन्नायकतामात्रेण प्रकृतोपाधितानिर्वाहः अपि तु कथकानां तान्त्रिकाणाञ्च तथाविधव्यवहारविषयत्वेन तदवच्छेदकञ्च यथोक्तं रूपं व्याप्यत्वासिद्ध्युन्नायकत्वादिकं सम्भवदपि न तथा गौरवात् अत एवेदं जलमाकाशादित्यत्र स्वाव्याप्यत्वेन जलत्वाव्याप्यत्वोन्ना-

यकस्यापि द्रव्यत्वादेरसंग्रहो न दोषाय अथैवं स्वव्यभिचारेण व्यभिचारोन्नायकत्वमेव तथास्तु लाघवात् तच्चोक्तोपाधाव-प्यस्तीति चेदेवं तर्हि साध्याभाव साधनोभयाधिकरण-वृत्त्यभावप्रतियोगित्वमेव तथास्त्वतिलाघवात् अस्तु च सहार्थ तृतीयाश्रयणेनास्यापि स एव फलितोऽर्थः एतद्रूप-मात्रज्ञाने तेषां नोपाधिव्यवहार इति चेन्नत्वं त्वदुक्तेऽपि अतएव शुद्धसाध्याव्यापकस्थले साध्ये व्याप्यतावच्छेदकं नियम-तस्तादृशं धर्ममनुसरन्ति ते यद्वति साध्यव्यभिचारनियमो भवत्युपाधिव्यभिचारस्य वस्तुतस्तु यदभावेन यद्वदन्यत्वेन वा साधनवति साध्याभाव उन्नीयते स उपाधिर्लाघवात् अतएव जलत्वतेजस्त्वयोर्न तदुभयत्वेन क्वचिदप्युपाधित्वम् यद्व्यभिचा-रित्वेनेत्यस्यापि स एवार्थः तथाहि यद्व्यभिचारित्वेन हेतु-मद्वृत्तित्वविधया साधनस्य पक्षतावच्छेदकीभूतस्य साध्याभाव रूपसाध्यवत्पक्षवृत्तित्वं सिध्यतीति अत्र च साध्यसमानाधिक-रणत्वेनावच्छिन्नो धर्मो साध्यासमानाधिकरणार्द्रेन्धनादि व्यक्तेरार्द्रेन्धनत्वादिनोपाधित्वे पुनरवच्छेदकधर्म्म एव साध्य-समानाधिकरणवृत्तित्वेन विशेषणीयः तेन जलह्रदत्वाभावा-धिकरणायोगोलकवृत्तित्वस्य धूमव्यभिचारव्याप्यस्य वह्निवृत्ति-त्वेऽपि जलह्रदत्वादौ नातिप्रसङ्गः न वा द्रव्यत्वेन तेजस्त्व-साधने शीतस्पर्शजलत्वाद्यात्मकास्वाभावेन तद्वदृत्तित्वेन वा द्रव्ये द्रव्यत्वे वा साध्याभावस्य व्यभिचारस्य वा साधके स्पर्शा-भावजात्यभावादौ द्रव्यत्वादिना तु कम्बुग्रीवादिमत्त्वादौ

साध्ये स्वव्यभिचारेण स्वाभावेन वा हेतौ तद्वति वा व्यभिचारस्य साध्याभावस्य वा साधकं घटत्वादि व्यभिचारित्वमुपाधिरेव घटत्वादेस्तदभावस्य वा गमकत्वेऽपि धूमप्रागभाववद्वैयर्थ्यं न चाभावस्यानुपाधितापत्तिः प्रतियोगिनस्तद्वृत्तित्वस्यैव वा हेतुत्वादिति वाच्यम् तस्याप्रवेशेऽपि वस्तुतो यस्तदभावस्तस्य तद्वृत्तित्वस्य च हेतुत्वानपायात् तदभावाभाववद्वृत्तित्वेनोपस्थितावपि तद्वृत्तित्वेनानुपस्थितेर्व्यभिचारसाधने न वैयर्थ्यमित्यपि वदन्ति। लक्षणमाह पर्य्यवसितेत्यादि। पर्य्यवसितपदार्थमाह वह्न्नीति यत्र्धीवतोऽस्यर्थः। नन्वेवं सद्धेतौ सपक्षैकदेशवृत्तिधर्मोऽतिप्रसङ्गः अथ यद्धर्मावच्छेदेन साधनवति साध्यं प्रसिद्धं तद्धर्मावच्छिन्नसाध्यव्यापकत्वं साध्यसामानाधिकरण्यव्यापकत्वमिति यावत् विवक्षमाने चोपाधिविरहेऽपि न क्षतिः लक्ष्यतावच्छेदके च साध्यसमानाधिकरणत्वेन साधनं तादृग्वृत्तित्वेन वा साधनतावच्छेदकं विशेषणीयम् साधनव्यापकीभूतधर्म्मावच्छिन्नसाध्यव्यापकत्वं वा विवक्षितं विरुद्धेऽपि साधनव्यापकेनान्ततोऽन्यतरत्वादिनावच्छिन्नस्य साध्यस्य व्यापकत्वमस्त्येवोपाधीनां प्रमेयत्वादिना च वाच्यादौ प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वादिकं नोपाधिः लक्ष्यतावच्छेदकवाक्यस्य प्रयोजकत्ववाचि तृतीयाबलाद्यद्व्यभिचारस्थले साधनस्य साध्यव्यभिचारित्वनियम इत्यर्थे पर्य्यवसानात् मैवम् जनकत्वेन वह्नौ कार्य्यानुकूलत्वाद्यात्मकशक्तिसाधने बहिरिन्द्रियाप्रत्यक्षत्वस्योपाधेर्ग्रन्थकृतैवोद्भावयि-

ग्यमाणत्वात् तस्य च गुरुत्वात्मकसाध्यस्य साधनस्य चाधि-
करणे घटादाववृत्तेरुक्तरूपाभावात् एवंविधबहुलग्रन्थविरो-
धात् दूषकताबीजस्य तत्रापि सम्भवाच्च। अत्राहुः यद्धर्म्माव-
च्छिन्नसाध्यव्यापकत्वं तद्धर्म्मावच्छिन्नसाधनाव्यापकत्वम्
अवच्छेदकत्वञ्च सामानाधिकरण्येन न च तद्घटोत्पत्ति-
कालीनत्वसामानाधिकरण्यविशिष्टरूपवति तद्घटेऽवर्त्तमानमपि
तद्घटान्यत्वं तद्व्यापकं येन पृथिवीत्वेन रूपे साध्ये तद्घटोत्पत्ति-
कालावच्छिन्नरूपव्यापकतयोपाधिः स्यात् स्वानधिकरणीभूत
साधनाधिकरणवृत्तिधर्म्मावच्छिन्नसाध्यव्यापकत्वं वा । यद्यपि
शुद्धसाध्यव्यापकस्थलेऽवच्छिन्नसाध्यत्वेन न व्याप्यता तथापि
तद्धर्म्माधिकरणीभूतसाध्याधिकरणनिष्ठान्योऽन्याभावप्रतियो-
गितानवच्छेदकत्वादिरूपं तद्व्यापकत्वमक्षतमेव गुरुत्वा-
दिना प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वं द्व्यणुकजन्यत्वाद्यव-
च्छिन्नसाध्यव्यापकं भवत्येवोपाधिः। एवञ्च यत्रैव स्वान
धिकरणे साधनस्य साध्यव्यभिचारो यत्र च स्वाधिकरणे
साध्यं तदुभयमात्रवृत्तिर्यो धर्म्मस्तद्वति तद्व्यभिचारेण साधने
साध्यव्यभिचारः साधनवति वा तद्धर्म्मवत्त्वे सति तदभाव-
वत्त्वेन साध्याभावः साधनीयः साध्यासमानाधिकरणस्य
साध्यव्यापकाभावस्य वाधिकरणं यत्साधनवत्तन्निष्ठप्रति-
योगितावच्छेदकावच्छिन्न-प्रतियोगि-व्यधि-करणात्यन्ताभाव
प्रतियोगितावच्छेदक-साध्यसमानाधि-करण-वृत्तिधर्म्मवत्त्वमु-
पाधित्वम्, एवञ्च साध्यसमानाधिकरणत्वेनैव साध्यवद्वृत्ति-

वारणसम्भवे पर्य्यवसितसाध्यव्यापकत्वाभिधानन्तु व्यापका भावेन व्याप्याभावस्यावश्यम्भावप्रदर्शनार्थं तत्साध्यकतत् साधनकसकलोपाधिसाधारणञ्चेदं साध्यव्यापकत्वसाधना-व्यापकत्वावच्छेदकरूपानतिरिक्तवृत्तिसाध्यसमानाधि-करण-यत्किञ्चिद्धर्म्मव्यापकतावच्छेदकरूपवत्त्वमुपाधित्वम् अव च्छिन्नसाध्यव्यापकोपाधौ चान्ततः साध्योपाधिशून्या साधन-वतो या व्यक्तिस्तदवृत्तित्वमेव तादृशं रूपमित्यपि वदन्ति। रूपादिसाध्यकद्रव्यत्वादिहेतौ पृथिवीत्वाभावादेरुपाधिता पक्षे तु स्वविशिष्टसाध्यानधिकरणीभूतसाधनाधिकरणवृत्ति धर्म्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वम् अत्र च पूर्वदलप्रविष्टा या साधनव्यक्तिस्तदव्यापकत्व बोध्यं तेन रूपा दिना गुरुत्वादौ साध्ये पृथिवीत्वाभावादौ नातिप्रसङ्गः विवेचयिष्यते चेदमुपरिष्टात्। साध्यासमानाधिकरणधर्म्मस्य साध्यव्यापकाभावस्य वा समानाधिकरणं यत् साधनं तद् वन्निष्ठ-प्रतियोगितावच्छेदकावच्छिन्न-प्रतियोगिव्यधिकरणा-त्यन्ताभाव-प्रतियोगितावच्छेदक-साध्यसमानाधिकरण-वृत्ति धर्म्मवत्त्वं वा एवञ्चावगते साधनवति साधने वा साध्यासमा-नाधिकरणधर्म्मादिना तत्सामानाधिकरण्येन वा साध्या-भावो व्यभिचारो वा शक्यते ज्ञातुमिति तु ध्येयम् उपाधि-शरीरभानस्य साधननिष्ठसाध्यव्यभिचारादिविषयत्वसहि-ष्णुतायान्तु साध्यव्यभिचारित्वेन साध्याव्याप्यत्वेन वा साधनं विशेषणीयम् मिश्रास्तु यद्व्यभिचारित्वेनेत्याद्येव लक्षणं

पर्य्यवसितेत्यादिकन्तु व्यभिचारोन्नायकताप्रयोजकरूपप्रदर्शनं तत्र पूर्वं प्रतीकं व्याप्तेर्द्वितीयस्य पक्षधर्म्मतायाः प्रदर्शनार्थं एवञ्चाश्रमेतत्साधननिष्ठसाध्यव्यभिचारोन्नायकव्यभिचारप्रतियोगोत्वार्थकं अयमत्र हेतावुपाधिरित्युक्ते कथमस्य व्यभिचारोन्नायकत्वमित्याकाङ्क्षायां व्यभिचारोन्नयनमपि साधु सङ्गच्छत इत्याहुः। नत्रोनास्तु संयोगवदन्यत्वेन द्रव्यत्वाभावस्येव संयोगाभावस्याभावेन संयोगेन द्रव्यत्वाभावाभावस्य द्रव्यत्वस्य साधनसम्भवादेकशेषस्य दुष्करत्वात्तस्याप्युपाधित्वं लक्षणन्तु साधनवति साध्याभावोन्नायकव्यतिरेकप्रतियोगितावच्छेदकरूपवत्त्वं प्रतियोगित्वञ्च तदभावत्वं अत्यादितञ्च प्रतियोगितावच्छेदकस्यैवान्योऽन्याभावाभावत्वं शेषं पूर्ववदिति विशेषणाव्यभिचारित्वेनेत्यादि सामान्यतो दृष्टमेवैकविशेषबाधे भावयति विशेषान्तरप्रकारिकामनुमितिं नचातिरिच्यते विशिष्टाभावो विशेषणविशेष्याभावाभ्यामिति मतेनेदम्। स्वमते नाह यद्वेति। प्रत्यक्षस्पर्शाश्रयत्वमित्यादि प्रत्यक्षसंख्यापरिमाणवत्त्वाद्युपाध्यभिप्रायेण यथाश्रुतमेव साधु आत्मैकत्वादेरपि प्रत्यक्षत्वाङ्गीकारात् उद्भूतरूपादिपरत्वे च साध्ये हेतौ च प्रत्यक्षपदं वहिरिन्द्रियप्रत्यक्षपरं द्रव्यपदे वा वहिर्द्रव्यपरे महत्त्वपदञ्च जन्यमहत्त्वपरमिति व्यापकव्यभिचारित्वञ्च व्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तित्वम् न च द्रव्यपदवैयर्थ्यं विशिष्टाभावस्यातिरिक्तत्वात् द्रव्यत्वा व्यभिचारित्वे सति उद्भूत-

रूपादिव्यभिचार एव हेतुः व्यापकत्वोपन्यासस्तु तर्कप्रदर्शनायेति तत्त्वं द्रव्यत्वाव्यभिचारो द्रव्यत्वाभाववदवृत्तित्वम्। मितातनयत्वमिति अनुमानमिदमुपाधेः प्रमाणान्तरेण साधनाव्यापकतानिर्णयदशायाम्। ननु तदव्यभिचारित्वं तदत्यन्ताभाववदवृत्तित्वं तथा च साधनविकलोऽयं साध्यवान् दृष्टान्त इत्यत आह अव्यभिचारश्चेति। नन्वेवं विशेष्यवैयर्थ्यं धूमप्रागभाववद्धूर्मिभेदादवैयर्थ्यमिति चेत्तथापि मितातनयत्वव्यापकत्वविशेषितं वृत्तिमत्त्वमेव गमकमिति चेन्न यत्किञ्चित्तदधिकरणनिष्ठात्यन्ताभावाप्रतियोगित्वस्य फलतः सामानाधिकरण्यपर्य्यवसितस्योक्तत्वात् तथाचायमर्थः मितातनयत्वाधिकरणयद्व्यक्तिनिष्ठात्यन्ताभावाप्रतियोगित्व तत्र शाकपाकजत्वव्यभिचारित्वात् मितातनये शाकपाकजव्यभिचारित्वादिति यावत् तेन श्यामत्वादौ न व्यभिचारः। अव्यभिचारश्चेति तथाच बहुव्रीहिः यद्यद्धर्म्माव्यभिचारित्वे सति तद्धर्म्मावच्छिन्न यत्साध्यव्यापकव्यभिचारि तत्तत्साध्यव्यभिचारीति सामान्यव्याप्तेरघटत्व दृष्टान्त इत्यप्याहुः। मेयत्वादावपि विशेषणवति विशिष्टसाध्यव्यापकोपाधिव्यभिचारेण शुद्धसाध्यव्यभिचारः साधनीयः। एवं विशिष्टसाध्यव्यापकस्यापि साक्षात्शुद्धसाध्यव्यभिचारोन्नायकतयोपाधित्व समर्थ्यसाचात्परम्परासाधारणतदुन्नायकतामात्रेण तथात्वं व्यवस्थापयति यद्वेत्यादिना। अत्र पूर्ववद्दिरुद्धवारणाय

साध्यसमानाधिकरणेति बोध्यं व्यभिचारोन्नायकत्वञ्च यत्र क्वचित् एवञ्च पृथिवीत्वादिना गुरुत्वादौ साध्ये द्रव्यत्वादौ व्यभिचारोन्नायकस्य रूपवत्त्वादेर्वारणाय साधनव्यभिचारीति बहुव्रीहिः। नचैवमपि गुरुत्वादिसाध्यके रसवत्त्वादिहेतौ द्रव्यत्वं गुरुत्वादिव्यभिचारि जलभिन्ने पृथिवीत्वादिव्यभिचारित्वादिति व्यभिचारोन्नायके पृथिवीत्वादावतिप्रसङ्गः साधननिष्ठं यद्व्यभिचारित्वं साध्यव्यभिचारोन्नायकं तत्त्वस्योक्तत्वात् उक्तिवैचित्र्याच्च पूर्वस्माद्भेदः। केचित्तु व्यभिचारोन्नायकत्वमिह तद्व्याप्यकोटिप्रविष्टतामात्रेण इत्यञ्च जलत्वेन करकात्वे साध्ये जलत्वं करकात्वव्यभिचारि स्नेहव्यापकत्वात् घटेन वा घटत्वे साध्ये घटो घटत्वव्यभिचारी जन्यद्रव्यत्वादिति व्यभिचारोन्नयनसमर्थस्य स्नेहस्य द्रव्यत्वस्य च वारणाय साधनव्यभिचारीति अयं घटः सत्त्वादित्यादौ सत्त्वं घटत्वव्यभिचारि शब्दादिवृत्तित्वादिति व्यभिचारोन्नायकस्य शब्दादेर्वारणाय साध्यसमानाधिकरणेत्यपि वक्तव्यम् एवञ्च रूपेण गुरुत्वादौ साध्ये रूपं गुरुत्वादि व्यभिचारि जलभिन्ने पृथिवीत्वाभाववद्वृत्तित्वादिति व्यभिचारोन्नायकस्य गुरुत्वव्यभिचारितैजसरूपनिष्ठव्यभिचाराप्रतियोगिनः पृथिवीत्वाभावस्य वारणाय यत्राधिकरणे साधनाव्यापकत्वं तत्र व्यभिचारोन्नायकत्वं वक्तव्यं यथा कथञ्चित्त्वव्यभिचारेण व्यभिचारोन्नायकमात्रस्य तु लक्ष्यत्वे यत्साधनव्यक्त्यव्यापकत्वं तद्व्यक्तौ व्यभिचारोन्नायकं वाच्यमित्याहुः।

नन्वस्तु पारिभाषिकमुपाधित्वं तथापि साचाद्यभिचारानुन्ना-यकतया दोषत्वाभावेन तदुद्भावने अर्थान्तरं स्यादेवेत्यत आह किञ्चेति अभासान्तरस्य तदानीं ज्ञायमानस्य तथाच तस्यावश्याभ्युपेयदोषभावत्वे तदुद्भावने नार्थान्तरमिति भावः। अत्र वदन्ति साध्योपन्यासानन्तरं तत्साधकस्येव साधनोपन्यासानन्तरं तद्दोषस्य व्यभिचारादेराकाङ्क्षितत्वात् तमनुद्भाव्य साचात्तत्साधकस्य शुद्धसाध्यव्यापकस्योपाधेरुद्भा-वन एवाप्राप्तकालत्वं केव कथा परम्परया तत्साधकस्याव-च्छिन्नसाध्यव्यापकस्य अन्यथा तत्साधकपरम्पराया अपि प्र-थममुपन्यासे तथात्वं न स्यात् न च निग्रहस्थानत्वेन विशेषः प्रतिज्ञाहान्यादितो हेत्वाभासाच्च बहिर्भूतस्य तथात्वायो-गात् न च विभाजकसूत्रस्थले हेत्वाभासाश्चेति चकारेणानु-क्तसमुच्चयपरेण साचात्परम्परया वानुमिति दोषोन्नायकस्य संग्रहः तथा सति व्यभिचारस्येवाश्रयासिद्ध्यादेरप्युन्नायकस्य तदुभयोन्नायकपरम्परायाश्च तथात्वापातात् नचाप्राप्तकाल-तामासादयन्नपि प्रथमभुपाध्युपन्यासः कथकसम्प्रदायानु-रोधादेव कर्त्तव्यः तादृशसम्प्रदायमननुरुन्धानस्य तदुद्भावकं पराभवतः शपथनिवारणीयतापत्तेः तस्मात्प्रथमं शुद्धसाध्य-व्यभिचार एवोद्भाव्यस्तत्र कथन्तायां तद्धेतुत्वेन शुद्धसाध्य-व्यापकोपाधिव्यभिचारः विशेषणाव्यभिचारित्वे सति विशिष्ट-साध्यव्यापकस्योपाधेर्विशिष्टसाध्यस्य वा व्यभिचारः तत्र च विशेष्ये विशिष्टसाध्यव्यापकोपाधिव्यभिचार इति वक्ष्यते

च व्यभिचारादेरिव तद्व्याप्यवत्त्वादेरपि ज्ञानं व्याप्त्यादि-ग्रहप्रतिबन्धकं तथाच साध्यव्यभिचारव्याप्योपाधिव्यभिचार-वानयमिति वोद्भावनीयमिति साध्यव्यापकत्वानिश्चयात् उपाधित्वौपयिकतदनिश्चयात् अनुकूलतर्कादिना तादृश-व्यापकत्वनिश्चये तु बाधोन्नीतवह्नवत्येव निश्चितोपाधिः । न च स्वव्याघातकत्वोन्नायकमुपाधिः तद्धि न सर्व्वानुमान-साधारण्यं अनुकूलतर्कादिनिश्चितव्याप्तिके हेतौ तदभावात् नापि तद्व्यभिचारेण व्यभिचारानुमानेऽपि पक्षेतरान्तरस्यो-पाधित्वसम्भवः अनुकूलतर्कादिना तस्य साध्यव्यापकत्वनिश्चये व्यापकव्यभिचारिणि व्याप्यव्यभिचारावश्यम्भावेन तदयोगात् अतएव पक्षेतरस्योपाधित्वे सर्व्वत्रैव तादृशोपाधिसम्भवेनानुमा-नमात्रविलोपे व्यभिचारानुमापकत्वगर्भस्योपाधित्वस्याव्या-घात् इति परास्तम् कथकसम्प्रदायानुरोधात् बाधानुन्नीतः पक्षेतरोनोपाधित्वेन कथायामुद्भाव्य इति तु वदन्ति । पक्षमात्रेति । यद्यपि पर्व्वतावयवरूपादेरपि व्यावर्त्तकं तत्तथापि तस्य व्यावृत्तिर्नोपाधितायामुपयुज्यते अपि तु पक्षस्यैवेति तन्मात्रव्यावर्त्तकत्वमुक्तम् इदञ्चानुपाधितायां न बीजं परिभाषामात्रत्वात् किन्त्वनुकूलतर्काभावेन तादृश-साध्यव्यापकत्वानिश्चय इति द्रष्टव्यम् अतएव व्यापकता-ग्राहकप्रमाणसम्भवादेव । आर्द्रेन्धनेति । अथात्र स्वत-न्त्रान्वयव्यतिरेकाभ्यामार्द्रेन्धनत्वादिनैव कारणत्वं न पुनरा-र्द्रेन्धनप्रभववह्नित्वेनेति चेत्किन्नातः न हि कारणतावच्छेद

कमेव व्यापकतावच्छेदकं तादृशाभावप्रतियोगितानवच्छेदकस्यैव तत्त्वात् तदवच्छिन्नप्रतियोगिताकाभावस्य चातिरिक्ततया तद्वद्वृत्तित्वेन साध्यव्यभिचारसाधने वैयर्थ्याभावात् सत्यपि चार्द्रेन्धने तत्संयुक्ते च वह्नौ दाहप्रतिबन्धकसत्त्वे धूमानुत्पादात् क्लृप्ततत्कारणाभावस्य वह्निविशेषरूपेण कारणत्वकल्पनयैवोपपत्तावक्लृप्ततत्कारणभावानां दाहप्रतिबन्धकभावानां तत्कारणत्वकल्पनानौचित्यात् एकस्यामार्द्रेन्धनव्यक्तौ प्रतिबद्धायां तत्रैव व्यक्त्यन्तराद्धूमोत्पादात्तत्तदिन्धनजन्यधूमं प्रति तत्तदभावानां कारणत्वस्य वाच्यत्वेऽतिगौरवाच्च महति चार्द्रेन्धने तत्प्रभवे चाणीयसि वह्नौ महति वह्न्यन्तरे विद्यमानेऽप्यार्द्रेन्धनप्रभवमहावह्नेरनुत्पाददशायां प्रकृष्टधूमानुत्पादादार्द्रेन्धनप्रभववह्नित्वेन कारणत्वमित्यपि वदन्ति। तदुत्कर्षेणेति आर्द्रेन्धनप्रभववह्निसामान्यं विना धूमसामान्यस्य प्रकृष्टतादृशवह्निं विना प्रकृष्टधूमस्यानुत्पादनियमादार्द्रेन्धनप्रभववह्नेरेव धूमोपधायकत्वं तदार्द्रेन्धनप्रभववह्नित्वं कारणतावच्छेदकमर्थवशसम्पन्नं नान्तरीयकमेव वास्तु फलतो न कश्चिद्विशेष इति भावः। अनन्यथेति तादृशान्वयव्यतिरेकाभ्यामुद्भूतरूपस्य तद्वतो द्रव्यस्यैव वा कारणत्वम् उभयथापि व्यापकत्वमुद्भूतरूपत्वेन तच्च पुनरुपवर्णितमेव। घटोन्मज्जनेति ध्वंसप्रागभावानधिकरणकालस्य प्रतियोग्यधिकरणत्वनियमात् न च प्रागभावस्य ध्वंसप्रतियोगिध्वंस इव तद्ध्वंसोऽपि प्रतियोगिनो ध्वंस इति वाच्यम्

अप्रामाणिकध्वंसतत्कारणधाराकल्पनातो ध्वंसानन्तत्व कल्पनाया एवोचितत्वादिति भावः। कार्य्यकारणयोरेव कार्य्यकारणभावग्राहकप्रमाणक्रोडीकृतयोरेव। पक्षेतरस्येत्यादि ननु सन्दिग्धोपाध्यन्तरवत्पक्षेतरोऽपि व्यभिचारशङ्कामादधानः केन वारणीयः स्वव्याघातकत्वञ्च निराकृतमेव अथात्र कश्चिदुपाधिर्भविष्यतीति शङ्का शङ्कापिशाचीत्वात् यथा न व्यभिचारशङ्काधायिका तथा पक्षेतरस्योपाधित्वशङ्कापि तदाहितापि व्यभिचारशङ्का पक्षे व्यभिचारशङ्केव न प्रतिबन्धिका अन्यथा निरुपाधिकसहचारभङ्गप्रसङ्गमात्रबलप्रवृत्तानामनुमानानां विलयप्रसङ्गादिति चेन्न सन्दिग्धोपाध्यन्तरसाधारणव्यभिचारशङ्काधानप्रयोजकरूपवता पक्षेतरेण तदाधाने प्रयोजनक्षतेः प्रतिबन्धकत्वासम्भवात् व्यभिचारज्ञानत्वेन च प्रतिबन्धकतायां कारणविशेषजन्यत्वाजन्यत्वादिकं न निविशते गौरवात् मानाभावाच्च कथमन्यथा करवह्निसंयोगः सर्वः संयोगो वा प्रत्यक्षसंयोगधर्म्मातिरिक्तधर्म्मसमवायी समवायित्वादित्यादितो न शक्त्यादिसिद्धिः निरुपाधित्वेऽपि अप्रयोजकत्वादिति चेन्न निरुपाधित्वस्यैव प्रयोजकत्वात् तथात्वेऽपि चाप्रयोजकत्वे निरुपाधित्वाभिमतानामितरेषामपि तथात्वात् अत्र च कुत्र पक्षातिरिक्ते व्यभिचारशङ्का कश्चायं व्यामोहो यद्व्याप्तिग्राहकदृढतरप्रमाणविरहिणां निरुपाधित्वमिति यतस्तत्र तत्रान्ततः पक्षसपक्षैकदेशवृत्तिधर्म्मावच्छिन्नसाध्यव्यापकानां सपक्षैक-

देशवृत्तिधर्माणामुपाधित्वं सम्भाव्यते इत्यस्य यथा नाति-प्रसङ्गस्तथा तत्र तत्र वक्ष्याम इति सत्यम् कथकसम्प्रदाया-नुरोधात् कथायां सन्दिग्धोपाधित्वेन पक्षेतरोनोद्भाव्य इत्येवम्परो ग्रन्थ इत्याहुः। सोपाधावेकत्रेत्यादि उपलक्षण-मेतत् व्यभिचारिण्युपाधेरवश्यम्भावमात्रे तात्पर्य्यम् उप-जीव्योपजीवकभावो हि न कार्य्यकारणभावोऽसम्भवात् व्याप्यव्यापकभावस्त्वकिञ्चित्कर एव विशेषतस्तु ज्ञायमान-दूषकतायाम् एकमविज्ञायाप्यन्यतरज्ञानाच्च न ज्ञाप्यज्ञापक-भावः। न चानुकूलतर्कविरहादेव व्याप्तेरग्रहे क्लृप्तमुपा-धिज्ञानेन विनाप्यनुकूलतर्के व्यभिचाराग्रहे व्याप्तिग्रह-सम्भवादिति भावः। यद्व्यावृत्त्येति अत्र पक्ष इति पूरणात् पक्षनिष्ठसाध्यव्यावृत्त्युन्नायकव्यावृत्तिप्रतियोगित्वमर्थः सत्प्र-तिपक्षोन्नायकत्वञ्चात्र दूषकताबीजं तच्च चाप्रयोजकत्वात् साधनाव्यापकत्वं नोक्तं साधनस्य सोपाधित्वव्युत्पादनायैव केवलं यस्य साधनस्येति यद्वा साधनस्येत्यनन्तरमधिकरण इति पूरणात् साधनवन्निष्ठसाध्यव्यावृत्त्युन्नायकव्यावृत्ति-प्रतियोगित्वमर्थः तथा च यद्व्यभिचारित्वेनेत्यादेरुपवर्णितार्थ-निष्कर्ष एवायं शुद्धस्य साधनावच्छिन्नस्य च साध्यस्य व्यापकानामुपाधीनां पक्षे क्वचित् साधनवति वा साध्याभाव स्यैकमुन्नयनप्रकारमाह सचेत्यादि साधनवत्त्वेन ज्ञायमाने पक्षे साध्यसाधनसम्बन्धाभावः सिध्यन् पक्षधर्म्मताबलात्साध्या-भावमादायैव पर्य्यवस्यति। ननु शुद्धसाध्याभावोन्नायक-

स्याद्रेन्धनवत्त्वादेः कथं साध्यसाधनसम्बन्धाभावोन्नायकत्वमत आह आर्द्रेन्धनेति अतएवेति साध्याभावसत्त्वे साध्यसाधनसम्बन्धाभावस्यावश्यकत्वात्तदुन्नायकत्वमक्षतमिति भावः। द्रव्यत्वे इति द्रव्यत्वस्य हेतुत्वाभिप्रायेण अयञ्च प्रायशः सम्भवतीत्यभिहितो वस्तुतः प्रकारभेदेऽपि न क्षतिः तथाच शुद्धसाध्यव्यापकोपाधिस्थले शुद्धसाध्याभावः अवच्छिन्न तद्व्यापकस्थले त्ववच्छेदकवत्यवच्छिन्नसाध्याभावोऽवच्छेदकव त्त्वविशेषितेन सोपाधिविरहेण शुद्धसाध्याभावः साधनीयः अतएव गगनादौ स्पर्शवत्त्वेन प्रमेयत्वेन च प्रत्यक्षत्वे साध्ये वह्निद्रव्यत्वावच्छिन्नसाध्यव्यापकस्योद्भूतरूपस्य तादृशसाध्याभावोन्नयनहेतुत्वमिति। यद्वेति यद्व्यावृत्त्या यस्य साधनस्य सम्बन्धि यत्साधनविशिष्टं साध्यं निवर्त्तते इत्यर्थस्तु यथाश्रुतग्रन्थस्वरससिद्धः तत्र दूषकताबीजं यदि सत्प्रतिपक्षोन्नायकत्वं तदा साधनानुप्रवेशो व्यर्थः जलं द्रव्यं गन्धवत्त्वादित्यादौ पृथिवीत्वादावतिव्याप्तिश्च अथासिद्ध्युन्नायकत्वं तदा साध्यानुप्रवेशो निरर्थकः जलं गन्धवत् द्रव्यत्वादित्यादौ पृथिवीत्वादावति प्रसङ्गश्च अथ यथासम्भवमसिद्धेः सत्प्रतिपक्षस्य चोन्नायकत्वं तदा वायुः स्नेहवान् गन्धवत्त्वादित्यादौ जलत्वपृथिवीत्वादावव्याप्तिः साधनविशिष्टसाध्याप्रसिद्धेः साध्यसाधनवत्त्वप्रकारकबोधविरोधिबुद्धिकाभावोन्नायकत्वमर्थः विरुद्धे चैकैकाभावबुद्धिरुभयवत्ताबोधम् विरुद्धस्थले तु भ्रमादिरूपतथाविधबोधप्रसिद्ध्या समन्वय इत्यपि वदन्ति यत्तु

साध्यावृत्तित्वे सति साधनावृत्तिर्यस्तच्छून्यत्वेन साध्यसाधने ऽनुगमय्य तदभावन्नायकत्वं वाच्यमिति तत्र यत्र भिन्नभिन्न-सम्बन्धेन साध्यसाधनभावस्तत्र सद्धेतुके हेतुतासम्पादकेन सम्बन्धेन साध्यस्य साध्यतासम्पादकेन च हेतोरन्यत्रापि च यथाकथञ्चित्सम्बन्धेनोभयस्याभावोन्नायकेऽतिव्याप्तिः किञ्च ता दृशधर्म्मशून्यत्वेन रूपान्तरेण वा तदभावस्योन्नायकत्वम भिमतम् नाद्यः साध्यसाधनान्यतरवति तदसम्भवात् नान्त्य. धूमेन पर्व्वते वह्नौ साध्ये महानसीयवह्नित्वाद्यवच्छिन्नाभावो न्नायकमहानसत्वादावतिव्याप्तेः। यच्च पक्षावृत्तित्वे सति ये साधनवद्वृत्तयस्तच्छून्यत्वेन पक्षसाधनवत्त्वाविति प्रमा-विशिष्यत्वेन वा द्वावनुगतीकृत्य तत्र साध्यव्यावर्त्तकत्वमर्थ-माहुः तत्र यदि सत्प्रतिपक्षव्यभिचारयोरन्यतरमात्रोन्नाय कत्वं दूषकतावीजं तदा द्वयोरनुगमनमफलम्। अथ यथासम्भवमुभयोन्नायकत्वं तदा अवृत्तिहेतुके सत्प्रतिपक्षो न्नायकेऽव्याप्तिः यदपि च पक्षतावच्छेदके साधने च न वर्त्तते यत्तच्छून्यस्य पक्षतावच्छेदकसाधने इति प्रतीति-विशिष्टस्य वाश्रये साध्यव्यावर्त्तकत्वमर्थमाहुः तत्रापि किं येन सम्बन्धेन हेतुता तेन अथ येन पक्षतावच्छेदकं पक्षे वर्त्तते तेन उत येन केनचित्तादृशधर्म्माश्रये साध्यव्यावर्त्तकत्व-मभिमतं नाद्यः जलं वह्निमद्धूमादित्यादौ जलपक्षकवह्निसा-ध्यके संयोगसम्बन्धेन साधने धूमादौ वह्निसामग्र्यादावव्याप्तिः पक्षतावच्छेदकस्य संयोगेनावृत्तेः संयोगेन धूमवतस्य वह्नि-

मत्त्वनियमात् न द्वितीयः घटो जातिमान् मेयत्वादित्यादौ समवायित्वादाव्याप्तेः वह्निमत्पर्वतपक्षके पर्वतो वह्निमान् धूमादित्यत्र धूमावयवे वह्निव्यावर्त्तके वह्निसामग्यादावति-व्याप्तेश्च अतएव नेतरोऽपोत्यादि स्वयमूहनोयमिति कृतं पल्लवितेन। आपाद्याप्रसिद्धेः आपाद्यस्य वह्निव्यापकत्वे सति धूमाव्यापकत्वस्याप्रसिद्धेः। अनुमितोति अस्मदुक्तं व्यभिचारोन्नायकत्वं तदुन्नयनस्वरूपयोग्यत्वं तद्व्याप्तिपक्ष-धर्म्मतारूपं पर्य्यवसितसाध्यव्यापकत्वादिकञ्चानुमितिप्रति-बन्धकज्ञानविषयतावच्छेदकमेवेति भावः। ननु सामान्य-लक्षणमितरव्यावृत्त्यौपयिकं विशेषलक्षणन्तु दूषकतायामुप-युज्यत इत्यत आह विशेषेति यथाश्रुतेऽवच्छिन्नसाध्यव्याप कोपाध्यव्याप्त्या यत्किञ्चिद्धर्म्मावच्छिन्नसाध्यव्यापकत्वमेव व-क्तव्यं तथाच वह्निना धूमस्य धूमेन वह्नेर्वा साधने पक्षेतरस्य तद्रूपज्ञानादनुमितिप्रतिबन्धापत्तिरित्यर्थः व्यवहारौपयिकत्वे च तत्रोपाधिव्यवहारापत्तिः पर्य्यवसितेत्याद्यभिधाने चास्म-न्नयप्रवेश इति भावः व्यवहारौपयिकं स्वव्यभिचारेण साध्य-व्यभिचारोन्नायकत्वं लक्षणन्तु तत्तत्साध्यसमानाधिकरणत्वे सति तत्तत्साधनाव्यापकत्वं साध्यसाधनभेदाद्भिन्नमेव वस्तुतो व्यभिचारिणः साधनस्यैवानुप्रवेशाच्च नातिप्रसङ्गः न च रूपेण गुरुत्वे साध्ये पृथिवीत्वाभावादेरुपाधितापत्तिः गुरुत्वव्यभि-चारि रूपव्यक्तेस्तद्व्याप्यत्वात् तदव्याप्यरूपव्यक्तेश्च गुरुत्वाव्यभि-चारादिति दूषणतौपयिकन्तु यथासम्भवमननुगतमेवेति मत-

मिदं परे परिष्कुर्वन्ति तन्न साधीयः तथा हि साध्यसाधनव्यक्तिस्वरूपगर्भं नोपाधित्वमपि तु साध्यतावच्छेदकसाधनतावच्छेदकधर्म्मगर्भं तत्तद्गुणत्वेन सकलगुणव्यक्तिषु सोपाधेरपि द्रव्यत्वस्य गुणत्वेन सकलगुणेष्वेव निरुपाधित्वात् गुणत्वेन गुणे साध्ये सत्तात्वेन रूपेण सोपाधेरपि सत्ताया गुणकर्म्मान्यत्वविशिष्टसत्तात्वेन निरुपाधित्वात् तथाच तद्रूपावच्छिन्ने साध्ये तद्रूपावच्छिन्ने साधने च क उपाधिरित्यत्र तद्रूपावच्छिन्नसाध्यसमानाधिकरणत्वे सति तद्रूपावच्छिन्नसाधनाव्यापकत्वमनुगतं लक्षणं वाच्यं नतु तद्रूपावच्छिन्नतत्तत्साधनव्यक्त्यव्यापकत्वमनुगमात् तथाच गुरुत्वत्वावच्छिन्नसमानाधिकरणस्य रूपत्वावच्छिन्नाव्यापकस्य पृथिवीत्वाभावादेरुपाधित्वं दुर्व्वारं व्यभिचारित्वेन साधनविशेषणत्वप्रदर्शितमेवेति सङ्क्षेपः। उपाधिलक्षणे साधनाव्यापकत्वं न विशेषणं दूषकतायामनुपयोगात् अव्याप्तिकरत्वाच्चेति। सत्प्रतिपक्षोन्नायकत्वेनोपाधेर्दूषकतावादिनामभिप्रायं प्रकाशयति। केचित्त्विति साध्यतावच्छेदकावच्छिन्नं साध्यस्य नोपाधिः परं प्रत्युद्भाव्यः साध्याविशिष्टत्वात् पक्षे साधनस्य निश्चयेऽनुमानस्य वैयर्थ्यात् अनिश्चये च तस्यायोगात्। सन्दिग्धोपाधित्वेनापि न तदुद्भावनमित्याह अनुमितीति हेतौ साध्यव्यभिचारः सन्दिग्धश्चेत् कृतं सन्दिग्धोपाधिना असन्दिग्धश्चेत्कथं तस्य सन्दिग्धोपाधित्वमिति तु तत्त्वम्। हेतुव्यभिचारेति व्याप्यसंशयस्य व्यापक-

संशयहेतुत्वादितिभावः न च तत्र मानाभावः कोटिस्मरणादित एव तदुपपत्तेः क्वचित्तदनुविधानस्यापि व्याप्यतदभावयोर्व्यापकतदभावसाहचर्य्यस्य गृहीतत्वेन तत्स्मरणएवोपक्षीणत्वात् तदग्रहे तु तत्संशयाद्यापकसंशयस्याप्यभावादिति वाच्यं महानसे कृताग्नौ न जलह्रदे इति स्मरतां पर्वतादिकमपि पश्यतां धूमादिसंशयभावाभावाभ्यां कृताग्निसंशयभावाभावदर्शनात्तस्यापि तद्धेतुत्वात् अतएवोत्कटकोटिकाद्व्याप्यस्य संशयाद्व्यापकस्याप्युत्कटकोटिकः संशयः कारणोत्कर्षेणैव कार्य्योत्कर्षात् समानेत्यादि सूत्रन्तूपलक्षणपरं तत्रस्थचकारो वा अनुक्तसमुच्चयार्थ इति वदन्ति। कोटिद्वयसहचरितधर्म्मवत्तया धर्मिज्ञानं हेतुः धर्मस्य चैकत्वं ज्ञानस्य च निश्चयत्वं नोपयुज्यते गौरवात् अवगाहते च लिङ्गसन्देहो लैङ्गिकतदभावसहचरितौ लिङ्गतदभावौ धर्मिणि तथा च साधारणधर्म एव तस्यान्तर्भाव इति तु नव्याः लिङ्गतदभावयोः प्रत्येकमेकैककोटिसाधारण्येऽपि मिलितयोरसाधारणत्वं सत्प्रतिपक्षस्थले विरुद्धयोरिव हेत्वोरिति तु टीकाकारानुयायिनः। इत्थञ्च साधनाव्यापकत्वसन्देहे साध्यव्यापकव्यभिचारसन्देहात् साध्यव्यभिचारसन्देहो हेतौ स्फुट एव साध्यव्यापकत्वसन्देहे तु साधनाव्यापकव्याप्यत्वसन्देहात्साध्ये साधनाव्यापकत्वसन्देहो बोध्यः। उपाधेः साध्यव्यापकत्वसन्देहेनाहितात्साधने साध्यव्यापकव्यभिचारसन्देहात्साध्यव्यभिचारसन्देहः इत्थमेव च दल-

द्वये संशयस्थले व्यभिचारसंशयस्योक्तिसम्भव इत्यपि वदन्ति । उभयेति एकांशेऽपरस्य एकविशिष्टापरसाध्यतायान्तु एकैकस्योपाधित्वमिति तु तत्त्वम् । ईश्वरेति वस्तुतः सङ्केतावपि तत्त्वाग्रहदशायामुपाधिसन्देहेन व्यभिचारसन्देह इति भावः । सन्दिग्धेति न चानैकान्तिकत्वसन्देहः प्रतिबन्धको नतु तज्ज्ञानमिति तदर्थं तदुद्भावनमफलमिति वाच्यम् अनैकान्तिकत्वसंशयात् मम व्याप्तिग्रहो मा भूदित्यभिप्रायेण प्राचां हेतुदोषत्वेनासाधकतासाधकतया जिज्ञासादिद्वारा परम्परया सन्देहोपयोगित्वेन च तदुद्भावनस्य साम्प्रदायिकत्वात् ।

उपाधित्वस्य संशये निश्चये च जायमानं यज्ज्ञानमनमितिं विरुणद्धि तदेवास्य दूषकताबीजमित्यभिप्रायेणाह सन्दिग्धेति तद्व्यतिरेकस्य क्वचिद्व्याप्यत्वेन क्वचिच्च पक्षधर्मत्वेन सन्दिग्धत्वात् बाधोन्नीतेति ननु बाधेऽवतीर्णे ततएव हेतोरसाधकत्वात् कृतमुपाधिना न वासाधारण्यं पक्षस्यैव सपक्षत्वात् अनवतीर्णे तु नोपाधित्वं पक्षेतरान्तरवत् साध्यव्यापकताया एवाग्रहात् अनुकूलतर्कादिना कथञ्चित्तद्ग्रहे च नासाधारण्यं व्यतिरेकितयान्वयव्याप्त्यग्रहस्य सत्प्रतिपक्षरूपतया च सत्प्रतिपक्षान्तरस्याकिञ्चित्करत्वादित्यरुचेराह पक्षवृत्तित्वेति पक्षे तद्ग्रहदशायां तदभावग्रहासम्भवादिति भावः । व्याप्तिविरहरूपतां निरस्य व्याप्तिज्ञानाभावद्वारकतां निरस्यति नाप्नोति अनौपाधिकत्वज्ञानस्य औपाधिकत्वज्ञानाभावस्य

कारणविघटकतया कारणाभावरूपतादृशज्ञानविषयतया अनौपाधिकत्वज्ञानस्य कारणत्वं नान्वयव्यतिरेकसिद्धम् परन्तु सोपाधित्वज्ञानस्य प्रतिबन्धकताया विना कारणीभूतज्ञानविघटनमसम्भवित्वेन कल्पनीयं सैव त्वसिद्धेति दूषणतात्पर्य्यायाश्रुतमेव साधीय इत्यपि वदन्ति। व्याप्यत्वासिद्धेर्व्याप्यत्वाज्ञानेऽन्तर्भावस्तद्वारा दूषकत्वं भिन्नधर्म्मिकत्वं परिहरन्नाह न चेति। नह्येति विरोधिविषयकत्वाभावेन साक्षात्प्रतिबन्धकत्वासम्भवादिति भावः। साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमित्युभयत्रैव बहुव्रीहिः तस्मादित्यादेरदूषणं वेति शेषः दूषकताबीजचिन्तनमिति निश्चयदशामधिकृत्य यन्निश्चयद्वारोपाधित्वनिश्चयस्य दूषकत्वं तत्संशयद्वारा तत्संशयस्यापि तथात्वमिति भावः। व्यभिचारज्ञानद्वारेति मानसे व्यभिचारनिश्चये उपाधिज्ञानं विशेषदर्शनरूपत्वेनोपयुज्यते व्यभिचारानुमानं पुनरग्रे वक्ष्यति। व्याप्तीति साध्यसम्बन्धितावच्छेदकरूपविरहः साधनतावच्छेदके साध्यसम्बन्धितानवच्छेदकरूपत्वपर्य्यवसन्नः साध्यवदन्यावृत्तित्वविशिष्टसाध्यवद्वृत्तित्वविरहो वोन्नेयः ननु स्वसमानाधिकरणात्यन्ताभावप्रतियोगिसाध्यकत्वं खल्वस्यानुगतस्याभावेन तत्तत्साधनत्वपर्य्यवसाने साध्यप्रसिद्धिमात्रेणैव कृतार्थत्वात् साध्यव्यापकोपाधिव्यभिचारित्वेन हेतौ साध्यव्यभिचारित्वं साधनाव्यापकोपाधिव्याप्यत्वेन साध्ये साधनाव्यापकत्वमनुमेयमिति तु नव्याः। व्यति-

रेकिणि साधने व्याप्तिविरहस्य व्यभिचारस्य चोन्नयने उपाधिः साधनाभाववद्वृत्तित्वं व्यभिचारास्फुटतादशायामुपाध्यनुसरणाद्यताधिकरणे हेतोः साध्यव्यभिचारित्वं तदीयधर्मे नास्य साध्याव्यापकत्वग्रहः। उपाधिमात्रेति तेनापि व्यभिचारानुमाने तत्रापि तथाविधोपाधिसम्भवादिति भावः वस्तुतस्तु व्यापकव्यभिचारिणो व्याप्याव्यभिचारित्वे व्याप्यव्यापकभावव्याघतापत्त्या हेतोः साध्यव्याप्यत्वेन साधनाभाववद्वृत्तित्वस्य साध्यव्यापकत्वान्नोपाधित्वमिति तत्त्वम्। अवृत्तीति व्याप्यत्वाभावसाधनाभिप्रायेण साधनाव्याप्यत्वस्योपाधित्वे च नैष दोषः। साधनेति यथाश्रुताभिप्रायेण प्रतियोगिव्यधिकरणसाधनाभाववद्वृत्तित्वस्य साधनवदन्यवृत्तित्वस्य चोक्तौ तथात्वासम्भवात् एवञ्च सत्प्रतिपक्षे निश्चितोपाधिवत्सन्दिग्धोपाधिरुद्भाव्यः। न च तत्कर्त्तव्यस्य व्यभिचारिसन्देहस्य प्रतिहेतुसमाजादेव सिद्धेः किं तेनेति वाच्यं परस्परप्रतिबन्धेनैवानुमित्यनुत्पादे तत्र व्यभिचारसन्देहस्यावश्यमुत्पत्तौ मानाभावात् उपाधिसन्देहादिग्रिम्यैकत्र व्यभिचारसन्देहेन तुल्यबलत्वाभावात् न चातुल्यबलेन सत्प्रतिपक्षो व्यभिचारादिशङ्काधानं वा स्वरसतः सन्दिग्धव्यभिचारादिनापि तथात्वप्रसङ्गादिति। अत्र च क्वचिदुपाधेस्तुल्यबलत्वे सत्प्रतिपक्षोन्नायकतया तर्कादिसाचिव्यादधिकबलत्वे च बाधोन्नायकतयापि दूषकत्वं व्याप्त्यादिप्रतिसन्धाने तदुन्नयनस्य ततोऽनुमिति प्रतिरोधस्य च दूर्व्वारत्वात् परन्तु सार्व्वत्रिकत्वं न

तस्येति ध्येयम् । असाधारणविपर्य्यय इति इदं सत्प्रति-पक्षोन्नायकत्वमभिप्रेत्य । यद्यपि व्यतिरेकिणा सत्प्रतिपक्षत्वे सत्प्रतिपक्षे सत्प्रतिपक्षान्तरस्यादोषत्वान्नासाधारण्यं दो-षाय तथापि सत्प्रतिपक्षोन्नयनौपयिकसाध्यव्यापकत्व-ग्राहकप्रमाणाभावे तात्पर्य्यम् । तदयं निष्कर्षः यत्र यद्दोषो-न्नायकतया दूषणत्वमुपाधेस्तत्र तदुन्नायनौपयिकरूपवैकल्य-मेवाभासत्वे प्रयोजकम् एवञ्च यत्र स्थापनायां पक्षताव-च्छेदकसामानाधिकरण्येन साध्यसिद्धिरुद्देश्या तत्र पक्षा-व्यापकविपर्य्ययस्याभासत्वं तद्विरहेण पक्षैकदेशे सत्प्रति-पक्षेऽप्येकदेशान्तरे साध्यसिद्धेरप्रत्यूहत्वात् यत्र तु पक्षताव-च्छेदकावच्छेदेन तथा तत्र तादृशस्योपाधित्वमेव एकदेशे प्रतिपक्षस्यापि तादृशसिद्धिविरोधित्वात् साध्यविपर्य्ययस्या-सत्त्वमनुपाधित्वे प्रयोजकं न त्वज्ञातमज्ञातस्यापि तस्य व्याप-कव्यतिरेकेण सिद्धिसम्भवात् । अथ सिद्धसाध्यविपर्य्ययत्वेन चाभासत्वं व्यभिचारोन्नायकतया दूषकत्वपक्षे विनापि साध्यप्रसिद्धिं प्रत्येकपदार्थप्रसिद्धेरेव घटो नाभिधेय इत्यादि प्रतिज्ञापत्ते व्युत्पादयिष्यते च तत्र प्रतिज्ञाविरहः व्यापका-भावेनाप्रसिद्धेरेव व्याप्याभावस्य सिद्धाभ्युपगमात् पूर्व्वसाधन-व्यतिरेकत्वन्तु नोपाधित्वेन नाप्यनुपाधित्वेन नियतं वह्निना धूमस्य स्थापनायां प्रतिहेतावार्द्रेन्धनाभावे वह्न्यभावस्योपा-धितापा धूमाभावस्य चार्द्रेन्धनाभावेन स्थापनायां प्रतिहेतौ वह्नावार्द्रेन्धनस्यानुपाधितायाश्च प्रसङ्गात् परन्तु पूर्व्वसाधति

व्यतिरेकस्य प्रतिहेतावुपाधित्वेनोद्भावने सत्प्रतिपक्षमात्रमु-च्छिद्येत सर्वत्रैव तत्सम्भवात् आभासत्वेऽपि स्थापनायां विशेषाग्रहदशायामेव सत्प्रतिपक्षोपन्यासात् वस्तुतः साध्या-व्यापकस्यापि पूर्वसाधनव्यतिरेकस्य तदानीं तत्त्वेनाग्रहा-दुपन्याससम्भवात् अतो बलवत्तरानुकूलतर्कं विना पूर्व-साधनव्यतिरेको नोपाधित्वेनोद्भाव्य इति कथकसमयवशा-देवासावुपाधित्वेन नोपन्यस्यत इति। यथाकर्तृत्वेति कादाचित्कत्वेन सकर्तृकत्वस्थापनायामजन्यत्वे प्रतिहेता-वित्यर्थः।

अनुमिति लक्षणैककार्य्यानुकूलतासङ्गत्या पक्षधर्म्मतां निरूपयितुमाह व्याप्तेति। सन्दिग्धेति। यत्र साध्यस्य यादृशसम्बन्धावगाहिनिर्णयनिवर्त्यो यः संशयस्तत्र स तादृशसम्बन्धेन साध्यानुमितौ पक्षतेत्यर्थः तेन न पक्षसाध्य विशेष्यकसंशयाननुगमो न वा सम्बन्धान्तरेण सन्देहेऽपि निर्णीतसम्बन्धेन पक्षत्वम् न वा तमःप्रभृतिषु समवायेनाका-काशादिसाधने तद्वैकल्यम्। संशययोग्यतां निरस्यति नापीति साधकबाधकमाने सिद्धिबाधौ केवलान्वयिनि च पक्षनिष्ठाभावप्रतियोगित्वधीरेव सुलभोऽबाधः। ननु तत्रापि पुनरनुमित्सा ततः परामर्शान्तरं स्मरणात्मकाद्वा परामर्शा-दनुमीतिष्टसाधनताविषयकादनुमित्सा ततोऽनुमितिरिति फलबलात्कल्पनीयमित्यत आह सिषाधयिषेति नचानुमिति-र्भिन्नकैच्छैव पक्षता सा च क्वचित्स्वनिष्ठैव सर्वत्रेश्वरनिष्ठैव

सुलभेति वाच्यं तस्यानित्यत्वेन सिद्धौ सत्यामपि पक्षता प्रसङ्गात् न च तस्यास्तदानीं न तज्जनकत्वं तद्धि न तद्योग्यता अनपायात् न च तदुपधानम् अनुमितेः पूर्वं तदभावात् न च तत्सामग्रीसमवधानं कारणमात्रस्य पक्षता-कुक्षिनिक्षेपप्रसङ्गाच्छेषवैयर्थ्यात् तदानीं सामग्रीविरहप्रयो-जकव्यतिरेकप्रतियोगिनः कारणस्य वक्तव्यत्वापाताच्च । सि-षाधयिषेति यत्रानुमित्यानन्तरं साध्यतद्व्याप्यवत्त्वविशिष्ट-पक्षस्मरणम् अनुमितीष्टसाधनताविषयकतादृशस्मरणाद्वा अनुमित्या अनुमित्यापूर्वकालोत्पन्नविशेषणस्मरणाद्वा अनु-मित्याकालोत्पन्नेन्द्रिय-सन्निकर्षसहितात्साध्यतद्व्याप्यविशिष्ट-पक्षप्रत्यक्षं तदनन्तरञ्चानुमितिस्तत्र पक्षतासम्पत्तये सङ्क्र-तान्तं साधकमानविशेषणम् । सिषाधयिषा च तत्साध्य-विशिष्टतत्पक्षविषयत्वप्रकारिका अनुमितिविषयिणीच्छा यत्किञ्चिद्गोचरं ज्ञानं जायतामितीच्छायामपि सिद्धिसत्त्वेऽ-नुमित्यनुत्पादात् अनुमितित्वाप्रकारिकायामपि प्रत्यक्षा-व्यतिरिक्तं पर्वते वह्निज्ञानं जायतामितीच्छायां प्रत्यक्षाद्य-नन्तरमनुमित्युत्पादाच्च यादृशयादृशेच्छासत्त्वे सिद्धौ सत्या मनुमितिस्तत्तदिच्छाभावसमुदायस्य विशेषणत्वादिच्छाया अननुगमेऽपि न क्षतिः धूमेनानुमिनुयामितीच्छायामालोक परामर्शादसत्यामपि सिद्धौ यदि नानुमितिस्तदान्यमात्र लिङ्गकानुमितीच्छा कामिनीजिज्ञासादिवत् पृथक् प्रति बन्धिका यदि च तत्रानुमितिस्तदा सिद्धिसत्त्वे तत्रानुमिते-

र्वारणाय तल्लिङ्गिकानुमितीच्छा तदन्यमात्रलिङ्गकानुमिती-
च्छातिरिक्तानुमितीच्छा वा वाच्या लिङ्गविशेषेणापि च
नियन्त्रितं पक्षत्वं तल्लिङ्गकानुमितौ सिद्धिकालीना तल्लि-
ङ्गकानुमितीच्छा विरहविशिष्टान्यलिङ्गकानुमितीच्छैव वा
प्रतिबन्धिका साधकमानं साध्यवत्त्वनिश्चयः पाषाणमयत्वा
दिना पर्वते तैजसत्वादिना च वह्नेः सिद्धावपि पर्वतत्वेन तत्र
वह्नित्वेन च तस्यानुमितेर्द्धर्मित्वसाध्यत्वयोरवच्छेदकावनु-
प्रवेशनीयौ यदि च पर्वतत्वसामानाधिकरण्येनैकत्र साध्य
सिद्धावपि विनानुमित्सामन्यत्र तादृशानुमितिरनुभविकी
तदा धर्म्मिविशेषोऽपि निवेश्यो नान्यथा पक्षतावच्छेदकस्य
सामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनानुमिति
दर्शनात् पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति तदवच्छेदेन
सिद्धेस्तत्सामानाधिकरण्यमात्रेणानुमितिं प्रति तु सिद्धि
मात्रस्य विरोधित्वम् इत्थञ्च लिङ्गभेदन्यायोऽनुसरणीयः
साध्यविशेष्यकसिद्ध्यनन्तरं पक्षविशेष्यकानुमितेः प्रामाणिकत्वे
तां प्रति पक्षविशेष्यिकैव सिद्धिर्विरोधिनी एवञ्च पक्षविशेष्यक
सिद्ध्यनन्तरमपि साध्यविशेष्यिकानुमितिर्जायते तुल्यन्यायात्
समानाकारायाः सिद्धेः प्रतिबन्धकत्वे पर्य्यवसानात् तादृशा
नुमितिं प्रति सिद्धिमात्रं विरोधिसाध्यप्रसिद्धिरेव वा अतएव
प्रसिद्धसाध्यकस्थले पक्षविशेष्यिकैवानुमितिरनुभूयत इति
अत्र च व्याप्तिस्मरणादिना पूर्व्वानुमित्सानाशे परामर्शकाले च
सिद्धिसत्त्वेऽनुमित्सान्तरोत्पत्त्यैवानुमितिस्तथैव कारणीभूतस्य

विशिष्टाभावस्य सम्पत्तिरित्युपाध्यायाः। अन्ये तु दिविचक्षणा-न्तरितायामप्यनुमित्सायामनुमितिदर्शनात् अनुमित्सायोग्यता वाच्या सा च न स्वोत्पत्त्यनन्तरं स्वविषयसिद्ध्यनुत्पादः अनुमित्सानन्तरमन्तरानुमित्यनुत्पादे दिवसादि-विलम्बेनेन्द्रियादिना निर्णीतेऽपि साध्ये लिङ्गपरामर्शादनुमितिप्रसङ्गात् किन्त्वनुमित्सानन्तरं लिङ्गदर्शनादिक्रमेण यावता कालेनोत्सर्गतः परामर्शो जायते तावानेव कालः फलबलेन तथा कल्पनात् अथवानुमित्सोत्पत्त्यनन्तरमनुमित्सानाशेऽपि सिद्धौ सत्यां यावत्कालमध्येऽनुमितिर्जायते तावानेव कालोऽनुमित्सयोपलक्षितः यदि च सिद्ध्यनन्तरं तन्नाशेऽपि द्वित्रिक्षणमध्ये विनानुमित्सामनुमित्यनुत्पादोऽनुभवसिद्धस्तदा सिद्धावपि तावानेव समय उपलक्षणीयः विशिष्यक्षणनियमस्त्वशक्यः करणीय इति वदन्ति। अत्र च यत्र साध्यनिर्णयेच्छानन्तरं पूर्व्वोक्तन्यायेन साध्यतद्व्याप्यविशिष्टपक्षस्य प्रत्यक्षं स्मरणं वा यत्र वा साध्यतद्व्याप्यधर्म्म तादृशव्याप्यधर्म्मान्तरविशिष्टपक्षस्य तत्पक्षकसाध्यतद्व्याप्यवत्त्वानुमित्योरिष्टसाधनतायास्त्वेकं स्मरणं ततस्तयोरनुमित्सा ततः साध्यतद्व्याप्यवत्त्वानुमितिस्तत्र तदनन्तरमनुमितिप्रसङ्गः योग्यताविवक्षणे तु सुतरामेवेति तदिच्छाविषयसिद्ध्यनुपस्थितत्वं तद्विशेषणं पक्षसाध्यभेदेन च पक्षताया भेदात् पृथक् पृथगेव कार्य्यकारणभावः तथाच यत्र सिद्ध्यनन्तरं कदाप्यनुमितिर्न जाता तत्र सिद्ध्यभावमात्रं

कारणं न तु तत्रेच्छानिवेशोऽपि गौरवात् प्रयोजनाभावाच्च तेन यत्पक्षकयत्साध्यकानुमितौ कस्यापीच्छा न जाता तत्रोक्ति-साधारण्यमात्रसम्पादनायेश्वरेच्छानिवेशनायासो नोपादेयः। यत्तु सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणो-त्पत्तिकानुमितिकभिन्ना या सिद्धिः सिषाधयिषाविरह-विशिष्टायास्तस्या अभावः पक्षता अथ तृतीयक्षणव्यवधायक-द्वितीयक्षण एवाव्यवहितत्वपर्य्यवसानाद्यत्राविरलक्रमेण सि-द्धिसिषाधयिषानुमितयस्तत्र द्वितीयक्षणे पक्षतासम्पत्तये द्वि तीयसिषाधयिषाविरहो विशेषणमस्तु सिद्धेः प्राथमिकस्तु स्वक्षणस्य किमर्थमिति चेत् यत्र क्रमेण सिषाधयिषाप्रात्य क्षिकसिद्धिपरामर्शानुमितयस्तत्र तृतीयक्षणे पक्षतासम्प त्त्यर्थमिति तन्न यत्रानुदित्वानाशकाले प्रात्यक्षिकी सिद्धिरथ च परामर्शानुमितौ तत्र पक्षताविरहप्रसङ्गात् अथ प्रथम-क्षणमपेक्ष्य द्वितीयस्येव द्वितीयमपेक्ष्य तृतीयस्याप्यव्यवहि-तोत्तरत्वं स्वध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति स्वाधिकरणकालध्वंसाधिकरणत्वं वा तादृशाव्यवहितोत्तरत्व वाच्यं तथाच यत्र क्रमेण सिद्धिसिषाधयिषानुमितय-स्तत्र प्रथमेन पक्षतावारणाय उत्तरक्षणस्य विशेषणं प्रथमं विशिष्टान्तं द्वितीयन्तु सिद्धेस्तत्रैव द्वितीयक्षणे पक्षतासम्पत्तये यदि पुनरिच्छाजनिका सामग्री प्रतिबध्ना-त्यनुमितिं तदानुमित्यव्यवहितपूर्ववर्त्तिसिद्धिभिन्नसिद्ध्यभाव-मात्रं पक्षतेति चेत्तादृशसिद्धीनां तत्तद्व्यक्तित्वेनाभावः

कारणं निरुक्तरूपविशिष्टत्वेन वा नाद्यः अनन्तकार्य्य-कारणभावप्रसङ्गात् तादृशसकलसिद्धौ अनुमित्साविरहविशे-षणदानस्य वैयर्थ्यात् तत्तत्समयसम्बन्धव्यक्तीनां तत्तत्समया-वच्छिन्नतत्तन्मनोयोगादीनां वा प्रतिबन्धकत्वप्रसङ्गाच्च नान्त्यः सत्यपि परामर्शादौ कस्याञ्चित्सिद्धेरनन्तरमनुमितिः कस्या-ञ्चिन्नेत्यत्र नियामकाभावात् न वा कारणतावच्छेदकाव च्छिन्नसमाजाधीनकार्य्योत्पादादिकं कारणतावच्छेदककोटौ निविशते तथा सति उत्पत्तिकालावच्छिन्नत्वविशेषितेन स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकस्वसमानाधिकरणानुमिति-कसविषयत्वेन स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणो-त्पन्नसविषयत्वेन स्वक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकस्वस-मानाधिकरणानुमितिकभिन्नसविषयत्वेन वा किं वा स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणवर्त्तित्वविशिष्टज्ञा-नत्वादिना कारणत्वं स्यात् अव्यवहितोत्तरस्य द्वितीय एव क्षण इति नातिप्रसङ्गः न चाद्दिमेषु परामर्श-स्थितिक्षणे यत्र विरोधिसिद्ध्यादिविनाशस्तत्रोत्तरक्षणे-ऽनुमितिर्न स्यात् परामर्शस्यातथात्वादिति वाच्यम् अनुमितिसामग्र्या विरोधिन्या विरहेण तदानीमुत्पन्नादनु-व्यवसायादेरन्ततः संस्काराद्वा तत्सम्भवात् संस्कारजन्यत्वेन स्मृतित्वस्य प्रागेव निरासात् स्याद्वा स्वसमानाधिकरणानु-मित्यव्यवहितपूर्वक्षणवृत्तिभिन्नत्वेन स्वसमानाधिकरणानु-मित्यव्यवहितपूर्वत्वानधिकरणवृत्तित्वविशिष्टत्वेन वा स्वस

मानाधिकरणानुमित्युत्पत्त्यनधिकरण-समया-व्यवहितपूर्वक्षण-वृत्तित्वविशिष्टत्वेन वा प्रतिबन्धकत्वं तदव्यवहितपूर्वत्वञ्च तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वम्। न चात्र प्रथमे यत्र सिद्ध्यात्मकपरामर्शानन्तरं सिषाधयिषाया उत्पत्तिकाले तत्पुरुषीयस्य कस्यापि धर्मस्य न विनाशोऽनन्तरं पुनरनुमितिः तत्र तदुत्पत्तिसमयेऽपि सा स्यात् तत्पूर्वकालीनानां सर्वेषां तादृशपूर्ववर्त्तित्वेनाविरोधित्वादिति वाच्यम् अनवरतपरिस्पन्दमानापरिमितपवनादिपरमाणुचेतनसंयोगसन्तानान्तःपातिव्यक्तीनामविरतमेवोपरमात् फलानुत्पादबलेनापि तादृशकल्पनासम्भवात् कारणान्तरकल्पने गौरवाच्च अन्वयव्यभिचारसन्देहस्य च कारणत्वग्रहाविरोधित्वात् उपादीयन्तां वा तत्तदात्मसमयविशेषसम्बन्धा एव तादृशपूर्ववर्त्तिभिन्नाः भवेद्वा तत्तत्पुरुषीयानुमितिं प्रति तत्तदीयानुमित्यव्यवहितपूर्वक्षणत्वादिना तादृशक्षणवर्त्तित्वविशिष्टत्वादिना वा कारणत्वं तथाचोपमानादेः प्रमाणान्तरत्वं भज्येत सर्वत्रानुमितिसामग्रीसम्भवात् विलीयेत च परामर्शत्वादिना कारणत्वं बाधकत्वादिना च प्रतिबन्धकत्वम् अनयैव रीत्या कार्य्यान्तरेष्वपि क्लृप्तानां कारणानां प्रतिबन्धकानाञ्चातथात्वमक्लृप्तानाञ्च तथात्वं प्रसज्येत अतएव न द्वितीयोऽपि प्रकारः वैयर्थ्याच्च सिद्धेः। सिषाधयिषाविरहविशिष्टस्य सिद्ध्यनुमानातिरिक्तसाधकमानयोरन्यतरस्याभावः कारणमिति तु केचित्तन्न साधकमानं हि सिद्धिस्वरूपयोग्यं

तदुपहितं तत्सामग्री वा नाद्यः चक्षुरादिमत्त्वे विनानुमितीच्छामनुमित्यभावप्रसङ्गात् न द्वितीयः सिद्धेः पूर्वं तदुपहितत्वाभावेन प्रत्यक्षसामग्रीसत्त्वेऽप्यनुमित्यापत्तेः अनुमानातिरिक्तेत्यस्य वैयर्थ्याच्च न तृतीयः अनुमितिसामग्र्यभावत्वेन प्रत्यक्षकारणत्वम् अनुमित्साविरहविशिष्टप्रत्यक्षसामग्र्यभावत्वेन चानुमितिकारणत्वमित्यन्योऽन्याश्रयात् स्थाणुत्वाभावव्याप्यदर्शनक्षणे प्रतियोग्यारोपविरहेणाभावप्रत्यक्षसामग्रीविरहात् पक्षतासत्त्वे स्थाणुत्वारोपक्षणे तदभावानुमित्यापत्तेरित्यपि कश्चित् वस्तुतस्तु स्वतन्त्रान्वयव्यतिरेकशालित्वान्नियमेन प्रथममुपस्थितत्वाल्लाघवाच्च प्रत्येकमेव तथात्वमन्यथा बाधादेरप्येवं वान्तर्भावप्रसङ्गात् न चानुमित्साविरहस्य प्रत्येकं विशेषणत्वे गौरवं शाब्दसिद्धौ मय्यामशाब्दं ज्ञानं जायतामितीच्छायामनुमितेरुत्पादात् सिद्धावनुमितिविषयेच्छाविरहस्य प्रत्यक्षसामग्रीसत्त्वे च तादृशेच्छायामनुमित्यनुत्पादात् साधकमाने अनुमितित्वादिप्रकारकेच्छाविरहस्य पृथगेव विशेषणतायास्त्वयापि वाच्यत्वात् स्वनिवर्त्तकप्रत्यक्षादिसामग्रीसमवहितान्यत्वादिना च तादृशेच्छयोरनुगमेऽतीव गौरवम् अन्यतरत्वघटकयोरन्योऽन्याभावयोर्मिथोविशेषणविशेष्यभावे विनिगमकाभावश्च आत्मनिष्ठस्य समवायेन सिद्धेरभावः भिन्नभिन्नेन च सम्बन्धेन तत्तदसाधारणकारणरूपायास्तत्सामग्र्याः मणिविशिष्टस्य वह्नेरिवेतरेतरविशिष्टस्य मनोयोगादेः प्रतिबन्धकत्वायोगात्

तथा च कथमनुगतरूपेण तयोरभावः कारणम् एवं सिद्धेः सिषाधयिषाविरहेण वैशिष्ट्यमेककालावच्छेदेनैकात्मवृत्तित्वं प्रत्यक्षादिकारणचक्षुः संयोगादेस्तन्यादृशमितिसामग्रीविशेषाभावस्य हेतुत्वेऽपि लाघवात् सिद्ध्यभाव एव पक्षव्यवहारनिमित्तम् एतदेवाभिसन्धाय प्रवृत्तिनिमित्तमुक्तमिति वक्ष्यति फलानुपहितसिद्धीच्छाविरहविशिष्टसिद्ध्यभावापेक्षया बाधाभावस्य लघुत्वेऽपि सिद्धसाधनस्थलपक्षव्यवहारविरहेण तादृशसिद्ध्यभावस्यावश्यकत्वे बाधाभावो न निविशते गौरवात् विशिष्टसिद्ध्यभावस्य चात्मनिष्ठस्यैवानुमितिहेतुत्वेऽपि तस्य परम्परासम्बन्धादेव पर्वतादौ पक्षव्यवहार इति ध्येयम् एकस्य पुंसोऽनुमित्सासत्त्वेऽपि अन्यस्य तद्विरहिणः प्रत्यक्षादिसामग्रीसत्त्वेऽनुमित्यनुत्पादात् तत्पुरुषीयानुमितिं प्रति तत्तत्पुरुषीयानुमित्साविरहकालीनतत्तत्पुरुषीयसिद्धिसामग्रीविशेषविरहोऽनन्यगतिकत्वेन हेतुरूपेतव्य इति वदन्ति। अथ सिद्ध्युत्तरानुमितौ सिषाधयिषा हेतुरस्तु नचैवं मण्यादिस्थलीयदाहं प्रत्युत्तेजकस्य हेतुत्वापत्तिः उत्तेजकानामननुगतत्वात् तावदभावविशिष्टमण्याद्यभावस्य चानुगतत्वादिति चेदिहापि दर्शितोऽननुगमः सिषाधयिषायाः सिद्ध्युत्तरानुमितित्वस्यानुगतानतिप्रसक्तं दुर्वचं सिद्धिस्थितिकालीनां स्वेतरसिद्धिकालीनां वानुमितिं प्रति हेतुत्वकल्पने च विनापि सिषाधयिषां सिद्धिनाशकालेऽनुमित्युत्पादो दुर्वारः एकस्य च पुंसः सिद्धिसत्त्वेऽन्यस्य सिषा-

धयिषाशून्यस्यानुमित्यनुत्पादप्रसङ्गः तत्तत्पुरुषीयतादृशा-नुमितिं प्रति सिषाधयिषाया हेतुत्वेऽनन्तकार्य्यकारणभाव-प्रसङ्गः अपि च सिद्धौ सत्यां विनापि सिषाधयिषां सामान्य-सामग्रीतोऽनुमितिसामान्योत्पत्तिप्रसङ्गात् न हीदृशविशेष-सामग्रीं विना सामान्यसामग्र्या अनुमितिजनकत्वं नास्ति न चान्यत्रापि तद्विशेषसामग्र्यन्तरमस्तीति तत्कल्पने चाति-गौरवम् इह जायमाना सा सिद्ध्युत्तरैव स्यात् सा च न जायते कारणाभावादिति चेत् समाजनिष्ठानुमितिसामा-न्यन्तु स्यादेव कार्य्योत्पादविरहस्य विना कारणभावमस-म्भवात् करणव्यापारत्वेनावश्यककारणभावस्य परामर्शस्य कारणतावच्छेदिका पक्षता न कारणमिति तु भ्रमः प्रति-बन्धकान्तराभाववदन्वयव्यतिरेकशालित्वेन हेतुत्वात् अ-न्यथा यथासम्भवनिमित्तकारणस्य समवायिकारणत्वाद्यव-च्छेदकत्वप्रसङ्गात् अथानुमितिसाधारणसिद्धेः प्रतिबन्ध-कत्वे तदभावस्य मण्याद्यभाववत् प्रतिबन्धकाभावत्वेन कार्य्यकालवृत्तेरेव हेतुत्वात् अनुमितिकाले च तदसम्भवात् सा नोत्पद्येतेति चेन्न यस्य मण्याद्यभावादेः कार्य्यसमकाल-तयान्वयव्यतिरेकित्वं तस्यैव तथात्वेन हेतुत्वं नतु सर्वस्य गौरवात् अन्यथा समवायिकारणस्य कार्य्यसहभूतस्यैव हेतु-त्वात् कारणमात्रस्य तथात्वप्रसक्तौ प्राभाकरा एव विजये-रन्निति। प्राभाकरास्तु विनाप्यनुमित्सां क्वचित् परामर्शा-नुमितिप्रवाहस्याविरलतयास्यानुभविकत्वात् कालभेदकल्प-

नायाश्च मानाभावात् मानाभावाच्च पक्षता नानुमिति-हेतुः परार्थानुमाने तु सिद्धसाधनमर्थान्तरविधया दूषण-मित्याहुः ।

लक्षणोपोद्घातेन विशिष्टज्ञानस्य कारणत्वं व्यवस्थापयति पक्षेत्यादि । व्याप्तिस्मरणेति स्मरणत्वमविवक्षितम् अव्याप-कत्वात् लाघवात् । प्रथमोपस्थितत्वलाघवात् । कल्पना-लाघवमाह परामर्शेति परामर्शहेतुत्ववादिनाप्यनुमितेः पूर्वं तादृशज्ञानमवश्यं मन्तव्यं तथाचातिरिक्तधर्मिण-स्तत्रानन्यथासिद्धत्वनियतपूर्ववर्त्तित्वयोश्च कल्पनामपेक्ष्य उ-भयवादिसिद्धनियतपूर्ववर्त्तिनोऽनन्यथासिद्धत्वमात्रकल्पनाल-घीयसीति । ननु धूमत्वावच्छेदेन व्याप्तेरालोकत्वेन च पक्ष-धर्म्मताया ग्रहेऽप्यनुमितिः स्यादित्यत आह एवमिति यद्ध-र्म्मावच्छेदेन व्याप्तिज्ञानं तेनैव रूपेण पक्षधर्म्मताज्ञानं हेतु-रिति नातिप्रसङ्गः ज्ञानद्वयादिति द्वित्वमविवक्षितं लाघ-वात् अवच्छेदकलाघवात् आवश्यकत्वात् व्याप्यतावच्छे-दकप्रकारकव्याप्तिज्ञानस्य हेतुत्वे व्याप्तिज्ञानहेतुताया आव-श्यकत्वात् । क्वचिदुपजीव्यत्वादिति पाठः उपजीव्यत्वञ्च व्याप्ति-ज्ञानं विना यद्धर्म्मावच्छेदेन व्याप्तिज्ञानं तत्प्रकारकपक्षधर्म्म-ताज्ञानस्यासम्भवात् एवञ्च सिद्धे व्याप्तिज्ञाने हेतावतिप्रसङ्ग-भङ्गाय पक्षधर्म्मताविषयत्वमवच्छेदकं कल्प्यते लाघवात् नतु कारणान्तरं गौरवादिति भावः । सिद्धस्य व्याप्तिज्ञानस्य न पक्ष-धर्म्मताविषयत्वमित्याशयेनाह तस्येति । यद्वा व्याप्यत्वज्ञान-

मिति व्याप्यत्वप्रकारकं पक्षधर्म्मताज्ञानमित्यर्थः। ननु विशिष्टज्ञानान्यथानुपपत्त्याज्ञानादृयस्यावश्यं वाच्यतया तस्यैव हेतुत्वं युक्तं तदिदमुक्तमावश्यकत्वादित्यत आह उपजीव्यत्वादिति विशिष्टज्ञानान्यथानुपपत्त्या तत्कल्पने विशिष्टज्ञानस्योपजीव्यत्वादित्यर्थः। स्वसम्वेदनसिद्धमेव ज्ञानद्वयं आवश्यकत्वञ्च तस्योभयवादिसिद्धमित्याशयेनाह तस्येति। असिद्धिं परिजिहीर्षुराशङ्कते अथेति अयं पक्षवृत्तिः हेतुरिति लाघवादिति शेषः। अनुमितिसामग्रा इति स्मृतिहेतुतावादिनां नव्यानां नये दूषणमिदं नतु संस्कारकारणतावादिनां प्राचामिति। अथेत्यादि अत्र यत्र प्रथमं पक्षाग्रहे गृहीतधूमे स्मृतव्याप्तिवैशिष्ट्यभानमनन्तरञ्च गृहीते पक्षे तादृशविशिष्टधीस्तत्रेत्यपि द्रष्टव्यम्। प्रथमत इति विशिष्टज्ञानात् पूर्वमनुमितिसामग्रीविरहप्रदर्शनाय। एवञ्च सिद्धे पूर्ववर्त्तिनि विशिष्टज्ञाने तस्यैव तत्त्वेन हेतुत्वं गुरुधर्म्मद्वयावच्छेदेनान्यथासिद्धत्वकल्पनामपेक्ष्य लघ्वेकरूपावच्छेदेन नियमानन्यथा सिद्धिकल्पनाया एव न्याय्यत्वात् गृह्यमाणव्याप्यवच्छेदकताकधर्म्मप्रकारकपक्षधर्म्मताज्ञानत्वेन पक्षधर्म्मताग्रहप्रकारीभवद्धर्मावच्छिन्नव्याप्तिज्ञानत्वेन वैकरूपेण कारणत्वे चातिगौरवात् विनिगमनाविरहाच्च तत्रापि च नियतपूर्ववर्त्तित्वं कल्प्यमित्याह यत्र चेति। तेन विनेति तथा च व्यभिचारात्कारणत्वं बाधितमितिभावः। स्वतो व्यभिचारं निरस्यति अस्मदुक्तेति। अनवस्थानादिति। न च

धूमान्तरसन्निकर्षे तद्व्यक्तिवृत्तिधूमत्वं वह्निव्याप्तिव्याप्यमिति लिङ्गविशेष्यक परामर्शाद्यसम्भवः धूममात्रासन्निकर्षेऽपि तत्र वह्न्यनुमानात् तद्व्यक्तिवृत्तित्वधूमत्वत्ववैशिष्ट्यग्राहकविरहाच्च असाधारणमिति शरीरादिव्युदासः आलोकादिवारणाय प्रमाणान्तरासहकारीति वाच्यं तदपि प्रमाणान्तरं भवत्येव प्रत्यक्षादिप्रमाकरणत्वेन च विभागान्न तद्व्याघात इत्यपि कश्चित्। यद्वा असाधारणमसमवहितं तथा च यज्जातीयप्रमायां मनोऽन्यकरणेनासमवहितं सत् यद्वहिर्विषयकप्रमोत्पादकं यज्जातीयप्रमासामग्रीविरहे वा यत्प्रमोत्पादकं तत्तद्विजातीयप्रमाहेतुरित्येव व्याप्तिः ततः सिद्धायां विलक्षणप्रमायां विलक्षणे च तत्करणे कल्पनीये आवश्यकत्वाद्बाधकाभावाच्च तस्यैव तथात्वं पर्य्यवस्यतीति। संशयस्वप्नौ च न विशिष्टानुभवरूपौ येनोपनयादिवशाद्वहिर्विषयानुभवजनने क्लृप्तशक्तिकेन मनसा दोषवशाद् प्रमेव तदभावादिवशात् प्रमापि जनयितव्येत्याशङ्क्येत किन्तु धर्म्मिज्ञानकोटिस्मरणादिरूपौ धर्म्मिज्ञानं पुनरनुभवरूपं यथासम्भवमक्षादेः स्मरणञ्च संस्कारादित्याशयेनाह संशयेति। व्याप्यत्वानुमानादिति धूमत्वादौ वह्न्यादिव्याप्तिव्याप्यत्वं जानतो धूमत्वत्वादिना तद्वत्त्वनिश्चयदशायामन्यदात्वसंसर्गाग्रहादेवेति। अतीन्द्रियादौ लिङ्गे व्याप्यत्वप्रकारकज्ञानस्यासम्भवेऽप्यनुमितेः सर्व्वानुभवसिद्धतया तस्य कारणत्वे बाधिते परिशेषाद्गुरोरपि व्याप्यतावच्छेदकप्रकारकज्ञानस्य हेतुत्वे

सिद्धे शाब्दव्याप्यवत्ताबोधस्थलेऽपि तत्कल्पाते कारणं विना कार्य्योत्पत्तेरसम्भवात् तेन च विना तत्रानुमितेरसिद्धत्वान्न तस्यापि हेतुताबाधः तवातीन्द्रियलिङ्गादौ सर्वानुभवसिद्धाया अप्यनुमितेः सर्वथैवापलापः मम तु क्वचित्कालविलम्बादिमात्रकल्पनमित्याशयवानाह अतएवेति तुल्यमित्यभ्युपगमवादः यत्र यदवच्छिन्ने यथाहि तदभावेन तदभावव्याप्यतया गृहीतेन वा विशिष्टे न तत्संशयः तथा यदवच्छेदेन तद्व्यावर्त्तकधर्म्मदर्शनं तद्विशिष्टेऽपि अनुभवबलाद्व्यावर्त्तकस्य तदभावो यदवच्छेदेन वा तदभावोऽवगतो यो वा तदभावव्याप्यत्वेन गृहीतः यथा स्थाणुत्वाभावस्य पुरुषत्वावच्छेदेन गृहे पुरुषत्वस्य स्थाणुत्वाभाव व्याप्यत्वेन गृहीतस्य करादेर्वा इदन्त्वावच्छेदेन गृहे पुरुषोऽयं स्थाणुर्न वेति न संशयः तदभावादिवच्च तद्वदन्योऽन्याभावादिस्तादात्म्येन संशये च तदन्योऽन्याभावादिरपि द्रष्टव्यः एवं न तद्भ्रमोऽपि विशेषदर्शनस्य विपरीतज्ञानमात्रविरोधित्वादित्यग्रे व्यक्तीभविष्यति। नन्वित्यादि इदं नीलत्वेन प्रतीयमानं भावोऽभावो वा भावत्वाभावत्वयोस्तत्त्वयोरित्यर्थः लिङ्गत्वाभावादप्रसिद्धत्वेन तत्त्वासम्भवात् भावत्वाभावत्वेत्यादिकं केवलान्वय्यनुमानमतिरिक्तत्वाभावमभ्युपेत्य केवलान्वयिनः साध्यस्य धर्म्ममात्रमेव व्याप्यमिति तु द्रष्टव्यम्। एवमिति लिङ्गव्याप्यत्वे साध्ये लिङ्गतावच्छेदकं वा वह्नौ। यद्यतिरेकेति यत्संशयव्यतिरेकनिश्चयावित्यत्र व्याख्याततत्त्वमेतत् यद्वा

तद्व्यतिरेकनिश्चये कार्य्यानुत्पत्तौ तद्व्यतिरेकनिश्चयाभावस्य कारणतामपेक्ष्य तन्निश्चयस्यैव कारणत्वं युक्तं लाघवादित्यभिप्रायकमिदम् अतएव क्लृप्तनियतपूर्वभावतया भेदग्रहाभाव एवानुमिति हेतुरित्यभिप्रेत्यास्तु वेत्यादि वक्ष्यति। सामान्यतो विशेषदर्शनात् सामान्यतो भ्रमो न स्यात् विशेषतस्तु स्यादेवेत्यभिप्रायिकामाशङ्कां निरस्यति न चेति अस्तु वेत्यभ्युपगमवादः। नचेत्यादि अभेदज्ञानस्याहेतुत्वे भेदग्रहो न प्रतिबन्धको भवितुमर्हतीत्यर्थः। अभेदेति तथाचातथाभूतस्यापि प्रतिबन्धकत्वमनायत्या वक्तव्यमिति भावः। अतथाभूतत्वस्य सन्दिग्धत्वे व्यभिचारमाह त्वयापीति विशेषणान्तरदाने चाप्रयोजकत्वमिति भावः। गोत्वे गोपदशक्यतावच्छेदकत्वमविशेषितं विशेषितं वा तद्दस्तोल्लनो मधुरत्वेति मधुरत्वव्याप्यो धर्मो जातिरखण्डोपाधिर्वेतिफलतो न विशेषः। गौरितिज्ञाने गोत्वप्रकारकत्वं विशेषमाशङ्काह अन्यथेति। व्यक्तेः प्रकारत्वेऽपि लिङ्गतावच्छेदकत्वासम्भवादाह गवेतरेति गोत्वत्वस्यात्राप्रवेशान्नात्माश्रयः अत्र च यथा साध्यं गवेतरासमवेतत्वादिकमेवोपादेयं कालादौ व्यभिचारवारणाय समवायेन सम्बन्धेन हेतुत्वस्यावश्यवाच्यत्वेनाभावादिसाधारण्येऽप्यदोषात् व्यतिरेकेऽपि रूपान्तरेण सम्बन्धान्तरेण च गोत्वाभावस्यापि व्यभिचारितया गवेतरासमवेतस्य तत्त्वेन समवायसम्बन्धेनाभावस्यैव गमकत्वात्।

लिङ्गं लिङ्गतावच्छेदकं तथाच न व्यभिचारः न तथा

न तेन व्यभिचारवारणम् । नहीति धमान्यान्यत्वमिति दृष्टान्तार्थं न चैकधर्मस्यावच्छेदकत्वापेक्षया धर्मद्वयस्य तत्त्व एव गौरवमिति वाच्यं तादृशैकधर्मघटकानेकभेदादिघटकतया धर्मद्वयस्यैव प्रथमोपस्थितत्वेन चावच्छेदकत्वौचित्यात् अन्यथा वह्न्यादीनामपि व्याप्यतया तावदन्यतमत्वस्यैवावच्छेदकत्वं स्यात् । अन्वयेति विशेषदर्शनं हि विपरीतज्ञानविरोधितया प्रत्यक्ष उपयुज्यते तत्त्वान्यतरत्वदर्शनस्यापि व्यावर्त्तकधर्मदर्शनत्वेनाक्षतम् अत्र च तदन्यान्यत्वस्यातिरिक्तत्वे धूमत्वत्वादेस्तदवृत्तित्वात् धूमत्वादिरूपत्वेऽपि च धूमत्वत्वादेरप्रवेशाल्लिङ्गत्वेऽपि न वैयर्थ्यमित्यपि द्रष्टव्यम् एवञ्चान्यतरत्वस्य व्याप्त्यनवच्छेदकत्वे स्थिते तदवच्छेदेन तद्ग्रहोपगमे तवाप्यन्यथाख्याति स्वीकारप्रसङ्गः । अस्तु वा गुरुरपि धर्मोऽवच्छेदकस्तथापि शुद्धव्याप्तिप्रकारकज्ञानस्थले व्यभिचारान्न तस्य हेतुत्वमित्याह किञ्चेति । वह्नीत्यादि व्याप्तेर्व्याप्त्यनवच्छेदकत्वादिति भावः । मानाभावादिति वस्तुतो विशेषव्याप्त्यवच्छिन्ना महाव्याप्तिरतिरिच्यताम् किं तेन न हि वस्तुतो व्याप्त्यवच्छेदकप्रकारकं पक्षधर्मताज्ञानं हेतुरतिप्रसङ्गात् परन्तु यदवच्छेदेन व्याप्तिर्गृह्यते तत्प्रकारकम् । न च तदानीं व्याप्त्यवच्छेदेन व्याप्तिर्गृह्यते न च तद्ग्रहेऽनुमितिरपलपनीया मानाभावात् कल्पकत्वाविशेषे लघुरूपावच्छिन्नस्यैव नियतपूर्ववर्त्तितायाः कल्पयितुं युक्तत्वात् एतेन व्याप्तिग्रहविषयधर्मिमात्रवृत्तिधर्मप्रकारकं पक्ष-

धर्मताज्ञानं हेतुरित्यपास्तं सामान्यलक्षणानङ्गीकारे धूमत्वादेरपि तथात्वायोगात् वह्निव्याप्यं सर्वं प्रमेयं धूमवान् पर्वत इति ज्ञानादप्यनुमितिप्रसङ्गाच्च व्याप्तिसमानाधिकरणत्वेन तादृशधर्मभानोक्तौ च सा धूमव्यक्तिर्वह्निव्याप्येति ज्ञानसहितादुक्तज्ञानात्तत्प्रसङ्गो वह्निव्याप्यवानिति शाब्दज्ञानासंग्रहः अतएव व्याप्यत्वभानांशे प्रकारतया यस्मादृशो धर्मो भासते तत्प्रकारकं पक्षधर्मताज्ञानं हेतुः वह्निव्याप्यवानित्यत्र च वह्निव्याप्यत्वमेव तथा धूमवानित्यादौ च धूमत्वादिकं धूमसमानाधिकरणेत्यादिव्याप्तिज्ञाने तस्यापि प्रकारकत्वादिति परास्तम्। धूमसमानाधिकरणवह्निव्याप्यं सर्वं प्रमेयं धूमवानयं प्रमेयत्वव्याप्यं सर्वमभिधेयं समानाधिकरणवांश्चायमित्यादि ज्ञानादप्यनुमित्यापत्तिः। न च धूमत्वादेरतिरिक्तवृत्तित्वग्रहे सएव प्रतिबन्धकस्तदग्रहेत्वनुमिताविष्टापत्तिरिति वाच्यम् एवम्बिधेष्टापत्त्यैव सर्वत्र प्रतीकारे विशेषणानुसरणवैयर्थ्यात् व्यभिचाराग्रहपक्षधर्मताज्ञानयोरेव हेतुत्वस्य सुवचत्वात् किञ्च पुरुषान्तरस्य तस्यैव वा कालान्तरे वर्त्तमानं व्याप्तिग्रहमादायातिप्रसङ्गस्य भङ्गाय स्वसमानकालीनस्वसमानाधिकरणव्याप्तिग्रहविषयधर्ममात्रवृत्तिधर्मप्रकारकं पक्षधर्मताज्ञानं वाच्यं तथा च स्वत्वस्याननुगतत्वात्कारणतावच्छेदकस्य तत्तद्व्यक्तिमात्रपर्य्यवसायित्वे मिथो व्यभिचारः तत्तत्पक्षधर्मताज्ञानत्वेनैव हेतुत्व मभ्युपेऽधिकवैयर्थ्यञ्च एतेन गृह्यमाणव्याप्त्यवच्छेदकताकेत्या-

त्युपदर्शितप्रकारद्वयमपि प्रत्युक्तं वेदितव्यं एवं यद्धर्मावच्छेदेन व्याप्तिज्ञानं तद्धर्मप्रकारकं पक्षधर्मताज्ञानं हेतुरित्यपि परास्तम्। तद्धर्मविश्रान्तमूर्त्तिकत्वेनाप्यननुगतत्वाच्च यत्रेच्छा तत्साधनताज्ञानस्येच्छाहेतुत्वेऽपि समानमिति चेत् सत्यं प्रतिवच्यते हि तत्र लघुगुरुरूपाभ्यां युगपदुपस्थितौ लघुरूपावच्छेदेनैवकारणत्वं कल्प्यते लाघवात् नियमादेरेकतररूपावच्छेदेनाप्युक्तसत्वात् इत्याशयवानाह अपि चेति। ननु स्वसमानाधिकरणाभावे इत्यादिव्याप्तौ स्वपदार्थस्यैकस्याभावेन धूमादिकमेव विशिष्य उपादेयं तत्र च धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नवह्निसमानाधिकरणेन्धनवानयमिति ज्ञानादप्यनुमितिप्रसङ्गेन तादृशवह्निसमानाधिकरणधूमत्वं व्याप्तिस्तत्प्रकारकमेव च पक्षधर्मताज्ञानमननुगतमपि हेतुरिति वक्तव्यं तथा च यद्धर्मविशिष्टसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदके गृह्यते तत्प्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुत्वम् अयं वह्निव्याप्यवान् धूमो वह्निव्याप्योऽयं धूमवान् वह्निर्धूमव्यापकोऽयं धूमवानित्यादिसकलवित्तिव्यापकत्वात् न तूपदर्शितव्याप्तिप्रकारकज्ञानत्वेनाव्यापकत्वात् किञ्चान्यथाख्यातिवादिभिर्धूमादिसमानाधिकरणात्यन्ताभावाप्रतियोगिगगनसमानाधिकरणधूमादिमानयमिति-ज्ञानादनुमित्यङ्गीकारादखण्ड-व्याप्तेश्चाप्रसिद्ध-तया प्रकारकत्वासम्भवात् साध्ये साधनव्यापकत्वग्राहकमधिकर

गादौ च साध्यीयत्वाद्यवगाहि पक्षे च तादृशसाधनवत्त्वाव गाहि यज्ज्ञानं तत्त्वेन कारणत्वं वाच्यं तथा च लाघवा त्तादृशव्यापकत्वपक्षधर्मत्वावगाहिनोरेव कारणतावच्छेदक त्वमवृत्तिहेत्वनुरोधेन व्यापकत्वस्यापि खण्डशोनिरुक्तिस्तेषां परमतिरिच्यते यथा च सामानाधिकरण्यज्ञानस्य हेतुत्वेऽपि न क्षतिस्तथा वक्ष्यते इति चेन्न गृह्यमाणव्याप्यतावच्छेद कताकेत्यादिप्रकारद्वयोक्तदूषणग्रस्तत्वात् वह्न्यत्यन्ताभाववद् वृत्तिधर्मवानयमित्यादिज्ञानादप्यनुमित्युदयाच्च व्यभिचार ज्ञानविरोधिज्ञानविषयत्वेनैव व्याप्तीनामनुगमात्। नन्वत्र कारणे कार्य्यमेव प्रमाणं तच्च कार्य्यकारणभावग्रहे सति स्यात् सएव तु न सम्भवति गौरवज्ञानेन प्रतिबन्धादित्यत आह कारणताग्रहेति कारणतानिर्णयं विना तत्फलस्य धर्म्मान्तरनिर्णयस्याभावेन तद्घटितगौरवस्यानिर्णयादित्यर्थः सम्भाव्यते तावदिदं धर्म्मान्तरकल्पनं विना कारणत्वस्यैवा शक्यनिर्वाहत्वादिति चेत् सम्भाव्यतां न तु तत्प्रतिबन्धकं सामान्यतः कार्य्यकारणभावग्रहस्य प्रायशोविलयप्रसङ्गात् तत्र तत्र क्लृप्तनियतपूर्ववर्त्तितावच्छेदकरूपान्तरविरहेणा- गत्या गौरवमप्याश्रीयते इति चेदिहापि तद्विरहस्यान- वधारितत्वादिति कृतं पल्लवितेनेति। व्यभिचारनिर्णयेन कारणत्वग्रहासम्भवं निरस्यति न चेति। अनुमानयोरिति अनुमितैकसाध्यविशिष्टे साध्यान्तरानुमित्या सहचारग्रहोप- गमेऽपि नियमांशग्रहासम्भवादिति भावः। नियतव्यापा

रेति एकसम्बन्धिज्ञानाधीनसम्बन्ध्यन्तरस्मरणादितः क्वचि-द्विशिष्टज्ञानोत्पत्तावपि नियतत्वेन न तस्य व्यापारत्वं यं जनयित्वैव यस्य यज्जनकत्वं तस्यैव तत्र तद्व्यापारत्वादि-त्यर्थः। वस्तुतस्तु तदुपनयव्यक्त्यादेस्तत्प्रमाव्यक्तिं प्रति का-रणत्वेऽपि न क्षतिः प्रमावैजात्यस्यैवात्र प्रमाणान्तरनिमित्त-त्वात् न चात्रापि प्रमावैजात्यमनुपलम्भबाधितत्वात् माना-भावाच्च उपनयस्य च विशिष्टज्ञाने विशेषणज्ञानत्वेन प्रत्यक्षे च सन्निकर्षविधयोपयोगितया जात्यव्यवस्थापकत्वात् अतएव बाह्यान्तरप्रत्यभिज्ञासादृश्याभावादिप्रत्यक्षाणां तत्ताप्रति-योग्यादिविषयत्वमन्यथा जातिसङ्करप्रसङ्गात् ज्ञानद्वय-कल्पने च स्थैर्यमात्रमुच्छिद्येतव्यवस्थापितञ्च विशिष्टज्ञानस्य व्यवहारहेतुत्वम्। न च प्रमाणान्तरासहकृतोपनयजन्यता-वच्छेदकतया वैजात्यसिद्धिः इतरासहकृतत्वेनाजनकत्वात् असिद्धेश्च उपनयात्मकसन्निकर्षवशेन मनसा प्रत्यक्षजनन-स्यैवोपगमात्। पृथगिति न चैवं धारावाहिकोच्छेदः इतर-मात्राविशेषणत्वेनोपस्थितेरेव तन्त्रत्वात् कोटिस्मरणस्य सं-शयेन तस्य च व्याप्तिस्मरणादिना नाशात् विशेषदर्शनकाले च संशयायोगादाह न चेति। गौरवादिति न चैवमभाव-विशेषणत्वेनोपस्थितस्यापि भावस्य ग्रहापत्तिरभावग्राहक-सामग्र्या बलवत्याः प्रतिबन्धात् अभावाविशेषणत्वेनोपस्थि-तित्वमित्यपि कश्चित् वस्तुतः स्वतन्त्रविशेषणज्ञानस्य वि-शिष्टधीहेतुत्वेऽनुमित्यर्थमेव त्वयापि तत्स्वीकरणीयं न हि

विशिष्टप्रत्यक्षं प्रत्येव तथात्वं मानाभावात्। तर्हीत्यादि वस्तुतो यत्र क्वचिदपि गृहीतस्य धर्मिणि साधारणधर्मदर्शनात् स्मृतस्य संशयादिसाधारणी विशिष्टधी रियांस्तु विशेषो यत्कोटिद्वयसहचरितधर्मादर्शनात् कोटिद्वयस्मरणे संशयोऽन्यथा त्वेककोटिनिश्चय इति एतेन धूमत्वादिना पक्षधर्मे व्याप्तिमनुमाय वह्न्याद्यनुमितिरिति परास्तम् धूमत्वाद्यनुपस्थित्या धूमत्वादेर्वह्निव्याप्तिव्याप्यत्वाग्रहे वह्न्याननुमितिप्रसङ्गाच्च एतेन यद्धर्मावच्छेदेन यद्वत्त्वं गृहीतमुपनयवशात् तद्धर्मविशिष्ट एव तद्भासते धूमवत्त्वावच्छेदेन च वह्निमत्त्वग्रहाद्धूमवानेव वह्निमानिति बुद्धिः स्यात् न तु पर्वतो वह्निमानित्यपि परास्तं मानाभावात् चन्दनत्वाद्यवच्छेदेन गृहीतस्य सौरभादेः पुरोवर्त्तिनि चन्दनत्वादिदर्शनादिदं सुरभि इत्यादिबुद्धौ व्यभिचाराच्च यदि चावच्छेदकधर्मवैशिष्ट्यमपि तत्र भासत इति नियमोऽपि तत्र प्रामाणिकस्तदा धूमवानयं पर्वतो वह्निमानित्येव धीरस्तु न हि लिङ्गीप्रधानभाने बाधकमन्यत्साधकविरहात्। हेतुसाध्येति सम्बन्धिद्वयनिरूप्यपदार्थप्रत्यक्षं प्रति सम्बन्धिद्वयप्रत्यक्षस्य हेतुतायाः संयोगादिस्थले त्वयैव क्लृप्तत्वात् तदनादरेऽपि साध्यघटितमूर्त्तिकव्याप्तिप्रत्यक्षस्य साध्यप्रत्यक्षसामग्रीं विनाऽसम्भवादिति भावः। विशेषणेत्यादि विशेषणविशेष्यसम्बन्धस्तदंशे प्रमात्वे लौकिकत्वे वा विशेषदर्शनञ्च विपरीतज्ञानप्रतिबन्धकतया क्वचित् क्वचित्सहचरितधर्मदर्शनत्वेन विशेषण-

स्मारकतया विशेषणस्य च ज्ञानसत्त्वेऽप्यतिरिक्तसन्निकर्ष-स्तदंशे लौकिकतायामुपयुज्यते । एकैव चेति वस्तुतो व्याप्तिभेदेऽपि न क्षतिः सामान्यतो व्याप्तित्वेन गृहीतानां सकलव्याप्तीनां तथैव स्मरणसम्भवात् वह्नेरसन्निकर्षादिति । ननूपनयात्मकसन्निकर्षेणैव नयनेन निरूप्यतां हुताशनो न हि वह्निरिन्द्रियेण द्रव्यसाधेयतया तद्वत्त्वस्य वा ग्रहे तत्सं-योगो हेतुः दण्डी पुरुषो नास्तीत्यादौ व्यभिचारात् कथमन्यथा पक्षधर्मे वह्निमत्त्वगर्भिता व्याप्तिरेव गृह्यते न चाधेयतया मुख्यविशेष्ये साक्षात् द्रव्यग्रहे तत्संयोगो हेतुः अभेदारोपे च नाधेयतया रजतादिकं प्रकारो दण्डाद्यात्मकतत्तावगाहि-प्रत्यभिज्ञायाञ्च तत्तावदभेदो भासत इति न दण्डादेः साक्षा-त्प्रकारतेति वाच्यं मानाभावात् धूमवान् वह्निमानिति सामान्यलक्षणया ग्रहे व्यभिचारात् तत्तासंसर्गस्यापि प्रत्य-भिज्ञायां भानसम्भवात् प्रकृतेऽपि वह्निमदभेदग्रहणेव कृतार्थ-त्वाच्च एतेन तत्ताकारानुपनीततादृशद्रव्यग्रहे स हेतुरिति निरस्तं चैत्रपदवाच्योऽयमित्यादिवत् दण्डायमासीदयं दण्डी-त्यादिग्रहस्यानुभविकत्वात् तत्तात्वस्यातिरिक्तस्याभावात् त-च्छब्दप्रयोगजननाभावस्य च निमित्तान्तरविरहप्रयुक्तस्य जन्य-तानवच्छेदकत्वात् तज्जननयोग्यतायाः प्रकृतेऽपीष्टत्वात् अतएव तदिन्द्रियग्राह्यविद्यमानद्रव्यस्य तेन ग्रहे तत्संयोगो हेतुरिति परास्तम् नयनादिनारजतादेरभावग्रहाभेदारो पादौ व्यभिचाराच्च अथैवं व्यवहितदण्डे पुंसि न कथं

नायनोऽखण्डोति निश्चय इति चेत् कचित्तत्सहचरितधर्म्मा-दर्शनात् तदस्मरणात् क्वचिच्च साधारणधर्म्मदर्शनादिना संशयस्यैव जननात् सति च विशेषदर्शनादाविष्टत्वात् युक्तञ्चैतत् कथमन्यथा दण्डो न वेत्यादिकः संशयः न हि नासौ तद्विशिष्टबुद्धिः न तन्निश्चय इति चेत् किं तेन उक्तं हि संशयत्वं निश्चयत्वञ्च न जन्यतावच्छेदकमिति अस्तु वा तथा तथापि विशेषस्यादर्शनात् संशयस्यैव तद्दर्शनान्निश्चय-स्यापि सम्भवात् मा भूद्वा नायनादिरयं कृताशनादिनिर्णयो मानसस्तु स्यात् तत्र तादृशनियमस्यात्यन्तं बाधितत्वादिति। उच्यते। अस्ति तावदनुमिनोमीत्यनुव्यवसायसाक्षिको ज्ञानविशेषो यत्र कारणमन्वयव्यतिरेकाभ्यां व्याप्यपरामर्शः मानसप्रत्यक्षविशेषोऽसाविति चेत् कुतोऽस्य प्रत्यक्षत्वमनुभव-त्वादिति चेत् किमेवमनुभवत्वमन्यत्प्रत्यक्षत्वात् स्मृत्यन्य-ज्ञानत्वमिति चेन्न अप्रयोजकत्वात् अनुमितौ साक्षात्कारि-त्वग्रहप्रसङ्गाच्च तद्व्यञ्जकलौकिकसन्निकर्षादिजन्यत्वविरहात् तथेति चेदात्मानुमितौ तस्यापि सम्भवात् वह्निमनुमिनोमि न तु साक्षात्करोमीत्यबाधितसाक्षात्कारत्वाभावग्रहाच्च अ-गत्या तु सौरभं न पश्यामीत्यादावन्यथात्वकल्पनं सामान्य-लक्षणानङ्गीकर्त्तनये चाप्रसिद्धवह्न्यादिव्यक्तिकानुमितौ न प्रत्यक्षत्वसम्भावनापि सन्निकर्षासम्भवात् एतेन शाब्दादिकं व्याख्यातं अपलापयिष्यते तावदप्रसिद्धाभावसाध्यकानु-मितिर्न च साक्षात्कारिणी तत्रोपनयस्यासम्भवात् एवञ्च

प्रसिद्धसाध्यकानुमितेरपि न साक्षात्त्वं जातिसङ्करप्रसङ्गादित्यपि केचित् तत्र भेदत्वादिनोपस्थिते जलादिप्रतियोगित्वग्रह इत्यपरे। मानाभावादिति तन्निष्ठावच्छेदकान्तरग्रहमन्तरेणासम्भवाच्चेत्यपि द्रष्टव्यम्। उपसंहरति तस्मादिति वाशब्दोऽनास्थायाम् उभयथापि प्रकृताक्षतेः वस्तुतो व्याप्यपक्षयोर्वैशिष्ट्यावगाहिज्ञानत्वेन हेतुत्वं विनिगमनाविरहेणान्यतरविशेषणविशेष्यभावस्यातन्त्रत्वात्। लाघवादिति अथाव्याप्यवृत्तेर्व्यापकत्वसम्पत्तयेऽभावस्य प्रतियोग्यसामानाधिकरण्यं वाच्यं तच्च स्वप्रतियोग्यनधिकरणवृत्तित्वम् एवञ्चावृत्तिगगनादेर्धर्ममात्रव्यापकत्वं स्यात् तादृशघटत्वाद्यभावाप्रतियोगित्वात् तदधिकरणाप्रसिद्ध्या च तदभावस्य स्वप्रतियोग्यनधिकरणवृत्तित्वासम्भवात् तथा च तद्व्यावृत्तये व्यापके हेतुसमानाधिकरण्यं वाच्यं नचैवं हेतोर्व्यापकसामानाधिकरण्यापेक्षया लाघवमिति चेदस्तु तावदेवमापाततस्तथापि वृत्तिमत्त्वमात्रमुपादेयम्। नचैवं हेतोः साध्यसामानाधिकरण्यस्य संशये व्यतिरेकनिश्चये वा अनुमित्यापत्तिरिति वाच्यं संशये दृष्टत्वात् व्यतिरेकनिश्चये च पक्षधर्म्मत्वाग्रहे परामर्शविरहात् तद्ग्रहे च साध्यासमानाधिकरणधर्म्मान्तरग्रहस्येव तस्यापि विरोधित्वात् अन्यथाविष्टत्वात् पर्वतो वह्निव्याप्यधूमवान् पाषाणमयः पाषाणमयावृत्तिश्च वह्निरिति ज्ञानेन च तुल्ययोगक्षेमं पर्वतवृत्तिधूमव्यापको वह्निर्धूमवदवृत्तिश्चेति ज्ञानम्। न च साध्याप्रतियोगिकस्वसमानाधिकरणयावदत्य-

न्ताभावकत्वं साध्याप्रतियोगिकत्वावच्छेदकस्वसमानाधिकरणात्यन्ताभावत्वकत्वं वा व्याप्तिः साध्यप्रतियोगित्वञ्च केवलान्वयिनि साध्यस्यान्योऽन्याभावे सम्बन्धविशेषावच्छिन्नात्यन्ताभावे वा प्रसिद्धमिति वाच्यं गौरवात् व्यापकत्वाद्यनन्तर्भाविम यावत्त्वस्य दुर्वचत्वात् प्रमाणाभावेन स्वरूपसम्बन्धविशेषरूपत्वासम्भवेनावच्छेदकत्वस्यानतिरिक्तवृत्तित्वपर्य्यवसायित्वाच्च व्यापकतायाञ्च प्रतियोगित्वादेः सामान्याभावस्योक्तत्वात् सम्बन्धादिनिष्ठसाध्यप्रतियोगित्वव्यक्तेरभावस्य व्यभिचारिसाधनसमानाधिकरणयावदत्यन्ताभाववृत्तितया त्वयापि तस्यावश्यं वाच्यत्वात् साधनसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्म्मवत्त्वरूपव्यापकत्वज्ञानमपेक्ष्य साध्यवदन्यावृत्तित्वज्ञानस्य लघुत्वात्। तद्धेतुतावादिनं निरस्यति अतएवेत्यादिना वीप्सासमभिव्याहारादिवशादुद्देश्य धर्म्मवद्वृत्तेरत्यन्ताभावस्यान्योऽन्याभावस्य वा प्रतियोगित्वाभावो विधेयधर्म्मे तद्वति वा भासते नतु विधेयधर्म्मतद्वतोरत्यन्तान्योऽन्याभावानधिकरणत्वमुद्देश्य धर्म्मवति यद्यदभिधेयं तत्प्रमेयमित्यादावसम्भवादिति भावः। साध्येति अयोगोऽभावप्रतियोगित्वं तथाच साध्ये साधनवन्निष्ठाभावप्रतियोगित्वव्यवच्छेदेनेत्यर्थः। स्यादिति न स्याच्च केवलान्वय्यनुमानमित्यपि द्रष्टव्यम्। न पक्षेति एतच्च विरोधस्यातिस्फुटत्वमभिसन्धाय साध्याभाववद्वृत्तित्वबुद्धेरपि व्यापकताधीविरोधित्वादिति वदन्ति। मानसएवेति प्रायिकत्वाभिप्रायेण तेन क्वचिच्छ-

त्वादिना क्वचिच्च साध्येन्द्रियसन्निकर्षात् परामर्शेऽपि न क्षतिः पक्षसाध्यसम्बन्धस्याग्रहात् ग्रहेऽप्यनुमित्साया अनुमितिसम्भवात्। व्यभिचारादिति न च यत्र यदुभयवैशिष्ट्यावगाहि ज्ञानं कारणं तत्र तदेकतरोपसर्ज्जनस्यान्यतरस्य जन्यज्ञाने प्राधान्येन न भानमिति वाच्यं मानाभावात् अत्र चेदमस्वरसवीजं पक्षधर्म्मसमानाधिकरणाभावप्रतियोगित्वत्वेनाभावज्ञानं वह्न्यादावभ्रान्तमसम्भवितादृशप्रतियोगित्वप्रतियोगिताकाभावावगाहि चातिप्रसक्तं पक्षधर्म्मधूमसमानाधिकरणाभावप्रतियोगित्वत्वेन च तज्ज्ञानं न व्यापकं येन रूपेण पक्षधर्म्मताग्रहस्तद्रूपावच्छिन्नव्यापकताज्ञानञ्च मीमांसकमतनिरासेनैव निरस्तमिति स्वर्गकामो यजेतेत्यादावन्वयबोधं शब्दमणिदीधितौ विवेचयिष्यामः।

परिचायकत्वं परिचेयव्यावर्त्तकत्वं तच्च नोपलक्षणतयेत्याह परिचेय इति। विशेषणतया तत्त्वे पुनराह तथाचेति। अवच्छेदकतामात्रेण चान्यथासिद्धावाह अन्यथेति अपिचेत्यादि या यद्विशेषणसमानकालीनत्वेन तादृशी बुद्धि सा ज्ञायमानतद्विशेषणजन्येति। सामान्यव्याप्तौ पक्षधर्मतासम्पत्तये धूमविशेषणिकेत्यादि तादृप्यस्यानुभविकत्वप्रदर्शनाय च धूमवानित्यादिज्ञायमानेति च तज्ज्ञानस्यापि जनकत्वलाभाय साध्यविशिष्टानुमितेः साध्याजन्यत्वाद्विशेषणसमानकालतयेति धूमकालीनवह्निमान् धूमध्वंसादित्यनुमितेः मजधून्यत्वात् विशिष्येति विशिष्ये विशेषणभावापन्न

यत्समानकालीनत्वेन धर्म्मान्तरवैशिष्ट्यावगाहीत्यर्थः तदानीं धूमवान् पर्वतो धूमकालीनवह्निमान् धूमध्वंसवत्त्वादित्यादौ च विशेषणे विशेषणतापन्नस्यैव धूमस्य समानकालत्वं वह्नौ भासते नतु विशेष्ये तथात्वापन्नस्य अनुभवसिद्धोऽयं विशिष्टवैशिष्ट्यबुद्धीनां विशेषणताविशेषः विशेषणं धर्म्मितावच्छेदकं विशेष्यञ्च विधेयम् तथाच विधेयतावच्छेदकावच्छिन्नं यद्धर्म्मविशिष्टे तत्समानकालीनत्वेनावगाहते या अशाब्दी बुद्धिः सा तद्धर्म्मजन्येति पर्य्यवसितोऽर्थः धूमकालीनवह्निमानित्यादौ च विधेयतावच्छेदकधूमकालीनवह्नित्वावच्छिन्नं न धूमकालीनत्वेन भासते परन्तु वह्नित्वावच्छिन्नं धूमवानयं धूमकालीनवह्निमान् पर्वतो वह्निमानालोकादित्यादौ च न धूमवत्त्वविशिष्टे धूमकालीनवह्निमत्त्वं भासते किन्तु तादृशविशिष्टपक्षतावच्छेदकवति वह्निमत्त्वं सम्बन्धमर्य्यादया यत्समानकालीनत्वमवगाहत इत्यपि वदन्ति। अथवा विशिष्टत्वं व्यावृत्तत्वं तच्च तत्समानकालीनत्वग्रहाजन्यत्वं विशेषणविशेष्यपदे च धर्म्मद्वयमात्रोपदर्शके तथाचैकस्मिन् धर्मे यद्धर्म्मसमानकालत्वग्रहाजन्या या अशाब्दी तद्धर्मसमानकालीनत्वबुद्धिः सा ज्ञायमानतद्धर्मजन्येत्यर्थः एवं न क्वापि व्यभिचारशङ्का साध्यस्य पक्षतावच्छेदकसमानकालीनत्वं क्वापि नानुमितिविषयो मानाभावात्। नवीननये तु कालादेः पक्षतावच्छेदकत्वे तदवच्छिन्नत्वं साध्यस्य भासत इत्यन्यदेतत् दण्डी पुरुषो गच्छतीत्यादिशाब्दधीवारणाय

अशाब्देति तुल्यन्यायतयोपनीतभानवारणाय तदन्यत्वमपि वाच्यमित्यपि वदन्ति एतन्मये चातीतत्वाग्रहेऽप्यतीतादिलिङ्गज्ञानान्नानुमितिरिति नातीतलिङ्गकालीनत्वावगाह्यनुमितौ व्यभिचारः कालोऽत्र वर्त्तमानो विवक्षितः तद्वैशिष्ट्यांशे च प्रमात्वं वाच्यं वर्त्तमानत्वं वा तादृशधर्म्मविशेषणमित्यपि कश्चित्। केचित्तु विशेषणं विशेष्यतावच्छेदकं तथाच वर्त्तमानविशेष्यतावच्छेदकसमानकालीनतया धर्म्मान्तरवैशिष्ट्यावगाह्यशाब्दज्ञानत्वादित्यर्थः सतश्च पक्षतावच्छेदकस्य हेतुत्वमिष्टमेव समानकालीनत्वानुसरणन्तु ताद्रूप्यविषयत्वे प्रतिज्ञायमानविशेष्यतावच्छेदकजन्यत्वस्य प्रयोजकत्वसूचनायेत्याहुः। परामर्शएवेति न च कारणतावच्छेदकस्य तस्य न व्यापारता परामृश्यमाणत्वेन परामर्शाजननादिति वाच्यं व्यापारं प्रति रूपान्तरेण हेतुत्वेऽपि फलम्प्रति ताद्रूप्येण हेतुतायां विरोधाभावात् लिङ्गत्वेनैवानुमितिहेतुतापरामर्शस्तु व्यापारमात्रमित्यपि केचित्। परामर्शाविषयस्येति विनिगमनाविरहो विशेषणत्वं वा तस्य हेतुत्ववीजं नचेदमज्ञायमानेऽस्तीति भावः न च विशिष्टस्य कारणत्वं गृह्णत् प्रमाणं विशेषणतावच्छेदकावच्छेदेनापि तत्परिच्छिनत्ति तथाचापरामृश्यमाणस्यापि लिङ्गत्वेन हेतुत्वमविरुद्धमिति वाच्यं यतो हि लिङ्गत्वं न साध्यव्याप्यत्वादिकं तदप्रसिद्धावपि गगनाद्यनुमानात् नापि परामर्शविषयतावच्छेदकमात्रं तथा सति वस्तुमात्रस्य वानुमिति-

हेतुतापत्तेः नचेदं प्रामाणिकं तथान्वयव्यतिरेकादिविरहात् अन्यथेच्छाशाब्दबोधादिकं प्रतीष्टसाधनत्वाकाङ्क्षादिकुक्षिनिक्षिप्तस्य जगतएव हेतुतापत्तेः न वा वास्तवो विनिगमनाविरहोऽपि प्रमेयत्वादिना ज्ञातादपि लिङ्गादनुमित्यापत्तेः व्याप्तिपक्षधर्म्मत्वेन ज्ञानमानत्वोक्तौ च लाघवात्तादृशज्ञानत्वेनैव हेतुत्वात्। किञ्च कालान्तरीयतादृशज्ञानविषयादपि लिङ्गादनुमितिप्रसङ्गः कारणतावच्छेदकावलीढकारणसत्त्वस्यैव कार्य्योत्पत्तिनियामकत्वान्नतु तद्विशिष्टसत्त्वस्यैव गौरवात् इतोऽपि च प्रतिबन्धकाभावादीनां न कारणतावच्छेदकत्वं परामर्शविशिष्टसत्त्वस्य चात्र प्रयोजकत्वाभिधाने लाघवादावश्यकत्वाच्च परामर्शस्यैव तथात्वं तत्र च नातिप्रसङ्गशङ्कापि। अथैवं संयुक्तेन्द्रियादीन्द्रियसंयोगाद्योः कारणतायामपीदमेव विनिगमकं स्यादिति चेत्स्यादेव यदि न स्यातामिन्द्रियादेः स्वतन्त्रान्वयव्यतिरेकौ स्याच्च व्यापारेण व्यापारिणोऽव्यवधानम् न चानुमितिमात्रे तौ लिङ्गस्य न चातीन्द्रियस्यापि तस्य परामर्शो व्यापार इति। अपि च चैत्रेण परामृश्यमाणाल्लिङ्गादपरामृशतोऽपि मैत्रस्यानुमित्यापत्तिः तत्तत्पुरुषीयानुमितिं प्रति तत्तत्पुरुषपरामृश्यमाणलिङ्गत्वेन हेतुत्वे चानन्तकार्य्यकारणभावप्रसङ्गः इच्छाकृतिसुखदुःखस्मरणविशिष्टज्ञानशाब्दबोधादिषु ज्ञानेच्छाधर्म्माधर्मनिसंयविशेषणभानपदार्थज्ञानादीनामिवानुमितौ परामर्शस्याप्येकार्थप्रत्यासत्त्या हेतुत्वान्नातिप्रसङ्गशङ्कापीति कृतं पल्लवितेन। एका-

न्योऽन्याभावविशिष्टापरान्योऽन्याभावादिर्वर्त्तमान एव सर्वत्र हेतुः सम्भवतीत्यत आह यदि चेति। किन्तु तत्प्रागभाव इति तस्य च विरोधिकालावच्छेदेन व्याप्यत्वग्रहान्न तत्कालीनसाध्यसिद्धिरिति भावः। अपिचेत्याद्यभ्युपगमवादः नियतसामानाधिकरण्यरूपाया व्याप्तेः प्रागभावादौ दुरुपवादत्वात् धूमप्रागभावत्वादिकं नावच्छेदकमिति चेत् किञ्चातः न चैतदपि व्याप्तेरवच्छिन्नत्वनियमात् परिशेषेण तस्यैव तथात्वात् अन्यथा धूमादिवृत्तिव्याप्तीनामपि धूमत्वादिकमवच्छेदकं न स्यात्। अथ स्वव्यापकसमानाधिकरणं व्याप्यं व्यापकत्वञ्च तद्धर्मविशिष्टसमानाधिकरणाभावप्रतियोगित्वाद्यवच्छिन्नप्रतियोगिताकाभाववत्त्वादिकं स च विशेषणं धर्मो व्याप्त्यवच्छेदकः न च धूमप्रागभावसमानाधिकरणाभावप्रतियोगितात्वादिकं प्रतियोगितावच्छेदकं गौरवादपि तु धूमसमानाधिकरणाभावप्रतियोगितात्वादिकमेव लाघवात् एवञ्च न धूमप्रागभावो व्याप्यो न वा तत्त्वं व्याप्यवच्छेदकम् अतएव प्रमेयधूमत्वादिकमपि नावच्छेदकमिति चेत् गतं तर्हि जातिसमनियतोपाधिगुणादीनां व्याप्यत्वेन लाघवेन गोजलादिनिष्ठाभावप्रतियोगितात्वादेरवच्छेदकत्वात् न तु सास्नास्नेहादिमन्निष्ठाभावप्रतियोगितात्वादेर्गौरवात् प्रस्थितञ्च गोत्वादिवृत्तिधर्माणामवच्छेदकत्वेन आपतितञ्च ते नीलधूमत्वादेर्व्याप्त्यवच्छेदकत्वेन नीलधूमसमानाधिकरणाभावप्रतियोगित्वाद्यभावस्यातिरिक्तत्वात्

प्रमेयधूमत्वादिना वह्न्याद्यव्यापकत्वार्थमिव स्नेहत्वादिना व्याप्यत्वार्थमपि लघुगुरुसाधारणस्यावच्छेदकत्वस्योपादानं कृतस्तदुद्दाम इति। तथाचेति तत्रैव क्लृप्तसामान्यकारणस्य विशेषरूपेण हेतुत्वं यत्र कल्पाकारणतावच्छेदकमपेक्ष्य न गौरवम् अन्यथा विशेषकारणकलापविलयप्रसङ्गादिति भावः। धूमकालीनेत्यादि सामानाधिकरण्ये कालविशेषस्यापि सम्बन्धघटकतया प्रविष्टत्वादित्यर्थः। यदा यत्रेति कालिकदैशिकव्याप्तिद्वयज्ञानात्कालदेशयोः साध्यं सिध्यदसति बाधके लाघवादेकमेव सिध्यतीत्यपि वदन्ति। पक्षतावच्छेदकेति पक्षतावच्छेदककालाद्यवच्छिन्नमित्यर्थः। किन्तु व्याप्तीति न च स्मरणात्मकपरामर्शस्थले तदसम्भवः तत्र व्याप्तिविशिष्टानुभवस्य संस्कारद्वारा परामर्शहेतुत्वात् फलाजनकव्यापारस्य फलजनकव्यापारजनकत्वे विरोधाभावात्। न च विशिष्टपरामर्शत्वेन न कारणत्वं व्याप्तिज्ञानत्वेन च न तद्विशिष्टस्मृतिहेतुत्वं न वा विशिष्टस्मृतित्वेनानुमिति हेतुत्वमिति वाच्यम् व्याप्तिविषयकज्ञानत्वस्मृतित्वाभ्यां विशिष्टविषयकतत्त्वाभ्यां वा हेतुहेतुमद्भावेऽपि व्यापारव्यापारिभावाविरोधात् न हि द्वारद्वारिणोः फलजनकत्वं येन रूपेण तेन रूपेण तयोर्मिथोहेतुहेतुमद्भावेऽपि नियमो मानाभावात् इन्द्रियतत्संयोगपदज्ञानपदार्थोपस्थित्यादिषु प्रत्यक्षशाब्दादिकरणव्यापारेषु व्यभिचाराच्च नचैवं धारावहनस्थले पूर्वपूर्वेषां विशेषणज्ञानानामुत्तरोत्तरत्नद्वारा शिष्ट-

प्रत्यक्षं प्रति करणत्वापत्तिः यं जनयित्वैव यस्य यज्जनकत्वं तस्यैव तत्र व्यापारत्वात्। यत्तु तथानियमेऽपि न क्षतिर्विशिष्टस्मृतेरपि व्याप्तिविशिष्टज्ञानतया विशेषणव्याप्तिविषयकेण पूर्वानुभवेन संस्कारेण वा जननाद्व्याप्तिविषयत्वेनैव करणत्वादिति तन्न जन्यत्वविशेषितेन संशयसाधारणेन व्याप्तिविशिष्टज्ञानत्वेन तज्जन्यत्वात् नित्यसाधारणेन च व्याप्तिविशिष्टवैशिष्ट्यावगाहिपक्षनिश्चयत्वेनानुमितिहेतुत्वात् यदि च विशिष्टव्याप्तेः प्रथममनुपस्थितावपि विशेष्ये विशेषणं तत्रापि विशेषणमितिरीत्या परामर्शादनुमितिस्तदा नियतपूर्वोपस्थितिकपदार्थोपस्थितेरेव करणत्वं वाच्यम्। यत्तु परामर्शजनकत्वेन तत्तद्विशेषणज्ञानानां करणत्वमिति तन्न अन्यम्प्रति पूर्ववर्त्तित्वं गृहीत्वैव तथात्वग्रहेणान्यथासिद्धत्वात् न च तत्र फलाननुगुणमन्यं प्रतीति वाच्यं गौरवात् न चैवं भ्रमिजनकत्वलक्षणं दृढत्वमपि दण्डे घटजनकतावच्छेदकं न स्यादिष्टत्वात् दण्डत्वेनैव तथात्वात् क्वचिद्घटानुत्पादो भ्रमिरूपद्वारविरहात् क्षुद्रचक्रभ्रमिजननसमर्थान्महाचक्रसमवहितादृण्डाद्घटानुत्पत्तौ तत्प्रयोजकताया आवश्यकत्वात् भ्रमिविशिष्टत्वेन च जनकत्वे चक्रादीनामपि पृथक्कारणत्वं न स्यान्नस्याच्च घटार्थितया दण्डे निष्कम्पा प्रवृत्तिः प्रथमं भ्रमेरुपधानानिर्णयात् अस्तु वा भ्रमिप्रयोजकोऽवयवसंयोगविशेषादिरेव तथा प्रथमोपस्थितत्वादावश्यकत्वाच्च अन्यथा घटजनकत्वेनैव भ्रमिजनकतां किमिति

न रोचयेः। अतएव सौवर्णवैणवादिदण्डेष्वनुगतदण्डत्ववि-
रहेऽपि न क्षतिः। किञ्चैवं प्रवृत्तिं प्रतीष्टसाधनताज्ञानजन-
कत्वेन शब्दादीनां शाब्दबोधं प्रति च तज्जनकाकाङ्क्षादिज्ञा-
नजनकत्वेनानुमानसंस्कारतत्तद्विशेषणज्ञानादीनां कार्य्या-
न्तरं प्रति च तज्जनकतत्तत्पदार्थकारणानां तत्तत्पदार्थकार-
णत्वेन हेतुत्वप्रसङ्गः तज्जनकत्वेन हेतुत्वे तत्त्वेनैव हेतुत्वं प्रथ-
मोपस्थितत्वादावश्यकत्वाल्लाघवाच्चेति चेत् किमिदं प्रकृते
पाणिपिहितम् इदं पुनरिहावधेयं विशिष्टविषयकत्वेन कार-
णत्वे केवलविशेषणादिविषयत्वेन न हेतुत्वं तदवच्छिन्नकार्य्य-
जनकतावच्छेदकान्तराव्यापकरूपेणैव तदवच्छिन्नं प्रति
जनकत्वात् दर्शयिष्यते हि तथान्यथा सिद्धत्वमन्यथाघटत्वा-
द्यवच्छिन्नं प्रति कपालतत्संयोगादीनां जन्यत्वविशेषितेन
रूपेण वा द्रव्यत्वगुणत्वादिना विशिष्टवैशिष्ट्यबोधं प्रति च
विशेषणतावच्छेदकविषयत्वेन हेतुत्वप्रसङ्गात् अनुमितिशाब्द-
बोधचिकीर्षादिकं प्रति च परामर्शाकाङ्क्षाकृतिसाध्यत्वादि-
ज्ञानविषयविशिष्टाविशिष्टतत्तत्पदार्थविषयत्वेन हेतुत्वे अ-
नन्तकार्य्यकारणभावप्रसङ्गाच्च न चात्र करणान्तरासम्भावा-
दगत्या परामर्शजनकज्ञानस्य तथात्वं कल्प्यते चिकीर्षां
प्रत्यपि कृतिसाध्यताज्ञानजनकज्ञानस्य तथात्वापत्तेः तत्र
मन एव करणमिति चेत् इहापि तदेवास्तु मनोऽसाधारण-
करणकज्ञानत्वेन मानसत्वापत्तिरिति चेच्चिकीर्षादिसाधा-
रणतत्करणकत्वस्यैव ज्ञानत्वविशेषितस्यापि तस्या प्रयोजक-

त्वात् किं तर्हि मानसत्वे प्रयोजकमिति चेत् किन्नाम प्रयोजकं कारणञ्चेन्न किञ्चित् कार्य्यञ्चेत्तत्प्रत्यक्षं व्यापकञ्चेत्प्रमेयत्वादि व्याप्यञ्चेत्तत्सामग्रीजन्यत्वादि तदवच्छिन्नोत्पत्तिनियामकश्चेत्तत्सामग्री करणाभेदे कथं कार्य्यवैजात्यमिति चेत् सामग्रीवैलक्षण्यात् यथा मनःकरणकानामेव चिकीर्षासुखादीनां यथावाग्निकरणकानां पाकजानां कथं तर्हि प्रमाणविभाग इति चेत् करणविशेषकक्रियावैजात्यविशेषादिति विभाव्यताम्। अपरे तु व्याप्तिज्ञानत्वेन विशिष्टपरामर्शत्वेन वा नानुमिति मात्रं प्रति हेतुता साध्यादिभेदेन व्याप्तिभेदात् किन्तु पक्षज्ञानत्वेनाभावज्ञानत्वेन ज्ञानत्वेन वा पक्षोऽपि धर्म्मिमात्रं पक्षताया अप्यननुगमात् तत्तपक्षतावच्छेदकविशिष्टवह्न्यनुमितिं प्रति तत्तद्विशिष्टे वह्निव्याप्यवत्तापरामर्शत्वेन हेतुताया आवश्यकत्वे वह्न्यनुमितिमात्रं प्रत्यपि न तादृशपरामर्शत्वेन हेतुता गौरवात् किन्तु वह्निव्याप्तिज्ञानत्वेन लाघवात् वस्तुतो वह्निज्ञानत्वेनैव तथा अतिलाघवात् एवं वह्न्यभावानुमितिं प्रत्यपि एतेनानुमित्यन्तरं व्याख्यातमिति वदन्ति। कृतं पल्लवितेनेति।

केवलान्वयीत्यादि केवलान्वयिसाध्यकादीत्यर्थः। तत्र तेषु मध्ये असिद्धिपक्षम् अत्यन्ताभावाप्रतियोगिसाध्यकं केवलान्वयि एवमगृहीतान्वयव्यतिरेकिसाध्यकं केवलव्यतिरेकिगृहीतान्वयव्यतिरेकिसाध्यकमन्वयव्यतिरेकि व्याप्तिग्राहकसहचाराभेदाद्भेदे त्वन्वयसहचारमात्रगृहीतव्याप्तिकत्वं

केवलान्वयित्वं तच्च प्रकृतव्याप्तिग्राहकाज्ञानविषयसहचारत्व-व्यापकान्वयसहचारत्वकत्वं तादृशसहचारत्वव्यापकप्रकृत-व्याप्ति घटकसहचारत्वकत्वं वा गृहीतव्याप्तिभेदाङ्गेदे तु प्रकृतहेतुकप्रकृतसाध्यानुमिति-हेतुज्ञानविषयव्याप्तित्वव्याप-कप्रकृतसाध्यव्याप्तित्वकत्वं तत्त्वम् जलं निर्गन्धं पृथिवीत्व-व्यापकाभावप्रतियोगिमत्वादित्यादौ हेतुतावच्छेदिका च व्याप्तिर्न प्रकृतसाध्यानुमित्यौपयिकी तद्विशिष्टपक्षधर्म्मताज्ञा-नेऽपि व्याप्त्यन्तरबोधं विना निर्गन्धत्वानुमित्यनुदयादिति ना-व्याप्तिः वह्न्यभाववान् वह्निव्यापकाभावप्रतियोगिमत्त्वादित्या-दावन्वयव्याप्तेरवच्छेदिका व्यतिरेकव्याप्तिर्न तु सैवेति नाप्र-सङ्गः अतएवेतरव्यापकाभावप्रतियोगित्वेनाभावप्रतियोगित्वेन वा यल्लिङ्गज्ञानं न प्रकृतसाध्यानुमितिहेतुस्तत्केवलान्वयीत्यपि वदन्ति एवं केवलव्यतिरेकित्वादिकमपि निर्वाच्यम्। अभिधे-यत्वं शब्दशक्यत्वं विपक्षत्वव्याघातो विपक्षत्वासिद्धिः। ननु व्यावृत्तत्वमन्योऽन्याभावप्रतियोगितावच्छेदकत्वं तच्च लघु-गुरुसाधारणं गगनादिनिष्ठान्योऽन्याभावप्रतियोगितावच्छे-दकञ्चेति न व्यभिचार इत्यत आह। एवमिति। नन्वभाव-प्रतियोगित्वादिकमभावादिव्यक्तिभेदान्नानैव अनुगतव्यवहा-रस्तु कथञ्चिद्विशेषणतावच्छेदकधर्म्मानुगमादेवञ्च लक्ष्या-प्रसिद्ध्या लक्षणासम्भव इत्याशङ्कते तत्वेत्यादि। यत्व हीत्या-दभ्युपगमवादः वस्तुतो भूतलादिदेशे समये च तस्य वर्त्तमा-नत्वादाकाशाभावतुल्यत्वाच्च। अभावाभावस्येति सावधारणं

भावत्वात् यदाहुराचार्याः स्वाभावविरहात्मत्वं वस्तुनः प्रतियोगितेति प्रतियोग्यं वेति प्रागभावादेरत्यन्ताभावाभावरूपत्वनयेऽपि न क्षतिः तन्मतेऽत्यन्ताभावस्यापि तदभावरूपतया तस्यापि प्रतियोगित्वात् । असाधारण इति प्रतियोगितावच्छेदक इति तु तत्त्वम् अथान्योऽन्यात्यन्ताभावसाधारणः प्रतियोगितावच्छेदकसम्बन्ध एवाभावाभावः स च कचित्तादात्म्यं कचिच्च संयोगादिरिति चेत् यद्वत्त्वे हि ज्ञाते यद्वत्त्वं न प्रतीयते तदभाववत्त्वञ्च व्यवह्रियते तस्यैव तदभावात्मकत्वमुपेयते प्रतियोगितदभाववत्त्वबुद्धोश्च मिथस्तथात्वमानुभविकं न च तत्सम्बन्धवत्त्वं तद्विषयः सम्बन्धसम्बन्धवत्त्वाबुद्धिवत् कचित्सम्बन्धबुद्धिविशेषदर्शनतया प्रयुज्यते न च स्वतो मानाभावात् अथ सम्बन्धान्तरावच्छिन्नाभाववति सम्बन्धान्तरेण प्रतियोगिनो वृत्तेर्न तदभावविरोधित्वमिति चेत् प्रतियोगितावच्छेदकसम्बन्धस्याभाववति सम्बन्धान्तरेण वृत्तेर्न तथात्वं सम्बन्धविशेषेण च विरोधित्वं तुल्यमेव अनतिप्रसक्ताये च स्वप्रतियोगितावच्छेदकसम्बन्धत्वेनाभावत्वकल्पने क्वानुगमसम्भावनापीति अधिकरणसम्बन्धस्यापि प्रतियोगितावच्छेदकत्वात्तद्वत्यत्यन्ताभावविलयप्रसङ्गो भवतां तदभावविलोपप्रसङ्गो वेति । लक्षणम्परिष्करोति वृत्तिमदित्यादि आकाशस्य तदभावाभावत्वमित्यभ्युपगममात्रं भाववति तदभावासत्त्वप्रतीत्यां हि भावस्य स्वाभावाभावत्वं कल्प्यते न चेह तथा अभावप्रतियोगित्वं स्वरूपसम्बन्ध एवेत्युक्तमधस्तात् अभा-

प्रतियोगित्वञ्चाप्रयोजकम् एवञ्च यत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावाप्रतियोगित्वं यस्य तस्य तेन सम्बन्धेन केवलान्वयित्वमिति सूचयितुं वृत्तिमदिति अतएव ज्ञानस्य ज्ञानत्वस्य च समवायेन ज्ञानविषयत्वादेश्च व्यधिकरणसमवायादिना सम्बन्धेनाभावप्रतियोगित्वेऽपि विषयतया परम्परासम्बन्धेन स्वरूपसम्बन्धेन च केवलान्वयित्वं संयोगाद्यभावोपसंग्रहाय च प्रतियोग्यसमानाधिकरणत्वेनाभावो विशेष्यः आकाशाभावोऽपि च यथा प्रतियोग्यसमानाधिकरणस्तथोक्तमधस्तात् वृत्तिमतस्तादृशाभावाप्रतियोगित्वमितिवार्थः व्याप्यवृत्तित्वार्थकं वृत्तिमत्पदमभावविशेषणमित्यपि केचित् तादात्म्येनाभिधेयस्य केवलान्वयित्वसम्पत्तये व्याप्तिवदखिलमालोकनीयम्। प्रमाजातेयेति तथाच तादृशभावप्रतियोगितानवच्छेदकधर्म्मवत्त्वमर्थः इत्यञ्च प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यमेवाभावविशेषणं तेन द्रव्यगुणभेदयोर्द्वित्वादिना न केवलान्वयित्वम्। नचैवं विरुद्धयोर्धर्मयोर्द्वित्वेन केवलान्वयित्वापत्तिः तदवच्छिन्नाधिकरणाप्रसिद्ध्या तदवच्छिन्नाभावे प्रतियोग्यसामानाधिकरण्यस्यासम्भवादिति वाच्यं तादृशधर्म्मावच्छिन्नस्य यत्किञ्चिदधिकरणवृत्तिताया विवक्षितत्वात् क्वचिदपि तादृशोभयवत्त्वाप्रतीतेस्तस्यातथात्वात्। सन्दिग्धसाध्यवत्त्वं पक्षत्वमित्याशयेनाशङ्कते तथापीति अस्तित्वसाध्यस्य घटवृत्तित्वसाध्यस्य साध्यसिद्धिविरोधी साध्यसिद्धिनिवर्त्त्यः॰ विशेषणविशेष्यभावभेदेऽपि विरोधिविषय-

तामात्रेण प्रतिबन्धकत्वमनुभवबलादास्थीयते नहीदं साध्यवदत्र वा साध्यमित्येकतरनिश्चयेऽत्र साध्यं न वा इदं साध्यवन्न वेति अन्यतरः सन्देह इति। पक्षनिष्ठेत्यादि पक्षनिष्ठाभावप्रतियोगित्वज्ञानविरोधिज्ञानस्य साध्यसाधकत्वेन कथञ्चित्साध्यसिद्ध्यनुगुणत्वेन पक्षनिष्ठाभावप्रतियोगित्वज्ञानाभावस्य वा साध्यस्य साधकत्वेन तदभावस्य तस्य साध्ये पक्षनिष्ठाभावप्रतियोगित्वज्ञानस्य सत्त्वे पक्षनिष्ठाभावप्रतियोगित्वावगाहिज्ञानत्वेन साध्यविशिष्टपक्षज्ञानविरोधित्वेन वा रूपेणाभावस्य योग्यतात्वात् व्यतिरेकः विपक्षे हेतोरभावः व्यतिरेकव्याप्ती साध्याभावहेत्वभावयोर्यौ व्यतिरेकौ साध्यहेतुतयोर्व्याप्ती। अत्र वदन्ति साध्याभाववदवृत्तित्वमेव व्याप्तिर्लाघवात् प्रायशः साधनभेदेऽप्यभेदाच्च यत्सम्बन्धावच्छिन्नसाध्याभाववति हेतोरवृत्तित्वं गृह्यते तेन सम्बन्धेन साध्यसिद्धिः फलं साध्याभाववति येन सम्बन्धेन हेतोरवृत्तित्वं गृह्यते तेन सम्बन्धेन पक्षधर्म्मताधी कारणमिति नातिप्रसङ्गः आकाशादेस्तथात्वेऽपि पक्षधर्म्मताज्ञानविरहान्नानुमितिः निविशतां वा तत्र साध्यसामानाधिकरण्यं वृत्तिमत्त्वं वा अथ साध्याभाववदवृत्तित्वं तद्वृत्तिभिन्नत्वादिरूपं व्यभिचारज्ञानविरोधिज्ञानविषयत्वेनानुगमनीयं तच्च व्यापकसामानाधिकरण्यसाधारणमिति चेत् स्यादेवं यदि व्यापकताज्ञानं व्यभिचारबुद्धिं विरुन्ध्यात् नचैवं वह्न्यभाववद्वृत्तिर्धूम इति ज्ञाने हि वह्नित्वं स्वरूपेण प्रतियोगित्वं

तदवच्छेदकत्वञ्च सम्बन्धमर्थ्यादया भासते धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकं वह्नित्वमित्यत्र च वह्नित्वत्वेन वह्नित्वे प्रतियोगितात्वविशिष्टतदवच्छेदकत्वत्वविशिष्टाभाव इति विषयविरोधविरहात् विशिष्टस्य वह्नित्वस्यावच्छेदकत्वेन प्रकारान्तरानुसरणे च सुतरां मणिमन्त्रादिन्यायेन च प्रतिबन्धकतायां मानाभावात् व्यापकताज्ञानादेवानुमितिरिति च नानुभविकं न वा यौक्तिकं ज्ञानत्वत्वादिना ज्ञानत्वादेर्व्यापकतावच्छेदकत्वग्रहे ज्ञानादिमानित्यनुमितेरयोगात् अन्यथा जातित्वेनानुभवत्वव्यापकगुणत्वव्याप्यजातित्वादिना वा तथात्वग्रहेऽपि तत्प्रसङ्गात् एतेन केवलान्वयिसाध्यकत्वज्ञानमेवानुमितिहेतुरित्यपि परास्तम्। सर्वजनानुभवसिद्धानुमिति भावे धूमादिदर्शनानन्तरं जायमाने गृह्यमाणव्यतिरेकवह्न्यादिज्ञानेऽसम्भवाच्च प्रमेयत्वादेश्च घटादिवृत्तित्वं केवलान्वयित्वेन कथञ्चित्तद्वृत्तिधर्मव्यापकत्वेन वानुमेयं न तु ज्ञेयत्वादिहेतुकातदनुमितिरानुभविकी एवं साध्याभावव्यापकाभावप्रतियोगित्वमपि नानुमित्यौपयिकं गौरवात् व्यभिचारज्ञानाविरोधित्वाच्च वह्न्यभावसमानाधिकरणाभावाप्रतियोगी धूमाभाववदिति ज्ञानं धूमाभावाभावत्वेन तत्र वह्न्यभावसामानाधिकरण्यबुद्धिं कदाचिद्विरुन्ध्यात् न तु धूमत्वेन भिन्नप्रकारकत्वात् व्यतिरेकव्याप्तिग्रहाधीना च धीर्नानुमितिस्तत्त्वेनाननुभवात् क्लृप्तकारणाभावात् सामग्रीभेदकल्पनायाश्चानुभवैकाधीनत्वात्

किन्तु विजातीयातत्करणमपि प्रमाणान्तरमर्थापत्तिरेव क्लृप्तप्रमाणद्वयसमाहारसमशीलञ्च युगपदन्वयव्यतिरेकिधर्मद्वयप्रतिसन्धानम् अथ निर्णीतिं विना सिद्धीच्छामर्थापत्तेरनुत्पादात् पक्षताजन्यत्वात् साप्यनुमितिर्लाघवेन पक्षताजन्यत्वस्यैवानुमितित्वे प्रयोजकत्वात् । नचैवं पक्षताप्रत्यक्षस्यापि तथात्वापत्तिरिच्छासत्त्वेऽपि कालान्तरे प्रदेशान्तरे वा तद्विरहसत्त्वेनैककालीनत्वाद्यतीन्द्रिय घटितप्रतियोगित्वेन तस्या अतीन्द्रियत्वादिति चेन्न अनुमितावेव पक्षताया हेतुत्वस्य निरस्तत्वात् साध्यादिभेदेनाननुगतत्वात् तज्जन्यत्वस्याप्रयोजकत्वात् प्रयोजकत्वञ्च न जनकत्वसम्भवात् न व्याप्यत्वं मानाभावादित्यादेरसकृदावेदितत्वाच्च एतेन व्याप्तिज्ञानादिजन्यत्वमनुमितित्वे प्रयोजकमित्यपि परास्तम् । साध्याभावव्यापकाभावप्रतियोगिधर्मत्वेन साध्यव्याप्यत्वानुमानात् प्रसिद्धसाध्यकैवानुमितिरित्यपि केचित् । अथ वह्न्याद्यभाववति धूमादेः समवायेन तन्त्वाद्यभाववति च पटादेः संयोगेन वर्त्तमानत्वात् साध्याभाववति संयोगेन समवायादिना वर्त्तमानत्वस्य विशिष्यैवाभावो वाच्यः तथाच जलं जातिमत् गुणवत्त्वात् गुणवच्च घटादेरित्यादिकं विलीयेत जातिगुणाभाववतोः समवेतत्वसंयोगित्वयोरप्रसिद्धेरिति चेदुपदर्शयैनमपि केवलान्वयिनः सरणिं स्वीकुरु वा स्वाधिकरणावृत्ति साध्याभावादिकत्वमेव व्याप्तिं स्वत्वाननुगमस्य प्रागेव स्वस्तितत्वादिति एतेन नीलेतररूपवान् नीलासमवेतत्वे

सति गोत्वादित्यादिकं विलोयेत विशेष्यस्य व्यभिचारित्वात् विशिष्टस्य चानतिरिक्तत्वादिति परास्तं साध्याभावस्य विशिष्टहेत्वधिकरणावृत्तित्वात् परम्परासम्बन्धेन विशेषणविशेष्यसम्बन्धस्यैव वा तत्र हेतुत्वादिति। व्याप्तिग्रह इति साधारणोक्तिः तत्र केवलान्वयिन्यभावाच्च साध्यव्याप्यत्वं तद्व्द्न्यावृत्तित्वादिरूपमन्ततः साध्यएव प्रसिद्धम्। निरुपाधीति उपाधिज्ञानाहितव्यभिचारनिरासाय पृथिवीत्वमिति पृथिवीत्वमितरभेदसाध्यमित्यत्र हि पृथिवीत्वत्वविशिष्टे पृथिवीत्वे इतरभेदसामानाधिकरण्यं भासते पृथिवीतरभिन्नेत्यत्र शुद्धपृथिवीत्वविशिष्टे तदवच्छेदेनेतरभेद इति न सिद्धसाधनमित्यर्थः सर्वेति च पृथिवीत्वस्यावच्छेदकत्वस्फोरणाय अत्र च पृथिवीत्वत्वं पृथिवीतरासमवेतत्वमात्रं न तु पृथिवीवृत्तित्वघटितमित्यतोऽपि नोपनयवैयर्थ्यम्। अथान्वयव्याप्तिघटकतावत्पदार्थोपस्थित्यादिकं विना न तद्ग्रहसम्भवस्तत्सत्त्वे च तत एव व्याप्तिग्रहसम्भवे व्यतिरेकसहचारज्ञानस्य हेतुत्वे मानाभावः न च व्यभिचारशङ्कानिवर्त्तकत्वेनैवान्वय व्यतिरेकसहचारग्रहयोरुपयोगित्वं तद्ग्रहेऽपि शङ्कातादवस्थ्यात् अधिकरणविशेषे च तन्निवृत्तौ साध्यवत्त्वसाधनाभाववत्त्वयोरन्यतरग्रहस्यैव तन्त्रत्वात् व्यतिरेकव्याप्त्युपन्यासेऽर्थान्तरादितादवस्थ्याच्च। यत्तु सहचारमात्रलाभायैव सर्वत्रोदाहरणोपन्यास इति तन्न अर्थान्तराद्यापत्तेर्दुर्वारत्वात् यच्छब्दादिवैयर्थ्याच्च व्युत्पादयिष्यते च तस्य

व्याप्तिबोधकत्वम । नचान्वयिन इव व्यतिरेकिणोऽप्युदाहरणात् स्वरससिद्धानुयव्याप्तिधीरानुभविकी ये न तदर्थमपि प्रकारान्तरमास्थेयमत आह यद्देति । साध्याभावेति नन्विच्छादौ साध्ये आत्मत्वादेर्व्यतिरेकित्वं न स्यात् स्याच्च संयोगादेरात्मत्वे तथात्वमिति चेन्न। साध्यतावच्छेदकावच्छिन्नसाधनासमानाधिकरणत्वेन साध्याभावस्य साधनतावच्छेदकावच्छिन्न साधनासमानाधिकरणत्वेन च साधनाभावस्य विशेषितत्वात् संयोगाभावे साध्ये विभागाभावः केवलान्वयी प्रतियोगिवैयधिकरण्यावच्छिन्ने च तत्र स तादृशो व्यतिरेक्यपि व्याप्यव्यापकभावस्य साध्याभावत्वसाधनाभावत्वाभ्यां बोध्यस्तेन न व्यभिचारिण्यतिप्रसङ्गः साध्याभावत्वादिकञ्च वैज्ञानिकं न तु वास्तवं तेन मेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिभ्रमादनुमानम् । व्यापकीयत्वेनाभावस्य ज्ञानाद्व्याप्यीयत्वेनाभावस्य सिद्धिं पुनरप्रसिद्धसाध्यकसाधारणीमाह व्यापकाभावेनेत्यादि अभावो अभाववत्त्वनिश्चयो अवश्यम्भावश्चासति प्रतिबन्धके अत्र च यद्रूपावच्छिन्नं प्रति व्यापकता गृह्यते तद्रूपावच्छिन्नीयत्वेनाभावसिद्धिः फलं येन रूपेण व्यापकता गृह्यते तद्रूपावच्छिन्नीयत्वेन व्यापकत्वविशिष्टतत्तद्रूपावच्छिन्नीयत्वेन चाभाववत्ताज्ञानं हेतुरिति मन्तव्यं व्यापकप्रतियोगिकस्याभावस्यातिप्रसक्तत्वात् व्यापकत्वावच्छिन्नप्रतियोगिताकस्य च सम्बन्धविशेषावच्छिन्नस्य सम्भवतोऽप्यसार्वत्रिकत्वात् कारणानुगमः परम्परिचिन्तनीयः एवञ्च वह्नि-

धूमव्यापकीवह्न्यभाववांश्चायमिति ज्ञानाद्धूमव्यापकवह्न्यभाववानयमिति ज्ञानाद्वा निर्धूमोऽयमितिधीरिति धूमव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववानयमिति ज्ञानादित्यपि कश्चित्। व्याप्तिज्ञानस्येति अत्र व्याप्तिपदेनान्वयव्यतिरेकव्यापकताग्रहनियतविषयताकोऽर्थोऽभिमतः पक्षस्य पक्षतावच्छेदकस्य वा ज्ञानमनुमितिमात्रे हेतुरित्यपि वदन्ति। अन्वयीति अन्वयिनि तादृप्येण वह्नित्वादिना व्यतिरेकिणि तु इतरप्रतियोगिकत्वेन वह्न्यभावादिनिषेधतया सिद्धिरित्यनुभवसिद्धः कार्य्यगतो विशेषः कारणविशेषजन्यतावच्छेदकं अतएव तत्र तत्र सर्वत्र व्यतिरेकिणि तस्मान्न तथेत्येव निगमनशरीरम् अन्वयिना वह्न्यभावेन धूमाभावसिद्धौ धूमाभावत्वं प्रकारः व्यतिरेकिणि तु तत्सिद्धौ प्रत्यक्ष इव प्रतियोगितया धूमः प्रकार इति वदन्ति इत्यञ्च ह्रदो धूमाभाववान्न वा पर्वतो वह्निमान् नवेत्यादिजिज्ञासायां विप्रतिपत्तावुद्देश्यायाः साध्यतावच्छेदकरूपेण साध्यवत्त्वप्रतीतेरनुपयोगिनो व्यतिरेक्युदाहरणादेः कथमवतार इति विभावनीयम्। केचित्तु अन्वयव्याप्तिज्ञानानन्तरत्वादिकमेवानन्यगतिकतया जन्यतावच्छेदकमित्याहुः। अन्तरत्वेन तादृशपरामर्शयोः कारणत्वमित्यपि कश्चित्।

उचितानुपूर्वीकं प्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वं प्रतिज्ञात्वादिकं पुनरुदासीनवाक्यवारकन्यायान्तर्गतत्वशून्यमेवोपादेयमिति नान्योऽन्याश्रयः साध्यादिविशेषनिय-

न्वितास्व प्रतिज्ञादयो वाच्या इति न भिन्नसाध्यादिकप्रतिज्ञादिसमुदायेऽतिव्याप्तिः व्याप्त्यादेरिव साध्याद्यननुगमादननुगमो न्यायादेरोऽत एव एतेन प्रतिज्ञानिगमनयोरुदाहरणावयवान्तरयोश्च न सम्भूयैकार्थप्रतिपादकत्वं प्रागेव तु पञ्चानामवयवानां परन्तु प्रतिज्ञाहेत्वोः कथञ्चिदुपनयनिगमनयोरेकवाक्यताव्यवहारस्तु विशिष्टैकार्थप्रतिपत्तिपरतामात्रेण तादृशपरामर्शप्रयोजकत्वञ्च यदि तद्विषयतत्पदार्थसार्थोपस्थापकतया तदोदाहरणोपनययोरेव तत्प्र्यवस्यति अथ तदानुकूल्यमात्रेण तदा को वह्निमान् पर्वतो वह्निमान् कुतो धूमवत्त्वादित्यादेरपि तथात्वमित्यादिकं समाहितम्। अवयवत्वन्तु न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्वं प्रतिज्ञाद्यघटकत्वे सति उभयघटकभागद्वयाघटितत्वं वा वक्तव्यम् उभयञ्च प्रतिज्ञाहेतुर्हेतूदाहरणे उदाहरणोपनयावुपनयनिगमने इति विशिष्य वक्तव्यमिति प्रतिज्ञादिप्रतिपाद्यतत्तद्विशिष्टार्थविषयकज्ञानपञ्चकान्यतमज्ञानजनकवाक्यत्वं तत्त्वमित्यपि केचित्। तस्यैवेति तथाच तादृशजातौ साधकाभाव इति भावः। बाधकमप्याह अन्यथेति न्यायजन्यज्ञाने पञ्चावयवजन्यत्वात् पञ्चद्वित्यादिजन्ये द्वित्र्याद्या एकैकजन्ये चैकैकाजातय इति सङ्कर इत्यर्थः तच्च तत्र भिन्नभिन्नजातिकल्पने सुतरां मानाभावादिति भावः। केचित्तु यदि चानुगतं कारणमन्तरेणापि तादृशजातिमत्त्वसम्भवस्तदा कदाचित् प्रतिज्ञादिजन्येऽपि हेत्वा-

दिजन्यवृत्तिर्हेत्वादिजन्ये च प्रतिज्ञादिजन्यवृत्तिर्जातिः स्यादिति सङ्कर इत्यर्थः एवं सर्वेषां सर्वजातीयत्वमेकजातीयत्वं वा स्यादित्यपि द्रष्टव्यमित्याहुः। साध्यनिर्द्देश: प्रतिज्ञेति सूत्रम् साध्यो विधेयधर्म्मविशिष्टो धर्म्मी तथा च पक्षतावच्छेदकपर्वतत्वादिविशिष्टे साध्यतावच्छेदकवह्नित्वादिविशिष्टवैशिष्ट्यज्ञानजनको न्यायावयव इति पर्य्यवसितोऽर्थः उदाहरणाच्च साध्यतावच्छेदकविशिष्टज्ञानं न पक्षतावच्छेदकविशिष्टे उपनयाच्च पक्षतावच्छेदकविशिष्टे न साध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञानमिति तयोर्व्युदासः। किन्त्वित्यादि प्रकृतन्यायबहिर्भूतवाक्यवारणाय सत्वन्तं प्रकृतन्यायावयवत्वपर्य्यवसितार्थकम्। उद्देश्येति प्रकृतेत्यर्थः वह्निसाध्यकन्यायोपनयस्य वह्निव्याप्यधूमसाध्यकानुमित्यन्यूनानतिरिक्तविषयकज्ञानजनकस्य वारणाय प्रकृतद्वयं तथाच यादृशसाध्यपक्षकन्यायावयवत्वं तादृशसाध्यपक्षकानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकत्वं पर्य्यवसितार्थः। धूमादालोकवान् पर्वतो वह्निमान् धूमादित्यादावनतिरिक्तविषयकज्ञानजनकस्य हेतोर्वारणाय अन्यूनेति निगमनवारणाय अनतिरिक्तेति यद्यपि निगमने साक्षात्पक्षवाचकं पदं न श्रूयते तथापि न्यूनताभङ्गायोपनयस्थायमादिपदस्यानुषङ्गात्तथा बोध्यम् इत्थमेव च प्रसक्तामतिप्रसक्तिं निगमनञ्चेत्यादिना निराकरिष्यति तदर्थश्च निगमनमन्यूनानतिरिक्तविषयकज्ञानजनकं सन्न परा-

मर्शहेतुर्येन निरुक्तन्यायावयवत्वरूपं प्रतिज्ञात्वं तदपि व्याप्नुयात् अबाधितत्वादेस्तद्बोधौपयिकविशिष्टहेतुसम्बन्धस्य वा बोधकतया तस्यातिरिक्तविषयकज्ञानजनकत्वादिति । यत्तु पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादित्यातो यन्न पृथिवीतरेभ्यो भिद्यते न तत् पृथिवीत्युदाहरणवारणाय तदिति तत्तुच्छम् तेन पृथिव्यामितरभेदस्याविषयीकरणात् तात्पर्य्यभ्रमेण तादृशबोधजनकत्वस्यातिप्रसक्तत्वात् न च तावताप्युदाहरणस्य तथात्वमशब्दो यन्नेत्यादेरनन्वयात् यदि च निगमनेनायमादिपदं निविशते वाक्यैकवाक्यतयैव विशिष्टलाभादिति विभाव्यते तदा हेतौ साध्यसामानाधिकरण्यभाने सामान्यतः पक्षेऽपि साध्यवत्त्वभानात् पक्षे हेतुव्यापकसाध्यसामानाधिकरण्यविशिष्टहेतुमत्ताबोधकस्योपनयस्य यत्र च पक्षसाध्ययोस्तादृप्येण दृष्टान्तत्वहेतुत्वाभ्यामुपन्यासस्तादृशसिषाधयिषया च न्यायप्रयोगस्तत्रोदाहरणोपनययोर्यत्र वा पर्वतत्वाद्यवच्छेदेन साध्यसिद्धेरुद्देश्यतायामितत्पर्वतत्वादिना दृष्टान्तस्योपन्याससत्रोदाहरणस्य मत्यन्तस्य चावयवाघटकन्यायान्तर्गतत्वपरतया हेत्वन्तस्यायमादिनिगमनान्तभागस्य वारणाय तत् यद्यपि सर्वमभिधेयं प्रमेयमित्यादावतिरिक्ताप्रसिद्धिर्न च कोऽप्रसिद्धा प्रमेयं न वेति विप्रतिपत्तेः संशयस्य चायोगान्न तादृशी प्रतिज्ञा प्रकृतानुमितिविषयतासमव्याप्तविषयताकत्वं प्रकृतानुमितिप्रकारतासमव्याप्तप्रकारताकत्वं वा वक्तव्यमिति वाच्यम् सकला-

भिधेयवृत्तिधर्म्मवत्त्वकत्वाभिधेयनिष्ठात्यन्ताभावाप्रतियोग्या-
काशाभाववद्वा इदं द्रव्यमित्यादौ विशिष्टपक्षबोधके उपनयेऽ-
तिव्याप्तेः तथापि प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यविषयत्वं
तदन्यूनविषयत्वं प्रकृतपक्षम्यर्थपक्षकप्रतिज्ञादिस्थले तु पक्षे
प्रकृत्यर्थस्य वैशिष्ट्यबोधको हेतुर्न तु प्रकृतसाध्यस्य तादृश-
विषयताविलक्षणविषयताशून्यत्वं प्रकृतहेतुकप्रकृतसाध्यसि-
द्ध्यौपयिकव्याप्त्यविषयकत्वं वा तदनतिरिक्तविषयत्वं वह्नि-
व्याप्यलोकवत्त्वधर्म्मा पर्वतो वह्निमान् धूमादित्यनव्याप्य-
धूमवान् पर्वतो वह्निमान् धूमादित्यादौ तस्याः संग्रहाय
प्रकृतहेतुसाध्ययोरुपादानं वह्निव्याप्यधूमवान् पर्वतो वह्नि-
मान् धूमात् सत्तादिव्याप्यद्रव्यत्ववदिदं सत्तादिमद्द्रव्यत्वा-
दित्यादिषु न प्रयोगः विशिष्टपक्षोपस्थापकादेव तादृश-
व्याप्तिप्रतीतावाकाङ्क्षाविरहेणोदाहरणानुत्थानात् अन्यथा-
तिप्रसङ्गात् अतएव नैकदोभयव्याप्त्युपन्यासोऽपि यदि च मैत्रः
पचति अयं गौरित्यादेरेव प्रतिज्ञाया यथोपवर्णितविशिष्ट-
ज्ञानजनकत्वं तादात्म्येन गोःसाध्यत्वात् गोत्वत्वाद्यनुपस्थित्या
गोत्वादेः साध्यत्वानुपपत्तेः पदार्थतावच्छेदकजातौ हेत्वर्था-
न्वयायोगाच्च वह्निमानित्यादौ पुनरनुमितौ पक्षे साध्यस्य
वह्नेः संयोगात्मकः सम्बन्धो भासते यथैव वह्निव्याप्यधूमवा-
नित्याद्युपनयप्रसङ्गमात् शाब्दभाने तु वह्निमतोऽभेद एवं
भेदे साध्ये भिद्यते भिन्नमित्यादावपि वैलक्षण्यमिति सूक्ष्म-
मीक्षते तदा यादृशपक्षसाध्यिकाः पक्षे यादृशयादृशविशिष्टार्थ-

बोधिकाः प्रतिज्ञाः सम्प्रदायप्रसिद्धाः तादृशानां बोधाना-मन्यतमेनाप्यनिवर्त्त्यस्य संशयस्यानिवर्त्तको यस्तावद्बोधाना-मन्यतमो बोधस्तज्जनकत्वं वक्तव्यम् एवञ्च तादात्म्येन गवि साध्ये पक्षे गवाभेदस्य संयोगेन समवायेन वा वह्नौ वह्निमदभेदस्य समवायेन पाकस्य कृतौ पाककृतिमत्त्वस्य पाककर्त्रभेदस्य विशेषणतयेतरेभ्यो भेदे इतरभेदवत्त्ववत्त्व-स्येतरान्याभेदस्येतरभेदवत्त्वस्येतरभिन्नाभेदस्य च बोधा विशिष्य वक्तव्या इति दिक् तावद्बोधानिवर्त्त्य संशयानिवर्त्तक तावद्बोधनिवर्त्त्य यावत्संशयनिवर्त्तकबोधजनकत्वं वाच्यमि-त्यपि कश्चित् । चैत्रः पचति घटो नेतराणीति प्रतिज्ञायां साध्ये विषयित्वानुयोगित्वयोः सम्बन्धविधयैवानुप्रवेशाद्यथो-पदर्शितसाध्यगमकतौपयिकव्याप्तिविशिष्टहेतुमत्त्वस्य च पक्षे उपनेयत्वात् तथाचायमित्याकारः सूचक एव प्राचामुपनयः नव्यानां पुनरनन्यगतिकतया तद्व्याप्यहेतुमांश्चायम् वेत्या-कारः योग्यतावशाच्च तदा साध्यस्य तद्व्याप्यस्य वा परामर्शः । केचित्तु वह्निमान्नवेति विप्रतिपत्तौ तदधीनसंशये च वह्नि-मत्तदन्योऽन्याभावयोस्तादात्म्यविशेषणताभ्यां कोटित्वेन जिज्ञासितत्वात्तादात्म्येन वह्निमानेव साधयितुमुचितो नतु वह्निः अजिज्ञासितत्वात् तथा च तथा चायमित्याकारो वह्निमद्व्याप्यो धूमवांश्चायमित्याकारो वा उपनयो न तु वह्निव्याप्यधूमवांश्चायमित्याकारोऽर्थान्तरत्वादिति प्राहुः । यत्र चान्तरा तादृशबोधो न जातस्तत्रापि तादृशाकाङ्क्षा-

योग्यतादिशालित्वरूपं तज्जननयोग्यत्वमप्यतं तल्लाभश्च जाति विशेषोपस्थापकशाब्दवाक्यशब्दयोरुपसन्दानादेवेति। अन्यूने-त्यादि तथा चोद्देश्यानुमितिसमानविषयकलिङ्गाविषयकशा-ब्दज्ञानजनकन्यायावयवत्वमर्थः व्यतिरेकिणि ह्रदो निर्धूम इ-त्यादौ निर्वह्निलहेतुके यथा ह्रदभिन्नमित्यादि दृष्टान्तवतो ह्रदावृत्तिधर्म्मशून्यत्वादिहेतुके वोदाहरणस्य वारणाय समा-नविषयकान्तं पक्षविशेष्यकार्थकम् उपनयवारणाय लिङ्गावि-षयकेति। यद्यपि प्रकृतलिङ्गाविषयत्वं पृथिवीतरेभ्यो भिद्यते पृथिवीत्वात् गन्धवती तथा गन्धादित्यादावव्यापकं न चात्रोपनयासम्भवः इदमागन्धवत्त्वेन परामृष्टे हेतुभूतगन्धव-त्त्वान्वयायोगादिति वाच्यम् साध्याभावव्यापकगन्धाभावाभा-वत्वे नान्वयात् अतएव व्यतिरेकिणि न च नेयं पृथिवीत्या-दिकः प्राचां प्रयोगः यदि च दण्डवान् रक्तदण्डवानित्यस्या-न्वयोनानुपपन्नस्तद्विशिष्टे शुद्धतद्विशिष्टान्वयस्यैवाव्युत्पन्न-त्वादित्युपेयते तदा नानुपपत्तिगन्धोऽपि पक्षाविशेषणत्वेन तदविषयत्वञ्चायं वह्निसामग्रीमान् वह्नेरित्यादौ पक्षाविशे-षणत्वेन साध्याविशेषणत्वेन च तदविषयत्वं दधि द्रव्यं दध्नः प्रमेयत्वमभिधेयं प्रमेयत्वात् गोत्वाभावो न सास्नादिमान् गोत्वाभावादित्यादावव्यापकमतिव्यापकञ्चोपनयस्य तथापि पक्षतावच्छेदकविशिष्टपक्षे यत्साध्यतावच्छेदकविशिष्टसाध्य-वैशिष्ट्यावगाहित्वं तद्वद्भिन्नभावेन लिङ्गविषयत्वस्याभावो वाच्यः वस्तुतो लिङ्गं लिङ्गत्वं तथाच प्रकृतहेतुतावच्छेदकावच्छि-

न्नस्य प्रकृतसाध्यतावच्छेदकावच्छिन्नगमकतौपयिकं यद्-व्याप्तिविषयत्वं तच्छून्यत्वमर्थः तच्च हेतौ साध्यव्याप्यताव-गाहित्वम् हेतुभूताभावप्रतियोगितावच्छेदकावच्छिन्ने साध्या-भावव्यापकतावगाहित्वञ्च द्रव्यत्वव्याप्यसंयोगवद्वृत्तिधर्मवानयं द्रव्यत्ववान् गुणात् गुणव्याप्यरूपवानयं स्पर्शवान् रूपादि-त्यादौ प्रतिज्ञासंग्रहायावच्छेदकद्वयोपादानम् अन्यूना-नतिरिक्तपदमिति च मूलमुद्देश्यानुमित्यन्यूनानतिरिक्तवि-षयभागपरं हेतुत्वमभिधेयं मेयत्वादित्यादौ पञ्चम्यर्थपञ्चक-हेतुवारणाय पञ्चम्यन्तान्यत्वस्य हेत्वन्यत्वस्य वावश्यं वाच्य-त्वात् संख्यातिरिक्तसुबर्थस्य प्रातिपदिकार्थे विशेष्यत्वेनैवा-न्वयात् प्रातिपदिकार्थयोः क्रियाप्रातिपदिकार्थयोश्च भेदेन साक्षादन्वयस्याव्युत्पत्तेर्वक्ष्यमाणत्वात् चैत्रस्येदं न मैत्रस्य मैत्रस्येदं न चैत्रस्य द्वयोरिदं नेदमेकस्यापीत्यादौ चैत्रादि-सम्बन्धाभावबोधस्य विना विभक्त्यर्थविशेष्यतामनुपपत्तेः चैत्रो न पचतीत्यादौ तिङर्थस्येव विनाप्यनुयोगिनि सप्तमीं सुबर्थस्याप्यभावान्वयात् हेतुविषयकज्ञानजनकत्वव्याप्याव-यवतावच्छेदकरूपशून्यत्वे सत्युदाहरणान्यन्यायावयवत्वं त-त्त्वम् तादृशञ्चावच्छेदकं हेतुत्वादिकमिति केचित्। हेत्व-भिधानेति जिज्ञासाजनकत्वं तद्योग्यतावाक्यत्वं न्यायावय-वत्वम्। लिङ्गेत्यादि लिङ्गाविषयेति पूर्वोपदर्शितार्थकम् अभावहेतुकव्यतिरेक्युदाहरणवारणाय लिङ्गीति लिङ्गिसाध्यं तद्विषयकं तद्वद्विशेष्यकं तेनेदं जलं निःस्नेहत्वप्रकारकप्रमा-

विषयत्वशून्यत्वात् इदं द्रव्यं जलान्यत्वप्रकारकप्रमाविषयत्व- शून्यत्वादित्यादौ यत्र जलं तन्निःस्नेहत्वप्रकारकप्रमाविषय इत्याद्युदाहरणे नातिप्रसङ्गः। लिङ्गाविषयेत्यस्य पूर्वोक्त- व्याप्यत्वाविषयार्थकत्वे हेतुवारणाय लिङ्गीति लिङ्गिवि- षयत्वञ्च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्व- विषयतावहिर्भावेन वाच्यं तेन वह्निमान् वह्निसामग्रीमत्त्वात् अयं हेतुरिदं वा हेतुत्वं तत्त्वेन प्रतीयमानत्वादित्यादौ हेतौ नातिप्रसङ्गः लिङ्गविषयकज्ञानजनकत्वानियतलिङ्गि- विषयकज्ञानजनकत्वनियतावयव..ावच्छेदकरूपवत्त्वं तत्त्व- मित्यादिकं तादृशावच्छेदकरूपान्तरापरिचये दुर्ग्रहत्वा- दनुपादेयम्। अनुमितीत्यादि जनकान्तं न्यायावयवार्थकं निगमनवारणाय साध्याविषयेत्यादि साध्याविषयत्वञ्च प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुविशिष्टहेतुत्वविषयतावहि- र्भावेन पूर्वोपदर्शितसाक्षात्परम्परासाधारणप्रकृतपक्षविशेषण त्वेन वा तेन पूर्वोपदर्शितहेतौ नाव्याप्तिः इदं न दण्डाज्जात दण्डसंयोगाजन्यद्रव्यत्वात् अयं न धूमादालोकवान् आर्द्रे- न्धनशून्यत्वादित्यादौ व्यतिरेकिण्युदाहरणस्य हेतुत्वपक्ष- साध्यान्वितसार्थबोधकेदम्पदशालिन उपनयस्य च वारणाय हेतुविभक्तिमदिति तदर्थश्च प्रकृतसाध्यान्वयबोधनक्षमार्थोप- स्थितिजनकहेतुविभक्तिमत्त्वं हेत्विति सम्पातायातम्। यदि च पर्वते पर्वतभिन्नत्वप्रकारकज्ञानस्य विशेष्यतया अभावस्य साध्यत्वं हेतुत्वञ्च सिषाधयिषया च न्यायप्रयोगस्तत्र यथा

तादृशज्ञानाभावादुत्पन्नं ज्ञानमिति दृष्टान्तशालिनि व्यतिरेक्युदाहरणेऽतिव्याप्तिरित्युच्यते तदावयवान्तरोपस्थितार्थान्वितस्वार्थबोधकविभक्तिमत्त्वं वक्तव्यम् उदाहरणान्यत्वेन वा विशेषणीयम्। केचित्तु साध्यविषयकधीजनकत्वानियतहेतुविभक्तिमत्त्वनियतावयवतावच्छेदकरूपवत्त्वं समुदितलक्षणार्थं इत्याहुस्तच्चिन्त्यम्। हेतुत्वप्रतिपादकेति विभक्त्यर्थः हेतुत्वविशेष्यकान्वयबोधजनकन्यायावयवत्वमित्यर्थः हेतुत्वं प्रमेयमित्यादिप्रतिज्ञावारणाय विभक्त्यर्थेति तस्मादितरेभ्यो भिद्यते इत्यादि निगमनवारणाय हेतुत्वेति विशेष्येति च। घटो दण्डाद्वह्निधूमादित्यादिका तु न प्रतिज्ञा तद्वृत्तेरतदात्मनश्च तद्धर्मव्यापकत्वायोगात् सम्प्रदायविरोधाच्च तेन तत्रत्यनिगमने नातिव्याप्तिरिति भावः। उदाहरणेति क्वचिज्जिज्ञासानुत्पादेऽपि तद्योग्यतासत्त्वान्नाव्याप्तिः अनुक्तोदाहरणस्थलेऽपि तादृशयोग्यतासत्त्वान्न्यायावयवेति उदाहरणत्वञ्चेह न न्यायगर्भं वैयर्थ्यात्। साध्याविषयेत्यादि अयं न दण्डाद्दण्डसंयोगाजन्यद्रव्यत्वादित्यादौ प्रतिज्ञानिगमनयोर्वारणाय साध्याविषयेत्यादि व्याख्यातान्तमुपनयविशेषवारणाय हेतुपञ्चम्यन्तेति। हेत्विति हेतुत्वबोधकार्थकं हेतुपञ्चम्योर्वैकल्पिकमुपादेयम् उपनयस्य चान्तेऽनुसन्धीयमाना प्रथमैवान्तः एवं दण्डादित्यादेः स्वपरत्वापि दृष्टान्तस्य पञ्चम्यन्तत्वेऽन्वयायोगात् कस्यचिद्व्यतिरेकिण उदाहरणस्य पञ्चम्यन्तत्वसम्भवे तु तद्वारणं

पूर्ववदत्र चार्थवद्भागस्य हेतुपञ्चम्यन्तत्वं बोध्यम् तेन निरर्थकतसिलन्तवह्निप्रमात इत्यादौ नाव्याप्तिः पञ्चम्यादेस्तसिलाद्यादेशवादिनां नये तु नानुपपत्तिगन्धोऽपि। केचित्तु हेतुपञ्चम्यन्तत्वं हेतुत्वप्रतिपादकपदशालित्वं पूर्ववत्साध्याविषयकज्ञानजनकत्वञ्च इतरनैरपेक्ष्येण प्रकृतहेतुत्वविशिष्टसाध्यविषयकज्ञानाजनकत्वं साध्यञ्चेह न विवक्षितं वैयर्थ्यादित्याहुः। पञ्चम्यन्तेति अनुमितिपरवाक्यत्वम् अवयवत्वं हेतुत्वादौ पञ्चमी लाक्षणिकी वृक्षाद्विभजत इत्यादौ लाघवेनाबाधितत्वे अवधिमत्त्वे वा शक्तत्वात् द्रव्यनिष्ठमवधित्वमिव विभागनिष्ठमवधिमत्त्वमपि सम्बन्धविशेषः स चातिरिक्तोऽनतिरिक्तोवेत्यन्यदेतत् तत्सम्बन्धाग्रहे च व्यवहारः शक्तिभ्रमात् वृक्षादपैति पतति इत्यादौ लाघवाद्विभागशक्तिस्तज्जनकत्वञ्च क्रियायाः सम्बन्धमर्य्यादया भासत इत्यपि वदन्ति। अतो निगमेऽतिव्याप्तिरतः पञ्चम्यन्तेति तस्मादित्यत्र च तत्पदे न लक्षणा शक्त्यैव तादृशज्ञानोपस्थितिसम्भवात् पर्वतो वह्निमान् वह्निसामग्रीमान् वा तस्मादित्यादिकन्तु न न्यायप्रयोगः सम्प्रदायविरोधात् इति वदन्ति। यत्तु हेत्वन्वयानुरोधात् वह्निमानित्यादावपि ज्ञानलक्षणेतितन्नपञ्चम्याज्ञापकत्वे ज्ञाप्यत्वे वा लक्षणयैवोपपत्तौ तत्र च लक्षणायां मानाभावादतएवोक्तम् आवृत्तौ सेव प्रतिज्ञेति अतएव व्याचक्षते यतो द्रव्यं गुणाः कर्मेत्यत्र हेतुत्वं यथासम्भवमुत्पादकत्वं ज्ञापकत्वञ्चेति अतएव लोके

किं वह्निमदिति प्रश्ने तद्गृहं वह्निमदितित्युत्तरिते कुत इति जिज्ञासा धूमवत्त्वादित्युत्तरञ्च नहि तत्र ज्ञाने प्रश्नः येन लक्षणया ज्ञानेनोत्तरयेत् न वा परकीयभाविप्रश्नानुरोधात् अजिज्ञासिताभिधानं न वा कुत इति प्रश्ने ज्ञातमेतदित्यध्याहार्य्यं मानाभावात् दाहो दहनात् न जलात् जलं स्पर्शवत् रूपात् न गन्धान्नापि शब्दादित्यादौ नञ्‌ अन्वयानुरोधात् जन्यत्वरूपं हेतुमत्वं जन्यज्ञानविषयत्वरूपञ्च ज्ञाप्यत्वमर्थः एवञ्च हेतुमत्वे शक्तावपि ज्ञाप्यत्वे लक्षणैव न च धूमादालोकवान् पर्वतो वह्निमान् धूमाद्वह्निमतः सधर्म्मा पर्वतो वह्निमानित्यादौ प्रतिज्ञायां पर्वतो धूमाद्वह्निमानित्यादौ च तत्रत्यनिगमने चातिव्याप्तिः प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितप्रकृतसाध्यान्वितस्वार्थबोधकपञ्चम्यन्तलाक्षणिकपदवदवयवत्वस्य विवक्षितत्वात् । यत्तु अयमात्मा ज्ञानादित्यादावव्याप्तिः शक्त्यैव ज्ञानोपस्थितिसम्भवेन लक्षणाविरहादिति तन्न यद्विषयकज्ञानस्य हेतुत्वादिकमवगतं तस्य व्याप्त्यादिजिज्ञासायामुदाहरणादिप्रयोगः नवेह ज्ञानविषयत्वेनोपस्थितिर्विना लक्षणाम् अन्यथा सुखादेरपि व्याप्त्याद्युपदर्शनप्रसङ्गात् । केचित्तु पञ्चम्यन्तलाक्षणिकपदवत्त्वनियतावच्छेदकरूपवत्वं तादृशपदवत्त्वव्यभिचार्य्यवयवतावच्छेदकशून्यावयवत्वं वा विवक्षितमित्याहुः । नव्यास्तु पञ्चम्याज्ञानज्ञाप्यत्वलक्षणयैवोपपत्तौ न प्रातिपदिकेऽपि लक्षणा आकाङ्क्षावैचित्र्याच्च पदार्थैकदेशेऽपि ज्ञाने

प्रातिपदिकार्थो विषयत्वेनान्वेति कर्त्तृकृतीव कृतौ धात्वर्थः यद्धर्म्मविशिष्टश्च हेतुः प्रयुज्यते आकाङ्क्षाबलात् तद्धर्म्मविशिष्टस्यैव व्याप्यत्वमुपदर्श्यते अन्यथा यथार्थधूमज्ञानादित्यादिप्रयोगेऽपि धूमादेर्व्याप्यत्वोपदर्शनप्रसङ्ग इति प्राहुः ।

इतरान्वितस्वार्थबोधकत्वे सति स्वीयं यदन्यभिन्नं पदं तदर्थविशेष्यकान्वयबोधजनकत्वे सति अन्यपदवत्त्वे सति स्वीयानन्यपदार्थविशेष्यकान्वयबोधाजनकान्यत्वे च सति वा न्यायावयवत्वं प्रतिज्ञात्वं प्रतिज्ञाहेत्वोरुपनयननिगमनयोश्चार्थौ परस्परमन्वितौ न तदाहरणस्य केनापि विभक्त्यन्तं पदं तेन निगमने नातिव्याप्तिः प्रकृतपक्षान्वितस्वार्थबोधकपदोपस्थापितार्थान्वितस्वार्थबोधकन्यायावयवत्वं हेतुत्वं निगमनवारणाय उपस्थापितान्तम् । प्रमेयत्वमभिधेयं प्रमेयत्वात् इत्यादौ प्रकृत्यर्थपक्षान्वितस्वार्थबोधकपञ्चम्यर्थान्वितो न प्रतिज्ञार्थः अपि तु तदेकदेशार्थः इति स्वार्थविशिष्टवैशिष्ट्यबोधजनकन्यायावयवत्वं विशिष्टवैशिष्ट्यबोधजनकस्वार्थोपस्थितिजनकन्यायावयवत्वं विशिष्टबोधजनकस्वार्थविशिष्टबोधजनकन्यायावयवत्वं वा तत्त्वं एकवाक्यतया हेत्वर्थविशिष्टसाध्यस्य वैशिष्ट्यं भासते न पुनरवयवान्तरार्थविशिष्टस्य कस्यचिदिति इतरान्वितस्वार्थबोधकन्यायावयवत्वम् उदाहरणत्वम् अन्वयव्याप्तिबोधकतत्वं व्यतिरेकव्याप्तिबोधकतत्वञ्च विशेषलक्षणद्वयं इतरोपस्थापितार्थविशेषणकस्वार्थबोधकन्यायावयवत्वं स्वार्थविशेष्यकेतरार्थान्वयबोधजनकन्यायावयवत्वं

वोपनयत्वम् अवयवार्थविशेष्यकस्वार्थबोधजनकन्यायावयवत्वं निगमनत्वं हेत्वर्थस्य प्रतिज्ञार्थे न विशेषणत्वेनान्वेति किन्तु तदेकदेशार्थ इत्युक्तप्रायम्।

एतावता प्रबन्धेन सपरिकरं हेतुं निरूप्य तत्प्रसङ्गात् तत्त्वनिर्णयादिरूपतत्कार्य्यकारित्वाच्च तदाभासनिरूपणं प्रतिजानीते अथेति अनुमितीति यथाश्रुतमिदं हेतुदोषाणां लक्षणं तद्दलक्ष्य दुष्टहेतूनां तदभिप्रायेणैव उपधेयसङ्करेऽपी-त्यादि वक्ष्यति तत्रानुमितिपदम् अनुमितिनिष्ठकार्य्यतानि-रूपकसम्बन्धित्वेनानुमिति तत्कारणज्ञानपरं साध्यव्याप्यहे-तुमान् पक्षः साध्यवानित्याकारानुमितिपरं वा तेनैकत्र हेतौ व्यभिचारादिग्रहेऽप्यन्यस्य परामर्शादनुमित्युत्पादेन व्यभि-चाराद्याख्यादिज्ञानेनान्यथासिद्धत्वाच्च व्यभिचारादिग्रहा-भावस्यानुमित्यजनकत्वेऽपि न क्षतिरिति वदन्ति। पर्वतो निर्वह्निर्धूमो वह्नेरभिधेयत्वं वा मेयत्वस्य व्यभिचारीत्यादि-भ्रमादनुमितिप्रतिबन्धादाह यथार्थेति ननु प्रतिबन्धक-ज्ञानविषयव्यभिचारादिघटकसाध्यादेरपि प्रत्येकं हेत्वा-भासतापत्तिः। अथ विशिष्टविषयज्ञानं प्रतिबन्धकं तद्घट-कञ्च न विशिष्टमिति चेत्तर्हि यथार्थेति व्यर्थं भ्रमविषय-विशिष्टस्याप्रसिद्धत्वादित्यनुशयेनाह यदिति। केचित्तु दुष्टा-नामेव हेतूनामेतानि लक्षणानि तत्र तृतीयमिव प्रथममपि ज्ञायमानव्यभिचारादेः प्रतिबन्धकत्वमभ्युपेत्य तदर्थश्च ताद्द-शाभावप्रतियोगिनो ये व्यभिचारादयस्तत्प्रकारकयथार्थ-

ज्ञानविषयत्वमग्रे च तत्वमित्यस्य तद्वत्वमित्यर्थः आद्यस्यैव वा दुष्टहेतुलक्षणत्वमिति प्राहुः। लिङ्गमविवक्षितं यद्विषयत्वेन यादृशविशिष्टविषयत्वेन तेनानुमितिप्रतिबन्धकपक्षविशेष्यकभ्रमविषये साध्याभावादौ सद्धेत्वादिनिष्ठे नातिप्रसङ्गः अवच्छेदकस्य ज्ञानतिरिक्तावृत्तित्वं तेन विशिष्टस्यासत्वेऽपि भ्रमात् प्रतिबन्धेऽपि न क्षतिः विशेषणीयश्च तादृशविशिष्टान्तराघटितत्वेन तेन प्रमेयत्वादिविशिष्टे सव्यभिचारादौ नातिप्रसङ्गः एवञ्च पक्षतावच्छेदकादिविरहविशिष्टः पक्षः पक्षनिष्ठस्तद्विरहो वा साध्याभाववद्वृत्ति साधनं साधनवद्वृत्तिसाध्याभावो वा हेतुदोषः येन केनापि सम्बन्धेन तद्वांश्च प्रकृतो हेतुर्दुष्टः यादृशधर्म्मिणि यादृशधर्मवत्ताज्ञानं अनुमितिं प्रतिबन्धकं तस्य धर्म्मिणस्तादृशधर्मवत्वं हेतुदोष इत्यपि कश्चित्। अथ पर्वतत्वेन पक्षत्वे वह्नित्वेन साध्यत्वे विशिष्टधूमत्वेन च हेतुत्वे पर्वतादेः काञ्चनमयत्वविरहो ह्रदस्य वह्निधूमशून्यत्वं पर्वतस्य महानसीयवह्निधूमविरहित्वं मेयत्वस्य केवलधूमस्य वा वह्निव्यभिचारो विशिष्टस्य धूमस्य वा पर्वतीयवह्निव्यभिचारो न दोषः न वा तत्सम्बन्धेन तत्र तस्य हेतोर्दुष्टत्वम् अतस्तद्धर्मावच्छिन्न तत्पक्षकतद्धर्म्मावच्छिन्न तत्साध्यकतद्धर्म्मावच्छिन्नतद्धेतुकानुमितिप्रतिबन्धकत्वं वाच्यं तथाच निर्वह्निः पर्वतो वह्निमान् पर्वतावृत्तिवह्निमान् वा तद्व्यभिचारिणः पर्वतावृत्तेर्वा धर्म्मादित्यादौ न कोऽपि हेत्वाभासः स्यात् तादृशा-

नुमितेरप्रसिद्धत्वादिति। अत्र वदन्ति यद्विषयनिश्चयस्य विरोधिविषयताप्रयुक्तस्तदुत्तरम् अनुमितौ अनाहार्य्यमानसज्ञाने वा पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहित्वस्य साध्यतावच्छेदकविशिष्टसाध्यनिरूपितव्याप्तिविशिष्टहेतुतावच्छेदकविशिष्ट-हेतुमत्वावगाहित्वस्य च द्वयोर्व्यतिरेकस्तत्त्वं हेतुदोषत्वं पक्षतावच्छेदकवैशिष्ट्यादिकञ्च वैज्ञानिकं न तु वास्तवं ग्राह्यं व्याप्तिश्चान्वयतो व्यतिरेकतश्च वाच्या तादृशावगाहित्वप्रसिद्धिराहार्य्यज्ञान एवाभ्युपेतव्यानन्यगतिकत्वात् एवञ्च वस्तुमात्रनिश्चयादनन्तरं निर्वह्नित्वाविशिष्टे वह्नेरग्रहेऽपि न क्षतिस्तस्य विरोध्यविषयकत्वात् एवं साध्यनिश्चयोत्तरं तस्यानुमितावपि मानसज्ञानाविरोधित्वाच्च तादृशि पक्षे तादृशसाध्यवैशिष्ट्यस्य तादृशसाध्यनिरूपितव्याप्तिविशिष्टतादृशहेतुवैशिष्ट्यस्य चावगाहिनो ज्ञानस्य यद्विषयं ज्ञानं विरोधिविषयकं तत्त्वं तादृशज्ञानविरोधित्वं वा हेतुदोषत्वं ज्ञानविरोधित्वञ्च तद्विषयविषयकग्रहविरोधिग्रहविषयत्वम् एवंविधैव रीतिरुत्तरत्र सर्वत्र सव्यभिचारलक्षणादावनुसर्त्तव्या इत्यपि केचित्। केचित्तु यादृशपक्षकयादृशसाध्यकयादृशहेतौ यावन्तो दोषाः सम्भवन्ति तावदन्यान्यत्वमेकमात्रदोषस्थले च तत्त्वमेव हेत्वाभासत्वं स चातिरिक्त एवान्योऽन्याभाव इति न वैयर्थ्यं पञ्चविधभेदोक्तिस्तु तत्सम्भवस्थलाभिप्रायेण व्यभिचारादेः साध्यादिभेदनियन्त्रितत्वात्

शब्दाभेदमात्रस्य चाकिञ्चित्करत्वादिति प्राहुः। स्यादेतत्-शब्दोऽनित्यः शब्दत्वात् इत्यत्रासाधारणेऽव्याप्तिः सर्वसाध्यव्द्यावृत्ते स्तत्रासत्त्वात् एवं शब्दोऽनित्यः कृतकत्वात् इत्यस्य सत्प्रतिपक्षे नित्यत्वव्याप्याद्रव्यद्रव्यत्वादावपि पक्षस्य तद्वत्ता-विरहादित्याशङ्कां तयोरलक्ष्यत्वेन निराकुरुते दशाविशेष इति। हेत्वोः सद्धेत्वोः असाधारणः पक्षमात्रवृत्तिः सन् प्रतिपक्षो विरोधिपरामर्शो यस्य स तथा तयोर्दशाविशेषे हेतौ सर्वसाध्यव्द्यावृत्तत्वस्य पक्षे साध्याभावव्याप्यवत्त्वस्य च भ्रमदशायामाभासत्वात् अनुमित्यजनकत्वात्तद्धेत्वादौ साध्यव्द्यावृत्तत्वादिबुद्धेः प्रतिबन्धकत्वं परमायाति न तु तद्विषयस्य दोषत्वम् असत्त्वात् अन्यथा बाधभ्रमेणानुमि-त्यनुदयात् तस्यापि दोषत्वं स्यात् कोहि साध्याभावतद्-व्याप्यवत्ता भ्रमयोरनुमितिविरोधित्वे विशेषः निर्युक्तिकस्तु प्रवादो न श्रद्धेयः यत्तु ज्ञानस्य यदनुमितिप्रतिबन्धकताव-च्छेदकं तद्वत्त्वं तत्प्रकारकप्रमाविषयत्वञ्च लक्षणार्थः तच्च द्विविधं विषयरूपं साधारण्यादिबाधे च प्रमितसाध्याभाव-वान् पक्षः तद्विषयत्वेन ज्ञानस्यानुमितिप्रतिबन्धकत्वात् अविषयरूपञ्च विरोधिसामग्रीकालीनत्वादिकं तद्वत्त्वञ्च ज्ञानस्यैव तद्विषयस्य हेतोरपीति तन्न तद्वत्त्वं हि हेतोर्ना-भेदेन बाधे तदभावात् अतएव नाश्रयतया वह्निर्व्यभिचारि-द्रव्यत्वादिमतिधूमेऽतिप्रसङ्गाच्च साध्याभाववत्पक्षस्यैव साध्याभाववद्वृत्तिहेतोर्ज्ञानस्य प्रतिबन्धकत्वात् साधारण्यादि-

विषयकत्वस्य ज्ञाननिष्ठस्यैव प्रतिबन्धकतावच्छेदकत्वात् सत्तादिसाध्यके ज्ञानेऽतिप्रसङ्गाच्च यथाकथञ्चित्तद्वत्त्वस्य चातिप्रसञ्जकत्वात् विरोधिसामग्रीसमवहितोऽपि च लिङ्गपरामर्शो न स्वसाध्यकानुमितेः प्रतिबन्धको मणिसमवहितो वह्निरिव दाहस्य अथ यद्धर्मविशिष्टज्ञाने सत्यवश्यमनुमितिप्रतिबन्धः तदेवात्र प्रतिबन्धकतावच्छेदकमुक्तं भवति च प्रतिबन्धकीभूतविरोधिसामग्रीकालीनत्वादिविशिष्टे परामर्शे तथा इति चेत् न वैकाल्यादिसाधारणकारणघटिता सामग्री क्वापि प्रतिबन्धिका विशेषतस्त्वत्र तत्सत्त्वे कार्योत्पादस्य दुर्वारत्वात् किन्तु विरोधिपरामर्शस्तथा यदि च तत्सत्त्वेऽपि तत्साध्ये बाधावतारात्रानुमितिप्रतिबन्धः प्रामाणिकस्तदा अप्रामाण्यग्रहाभावस्येव तदभावस्यापि वैशिष्ट्यन्तत्र निवेश्यतां यथा च भ्रमप्रमासाधारणविरोधिपरामर्शसत्त्वे नानुमितिस्तथा तथाविधबाधादिग्रहेऽपीत्यतिप्रसङ्गः । नचातीतादौ लिङ्गे विरोधिपरामर्शकालीनत्वमपि यदपि तद्विषयत्वेन ज्ञानस्य अनुमितिप्रतिबन्धकत्वं तद्वत्त्वमेव वाच्यं सत्प्रतिपक्षे च विरोधिव्याप्यादिकमेव तथा तद्वत्त्वमपि हेतौ स्वज्ञानरूपसम्बन्धेन तस्य समूहालम्बनरूपतया हेतुद्वयविषयत्वादिति तदपि तुच्छं साध्याभाववत्पक्षविषयत्वेन तादृशपक्षज्ञानप्रमात्वविषयत्वेन वा ज्ञानस्य प्रतिबन्धकत्वं तस्य च साध्यवत्यपि पक्षे सम्भवादतिव्याप्तेः विशिष्टविषयत्वेन प्रतिबन्धकत्वं विशिष्टञ्च तत्राप्रसिद्धमिति चेतर्हि किं

सर्वत्र सत्प्रतिपक्षे साध्याभावव्याप्यवान् पक्षः प्रसिद्धः यथाकथञ्चित् सम्बन्धेन तद्वत्त्वञ्चातिप्रसक्तं धूमादेरपि ज्ञानरूपेण तदाश्रयाश्रयत्वादिना वा सम्बन्धेन व्यभिचारादिमत्त्वात् यादृशसम्बन्धावगाहित्वेन ज्ञानस्य प्रतिबन्धकत्वं तेन तद्वत्त्वञ्च न सर्वत्र सत्प्रतिपक्षिते हेतावस्ति च क्वचित् सद्धेताविति कृतं पल्लवितेन।

यद्यपीति स्थाणुत्वाभावस्य तद्व्याप्यकरादेश्च निश्चये स्थाणुत्वप्रत्यक्षशाब्दयोरनुदयात्। नचैवं नरशिरःकपालं शुचि प्राण्यङ्गत्वादित्यादिनाप्यागमप्रतिरोधः स्यात् तत्रानुकूलतर्काभावेन बलवत्तरागमविरोधेन च व्याप्तिनिश्चयस्यानुमितेश्चानुत्पत्तेरिति भावः यद्वेत्याद्यभ्युच्चयमात्रं प्रत्यक्षं प्रत्यानुमानिकबाधादिनिश्चयस्याप्रतिबन्धकत्वेऽपि शाब्दं प्रति प्रतिबन्धकत्वात् योग्यताज्ञानेनान्यथासिद्धत्वात् तदभावो न तत्र हेतुरिति चेदेवमप्युपनीतभानविशेषं प्रतितत्त्वेन हेतुतायादुर्वारत्वात्। यद्यपि लक्षणतः सामान्यप्रतीतवतो विशेषजिज्ञासानुदयात् सामान्यलक्षणानन्तरमेव विशेषविभागो युक्तस्तथापि सव्यभिचारपदस्य साधारणमात्रे प्रसिद्धतया तन्मात्रस्य लक्ष्यभावं बुध्यमानैरन्तेवासिभिरसाधारणादिसाधारणस्य लक्षणस्यातिव्याप्तिस्तद्व्यावृत्तस्यैव च साधुता प्रतीयेत अतस्तद्वारणाय लक्ष्यान्तरमपि दर्शयति सव्यभिचार इति। कश्चित्तु सामान्यज्ञानाधीनो विभागो न तल्लक्षणतः प्रत्ययमपेक्षतेऽतः प्रथमं विभागकरणेऽपि न दोष

इत्याह । प्रसक्तिरनुमितिरापत्तिर्वा तदुपधानमव्यापकमति-व्यापकञ्च तथाविधव्याप्तिभ्रमेण सद्धेतावतस्तद्योग्यता वाच्या सा च तादृशव्याप्त्यादिरूपा न च विरुद्धो भयव्याप्यत्वमेकस्य सम्भवतीत्याह एकस्येति । साध्येति कोटिद्वयोपस्थापकं सत् साध्यसन्देहजनकं साध्यसन्देहजनककोटिद्वयोपस्थिति-जनकमिति यावत् । आश्रयतया विषयितया वा नित्यत्वा-नित्यत्वोपस्थापकस्य नित्यत्वे साध्ये ज्ञानस्यानुवृत्तत्वव्यावृत्तत्वाभ्यां वह्नितदभावोपस्थापकस्य वह्नौ साध्ये धूमस्य वारणाय जनकान्तम् । तयोपस्थितेः साध्यसन्देहाजनकत्वात् धर्म्मि-तावच्छेदकपुरोवर्त्तित्वादिविशिष्टधर्म्मिज्ञानस्य संशयजनकतया तद्वारणाय कोटिद्वयोपस्थापकेति । न च तदसाधा-रणतया संग्राह्यमेवेति वाच्यं तथात्वेऽपि तदुत्तीर्णतादशायां विशेषदर्शनात् संशयानुपधायकत्वेऽपि तज्जननयोग्यताया अनिवृत्तेः । अन्यथा यथायथं पक्षे साध्यतदभाव-निश्चयदशायां साधारणाव्याप्तिप्रसङ्गात् । प्रतिपक्षस्खलन-दशायां हेतुमत्ताज्ञानस्य साध्यसन्देहजनकत्वपक्षे हेतु-वारणाय कोटीत्यादिहेतुना साध्यस्य प्रतिहेतुना तदभावस्य उपस्थापनादुभयोपस्थापकत्वं न कस्यापीत्यपि कश्चित् । इदं द्व्यणुकं नित्यमणुत्वादित्यादौ साधारणधर्म्म-वत् धर्म्मिज्ञानस्य कोट्युपस्थितिं संशयञ्च प्रतिहेतुतया-तद्विषये धर्म्मिणि सद्धेतौ अतिप्रसङ्गः स्यादतः पक्षधर्मतेति पक्षपदं धर्मिमात्रपरम् । नचैवं नित्यो घटः शब्दत्वादित्यत्र

बाधाद्यवतारेऽसाधारण्यापत्तिरिष्टत्वात् अन्यथा बाधासिद्ध्यो-
रन्यतरावतारदशायां साधारण्यासंग्रहापत्तेः असिद्धिसङ्की-
र्णत्वे सव्यभिचारमध्याप्रवेशे सव्यभिचारसङ्कीर्णतया असि-
द्धेऽप्यनन्तर्भावापत्तौ तदतिरिक्तहेत्वाभासत्वापत्तेः न च
व्याप्यविरुद्धयोः साधारण्यभ्रमदशायामतिप्रसङ्गः धर्मिणि
यद्रूपावच्छिन्नवत्ताज्ञानं साध्यसंशयजनकं तद्रूपावच्छिन्न-
त्वस्योक्तत्वात् तत् रूपं साधारण्यादीति सिद्धान्ते स्फुटो
भविष्यति । इदं सविषयकमात्मवृत्ति वा ज्ञानत्वात् इत्यादौ
प्रामाण्याप्रामाण्यसंशयस्य तद्घटकीभूतसाध्यतदभावविषय-
कतया कोट्युपस्थितिरूपस्य जनकीभूतज्ञानविषये ज्ञानत्वे तु
नातिप्रसङ्गशङ्कापि साधारणधर्मवत्ताज्ञानस्य तज्जन्यकोट्युप-
स्थितेर्वा संशयजनकतया तज्ज्ञानस्य तादृशसंशयाहेतुत्वात्
प्रामाण्यसंशयस्थले तु ज्ञानत्वलक्षणसाधारणधर्मदर्शनात्
ज्ञाने प्रामाण्यस्य ज्ञानविषयतात्मकसाधारणधर्मदर्शनाच्च
विषये तद्वत्त्वस्य सन्देहः अप्रामाण्यग्राह्यन्यथासिद्धिविधानन्तु
भ्रमत्वज्ञानशून्यविरोधिज्ञानस्य प्रतिबन्धकतया तदप्रामाण्य-
प्रयुक्तमित्यस्याकरे व्यक्तत्वात् व्याप्यवत्तासंशयस्य पृथग्व्या-
पकवत्तासंशयहेतुत्वपक्षे ज्ञानपदं निश्चयपरं हेतुत्वाभिमत
विशेषणन्तु येन सम्बन्धेन तदुभयसाहचर्य्यं तेन सम्बन्धेन
तद्वत्ताज्ञानस्य संशयादिजनकतासूचनार्थं तेनात्मत्वकपा-
लत्वादिसाध्यके समवायसम्बन्धेन हेतौ ज्ञानघटादौ वि-
षयत्वसंयोगादिना तत्सन्देहजनके नातिप्रसङ्ग इति । वि-

प्रतिपत्तौ प्रत्येकं कोटिद्वयेन व्यापकताभावात् लक्षण-स्थद्वयपदेन तद्वारणात् मिलितस्य तदुभयव्यापकत्वेऽपि तद्वृत्तिज्ञानं न तथा न वा मिलितयोरुभयोर्ज्ञानजनकत्वं तथात्वेऽपि वा येन सम्बन्धेन तद्वृत्तिज्ञानजनककोट्य-व्यापकं तेन सम्बन्धेन हेतुत्वेऽपि न व्यभिचारित्व-मिति।

अनुपसंहारी पक्षएवेति अनुपसंहारित्वदशायां साध्य-तदभावसहितत्वनिर्णयाभावेऽप्युक्तलक्षणे वास्तवसहचरित-त्वमादायैव लक्षणसमन्वय इति भावः। केचित्तु साध्यादि-धर्मेऽपि साधारण्यज्ञानात् संशयस्योदयात् तज्ज्ञानं च वस्तुतः साधारण्यज्ञानेऽप्यनुदयात् साधारण्यज्ञानं हेतुत्वञ्च निश्चयत्वमकिञ्चित्करं गौरवात् तथाच पक्षस्य तत्संशया-त्मकतदुभयसाहचर्यज्ञानाद्भवति तथात्वमिति भाव इत्याहुः, तच्चिन्त्यम्। ननु केवलान्वयिसाध्यकानुपसंहारिणि साध्या-भावाप्रसिद्ध्या तत्संशयाद्यभावादव्याप्तिः एवं यत्र स्थिरे धर्म्मिणि पूर्वं घटत्वं गृहीतमुत्तरदशायां तत्रैव दोषात् घट-त्वाग्रहे तद्घटभिन्नोऽयमिति भ्रमे च घटत्वनिश्चयविषयीभव-दमिथ्यावृत्तित्वेन गृह्यमाणतया असाधारणे इदन्त्वेऽपि वस्तुतस्तद्व्याप्तत्वाभावेन तत्र लक्षणायोगादित्यतस्तयोर्ल-क्ष्यत्वाभावेन परिहरति केवलान्वयीति। अतएवेति अतएव पुरुषदोषाधीनं तद्दोषत्वम् अतएव तस्यानित्यदोषत्वं साह-जिकत्वे कादाचित्कत्वानुपपत्तेः एवञ्च यत्र दोषताप्रयोजकं

वस्तुतो हेतौ तत्रानित्यदोषत्वमपि यत्र पुरुषस्य तद्भ्रमो न तत्र तदपि असमानाद्युक्तेऽतिप्रसङ्गमाह अन्यथेति के चित्। परे तु अयं घट एतत्त्वादित्यादावव्याप्तिः। साध्य-सन्देहप्रयोजकं हि तस्य साध्यतदभाववद्व्यावृत्तत्वं नाटकस्य धर्मस्य तदुभयव्यावृत्तत्वं सम्भवति असाधारण्यन्तु तस्य पक्ष-मात्रवृत्तितया अतस्तस्यालक्ष्यतया तद्यति अयं घट इत्यादि एवव्यावृत्तिगगनादिकमेवासाधारणं पक्षमात्रवृत्तित्वमसदृशाया व्यासाधारण्यव्याप्तत्वाः न चोभयव्यावृत्तत्ववृत्तिमत्त्वयोः स्य-कालो विरोधः निश्चितसाध्यतदभाववद्व्यावृत्तत्वस्य न सन्देह-प्रयोजकं तथा सति तुल्यबलतया निश्चितसाध्यतदभाववद्-वृत्तित्वस्यापि तत्त्वे सति साध्याभाववत्त्वग्रहविषय-वृत्तिवग्रहदशायामतिप्रसङ्गात् न च तादृशनिश्चयविषयस्य धर्मिणा वास्तवं साध्याभावादिसत्त्वमपि तत्त्वं मानाभावात् किञ्च सन्देहजनकतावच्छेदकरूपस्य विशेषणत्वे व्यभिचारि-गसभादो मानसादिवृत्तितादशायामव्याप्तिः उपलक्षणत्वे असाधारण्योक्तौ तादृशायामतिव्याप्तिः असाधारणप्रकरण-समययोस्तत्त्वेन अनुविषययोरनित्यदोषत्वं विशेषादर्शनदशा-यामनुमित्यनुत्पादप्रयोजकत्वं न तु वास्तवं हेतुदोषत्वम् अ-न्यथानुमित्यनुत्पादप्रयोजकज्ञानविषयतामात्रेण वास्तवहेतु-दोषत्वे इत्याहुः। अनवगतसाध्यसहचारत्वे सति अवगत-साध्याभावसहचारतया विरुद्धत्वमेव तयोरिति इदन्त्वभ्युप-गमवादेन वस्तुतो यथोपवर्णितलक्षणस्य न तत्राव्याप्तिरिति

ध्येयम् । यद्रूपज्ञानमनुमितिप्रतिबन्धकं तदेव विभाजकम् अन्यथा अतिप्रसङ्ग इत्यभिप्रेत्य दूषयति नैतदिति । वस्तुतस्तु उपस्थापकत्वादिज्ञानमनुमितेस्तज्जनकस्य वा न प्रतिबन्धकं विरोधिविषयकत्वाभावात् एवमुक्तरत्रापि पक्षवृत्तित्वे सतीति विरोधित्वं विरोधिज्ञानविषयत्वम् अव्यावृत्तिपदम् अन्यत्वायोगव्यवच्छेदार्थकं तेन संयोगसम्बन्धेन व्यभिचारिणि द्रव्ये हेतौ व्यभिचाराभावदशायां नातिप्रसङ्गः साध्यवद्वृत्तिस्तु नासाधारण इति हृदयम्। अपक्षधर्म्मधूमादिवारणाय सत्यन्तं पक्षः सन्दिग्धसाध्यो धर्म्मी विशिष्टहेतौ तद्वृत्तित्वग्रहाविरोधित्वञ्च तदर्थः तथाच पक्षतावच्छेदकरूपेण पक्षे साध्यतावच्छेदकरूपेण साध्यस्य हेतुतावच्छेदकरूपेण हेतौ र्व्वा यज्ज्ञानं तदविरोधित्वस्य लाभात् पक्षसाध्यसाधनाप्रसिद्धिस्वरूपासिद्धिबाधप्रतिरोधानां निरासोऽसिद्धिसङ्कीर्णसंग्रहः विरोधोऽपि फलतः प्रतिरोधएव तदन्यत्वेन वा विरोधिविशेषणीयं वक्ष्यते च सिद्धान्ते विरुद्धान्येति हेतुसाध्यसामानाधिकरण्यग्रहाविरोध्यर्थकं सम्बन्धपदबलेन प्रकृतहेतुसम्बन्धितया विरोधित्वे तात्पर्य्योपवर्णनेन प्रायशो बाधादिवारणेऽपि घटत्वमनित्यं घटत्वादित्यादौ प्रयत्नसाध्यमिव तत् प्रतिभाति वस्तुतस्त्वनुमितिपदं तत्कारणज्ञानपरम् आश्रयासिद्ध्यादिवारणाय सत्यन्तं तादृशपक्षकतादृशहेतुकग्रहाविरोध्यर्थकम् अनया च वाचोभङ्ग्या व्याप्तिग्रहविरोधित्वमेवाभिप्रेतं तेन वह्निमान् वह्निमान् ह्रदत्वादित्यादौ हेतोः

साध्यवदवृत्तित्वादेर्नासंग्रहः विवेचयिष्यते चेदमुपरिष्टात्। सपक्षेति मम्मातायातम् अतएवानुपदं विरुद्धोऽपीत्यादिकं व्यर्थेति विशेषणं पक्षवृत्तित्वं साध्याव्याप्यत्वं इति हेत्वाभासत्वं हेतुवदाभासमानत्वं वत्यर्थश्च वृत्तिमत्त्वम् एवञ्च साध्यतद्दभावव्याप्यत्वग्रहविरोधिवृत्तिमत्त्वग्रहाविरोधिरूपवत्त्वमर्थः। साध्यतदभाववद्वृत्तित्वं साधारण्यं निश्चितसाध्यतदभाववद्व्यावृत्तत्वमसाधारण्यं तच्च व्याप्तिद्वयग्रहविरोधीति हृदयम् असिद्धिविशेषस्ववृत्तित्वं वृत्तिमत्त्वग्रहविरोधि साध्यतदभाववद्व्यावृत्तत्वमपि यदीष्टञ्च तदा असिद्धिरेव नो चेदिदमेवासाधारण्यं बोध्यं साध्याप्रसिद्ध्यादिवारणाय विशिष्टसाध्यसाधनग्रहाविरोधित्वं वाच्यं व्यापकसामानाधिकरण्यमिह व्याप्यत्वं तेन च द्वितीयस्य भेदः रीतिस्तुल्यैव। केचित्तु असाधारण्याभावकालावच्छिन्नमाध्यतदभावव्याप्तिशून्यत्वं विवक्षितं विशेषणाभावात् वस्तुतो व्याप्यस्य विरुद्धस्य वा असाधारणस्य संग्रह इत्याहुस्तच्चिन्त्यम्। व्यर्थेति विरोधादेर्वारकं साध्याभावेत्यादि व्यर्थं तस्य पार्थक्ये प्रमाणाभावादिति भावः। प्रथममित्यादि गगनमित्यादि च दूषणं यथाश्रुते नापीत्यादि सपक्षविपक्षत्वावच्छिन्नव्यावृत्तत्वं सर्वतद्व्यावृत्तत्वं व्यर्थेति सपक्षवृत्तित्वविपक्षव्यावृत्तत्वयोर्दूषकतायामनुपयोगादिति भावः। पक्षातिरिक्तेत्यादि व्याप्यविरुद्धयोरसाधारण्योः संग्रहाय पक्षातिरिक्तपदे पक्षत्वं सन्दिग्धसाध्यकत्वं धर्मेत्यादिदूषणं

यथा श्रुते नतु सप्तमीसमासात् पक्षातिरिक्ते वर्त्तते यात्साध्य-वन्मात्रवृत्ति साध्याभाववन्मात्रवृत्ति च तद्भिन्नत्वमित्यर्थ इति ध्येयम्। पक्षवृत्तीत्यादि विरोधः साध्यासामानाधिकरण्यं पक्षवृत्तित्वसाध्यासामानाधिकरण्यग्रहाविरोधी योऽनुमितेरौपयिकस्य जनकज्ञानविषयस्य सम्बन्धस्य सपक्षसत्त्वादेरभाव-स्तद्वत्त्वमित्यर्थः सपक्षविपक्षव्यावृत्तत्वस्य नासाधारण्यस्य असाधारण्ये निश्चये पक्षे साध्यसामानाधिकरण्यसन्देहान्न तस्य तज्ज्ञानविरोधित्वं पक्षवृत्तौ विरुद्धभिन्ने च वर्त्तते यस्तादृशोऽभावस्तद्वत्त्वमर्थ इति केचित्। पूर्वोक्तलक्षणानां यथोक्त-रीत्या यथामतं नाव्याप्त्यादिसम्भावना परन्तु तज्ज्ञानस्यानु-मित्यप्रतिबन्धकतया तेषां हेत्वाभासतावच्छेदकत्वं न घटते न घटतां किन्तेन तेषां हेत्वाभासविभागमात्रोपयोगित्वादित्या-शयेनाहउच्यत इति। सन्देहं प्रत्येव साधारण्यादिविशिष्टध-र्म्मवद्धर्मिज्ञानत्वेन हेतुता तज्जनककोटिद्वयोपस्थितिं प्रति तु तादृशधर्म्मज्ञानत्वमात्रेणेत्यभिप्रेत्याह उभयेति। साध्यसन्दे-हजनकेति प्रकृतं यथाकथञ्चित् कोटिद्वयोपस्थितिः स्मृत्यनु-भवसाधारणीसन्देहजननीनियामकन्तु साधारण्यादिविशि-ष्टधर्मवत्ताज्ञानम् अतएव धारावाही सन्देह इति मते तु धर्मितावच्छेदकविशिष्टे धर्मिणि यद्रूपविशिष्टज्ञानं साध्य-सन्देहजनकं तद्रूपवत्त्वमेव वक्तव्यं कोटिद्वयसहचरित-त्वादिना ज्ञातस्य ऊर्द्ध्वत्वादेरूर्द्ध्वत्वत्वादिना धर्मिणि ज्ञानमेव संशयजनकं नतु तदानीं साहचर्य्यज्ञानमपेक्षत इति नये तु

यद्रूपविशिष्टत्वे न गृहीतस्य धर्म्मस्य धर्म्मिवृत्तिताज्ञानं तथा तद्वत्त्वमेव वाच्यम्। तच्चेति ननु साधारण्यं न साध्यतदभाववद्व्यावृत्तत्वं वृत्तिमतस्तथात्वासम्भवात् एककोटिव्याप्यस्यैव एककोटिमद्व्यावृत्तस्यापि धर्म्मस्य बुद्धेर्विशेषदर्शनतया संशयविरोधित्वाच्च सत्प्रतिपक्षे च परामर्शाप्रामाण्यसंशयोत्तरमेव साध्यसन्देहात् नापि निश्चितसाध्यतदभाववद्व्यावृत्तत्वं तद्धि यत्र यत्र साध्यादिमत्तानिश्चयस्तद्व्यावृत्तत्वं येन येन रूपेण यत्र यत्र तन्निश्चयस्तेन तेन तद्व्यावृत्तत्वं वा आद्ये सर्व्वाणि साध्यव्याप्यवन्ति साध्यवन्ति सर्व्वाणि वा असाध्यवन्ति प्रमेयाणीत्यादिनिश्चये सामान्यतः पक्षेऽपि साध्यादिनिश्चयादतथात्वप्रसङ्गः द्वितीये तु विशिष्य पक्षे साध्यनिश्चयं विनैव शब्दादिना साध्यव्याप्यत्वनिर्णयेऽपि तथात्वापत्तिः नैष दोषो यादृशव्याप्तिग्रहे सति नासाधारण्यं तदभावेन विशेषलक्षणस्य साधारण्याभावविशिष्टस्य तद्ग्रहस्य चाभावेन सामान्यलक्षणस्य विशेषणादतिव्याप्तिनिरासात् विशिष्टाभावादेव च साधारण्ये व्याप्तिभ्रमदशायां नाव्याप्तिरिति चेत् एवं प्रत्येकेन व्याप्तौ गृहीतायामसाधारणस्य न कञ्चिदपि प्रति व्यभिचारित्वं स्यात् यदा तदपि तत्तद्रूपघटितमसाधारण्यवत् साध्यादिव्याप्यवत्त्वेन रूपेण साध्यादिमत्त्वनिश्चयेऽव्याप्तिप्रसङ्गाच्च न हि घटोऽनित्यो घटाद्व्यावृत्तं शब्दत्वमितिवत् अनित्यत्वव्याप्यवतो व्यावृत्तं शब्दत्वमिति तदानीं निश्चयः अभिहितञ्च निश्चितसाध्यतदभाववद्व्यावृ-

त्त्वं न संशयप्रयोजकं किन्तु साध्यतदभावाभ्यां सहचरितत्वमिव तत्सहचरिताभावप्रतियोगित्वं व्याप्यविरुद्धयोस्तु तत्त्वेन निश्चितयोर्दर्शने विशेषदर्शनवशादेव न संशय इति विभाव्य लक्षणान्तरमाह विरुद्धान्येति विशिष्टसाध्यहेतुसामानाधिकरण्यग्रहाविरोध्यर्थकमयंतो विरोधिविशेषणं तेन साध्यसाधनयोरप्रसिद्धेरवृत्तित्वस्य परम्परासामानाधिकरण्यादीनाञ्च निरासः पक्षपदञ्च धर्म्मिमात्रपरं तथाच यद्धर्म्मिवृत्तित्वं हेतोर्ज्ञायते तत्र तत्रैवानुमितिविरोधि यद्रूपं तद्वत्त्वमित्यर्थः साध्यव्यापकीभूताभावप्रतियोगित्वन्तु तथा बाधप्रतिरोधौ तु धर्म्मिविशेषितत्वात् न तादृशौ सर्वं साध्याभाववत् तद्व्याप्यवत्त्वेत्यादिकञ्च साध्यवत्त्वग्रहविरोधित्वेन सामानाधिकरण्यग्रहविरोधिसाध्यानुमितिसामान्याविरोधित्वं वा विशेषणं तेनैवेति तेनानुमितिविरोधिना विपक्षवृत्तित्वादिना एवकारेणानुगमकं रूपं अवच्छेद्य तस्य हेत्वाभासतावच्छेदकत्वं निरस्यति हेत्वाभासस्य लक्षणानुरोधेनेति तेनानुमितिविरोधित्वघटितलक्षणकरणेन असाधारणस्य सत्प्रतिपक्षोत्थापकतया दूषणत्वपक्षे नाव्याप्तिरितरथा पुनरव्याप्तिरेव साध्याभावव्यापकत्वेन साक्षात्साध्यवत्तानुमितिविरोधित्वेन। सर्वमनित्यमित्यादि सम्प्रदायमनुरुध्योक्तम् अतएव तावग्रेऽन्तर्भावयिष्यति नापीति निश्चितसाध्यवति साध्यवद्भिन्ने च वर्त्तमानत्वमित्यर्थः। अनुपसंहार्य्ये इति साध्यवदन्यवृत्तित्वांशस्य तत्रापि सत्त्वादिति

भावः नापीति इह सपक्षत्वं न निश्चयगर्भमतो नाभेदः घट इत्यादि इत्यस्य विरुद्धस्य अनुपसंहार्य्यस्य प्रसिद्धस्य च विरुद्धान्तरस्य व्यवच्छेद्यत्वादित्यर्थः अन्वयतो व्यतिरेकतश्च सहचाराग्रहदशायामीदृशं द्वित्वमनुपसंहारीति मतेनेदमित्यपि कश्चित्। विपक्षेति अत्र विपक्षत्वं साध्याभाववत्तम् अनुपदमेव वस्तुगत्या साध्याभाववद्वृत्तित्वेन साधारण इति मूलएव स्फुटतरमभिधानात् न तु निश्चयगर्भं तज्ज्ञानस्याप्रतिबन्धकत्वात् न च वस्तुतो यत्र तन्निश्चयस्तद्वृत्तित्वज्ञानं प्रतिबन्धकं रूपान्तरेण साध्याभाववत्तया निश्चिते रूपान्तरेण हेतुज्ञानेऽप्यप्रतिबन्धात् नचैकेन रूपेण तत्तथा गौरवात् हेतुसाध्याभावयोः सामानाधिकरण्यास्फुरणेनाविरोधात् साध्याभाववद्वृत्तिर्हेतुरित्यादि शाब्दज्ञानानामप्रतिबन्धापाताच्च यत्तु साध्याभावांशे निश्चयरूपं शेषांशे संशय साधारणं साध्याभाववद्वृत्तित्वज्ञानं प्रतिबन्धकमन्यथा पक्षएव साध्यसन्देहेन सन्दिग्धानैकान्तिकत्वापत्तेरिति यदाहुः नहि पक्षे पक्षसमेवा व्यभिचार इति तन्न व्याप्तिनिश्चये हेतौ व्यभिचारसंशयायोगात् तदनिश्चयदशायाम् अनुकूलतर्कास्फूर्त्तौ सन्दिग्धानैकान्तिकत्वस्येष्टत्वात् हेतुसाध्याभावसामानाधिकरण्यावगाहितयैव ज्ञानस्य व्याप्तिग्रहप्रतिबन्धकत्वात् अतएव पक्षः साध्यातिरिक्तपक्षधर्मातिरिक्तधर्मवान् मेयत्वादित्यादयोऽनुकूलतर्कविरहिणोबाधप्रतिरोधयोरनवतारेऽपि पक्ष एव सन्दिग्धानैकान्तिकतया अप्रयोजका गीयन्ते एवं वह्निर्द्दाहानुकूलेत्यादयः

शक्तिसाधका अपि अन्यथा पक्षातिरिक्ते सर्वत्र साध्यवत्ता-निर्णयाद्व्याप्तिग्रहस्य दुर्वारत्वात् पक्षविपक्षान्यतरत्वादिना सर्वत्र सत्प्रतिपक्षप्रसङ्गाच्च अथ साध्यतद्वदत्यन्तान्योऽन्या-भावगर्भव्यभिचारयोरेकोपादानेऽन्यतराव्याप्तिः साध्यवत्ता-ज्ञानप्रतिबन्धकज्ञानविषयत्वेनाभावद्वयानुगमेऽपि हेतुमति तादृशाभाववत्त्वस्य तादृशाभाववति हेतुमत्त्वस्य तादृशा-भावे हेतुसामानाधिकरण्यस्य साध्यतद्वदादौ हेतुसमा-नाधिकरणतादृशाभावप्रतियोगित्वादेश्चासंग्रह इति चेत् अत्र वदन्ति प्रकृतसाध्यसाधनसामानाधिकरण्यग्रहाविरो-धिनो ज्ञानस्य विषयतया अन्वयव्याप्तिग्रहविरोधितावच्छेदक-त्वेन विभजनान्नासंग्रहः अविरोधिन इत्यन्तेन साध्याप्रसि-द्ध्यादीनां निरासः यदि पुनरत्यन्तान्योऽन्याभावयोरेकतर-गर्भव्यभिचारज्ञानस्य नान्यतरगर्भव्याप्तिग्रहविरोधित्वम् इत्यादिकं विभाव्यते तदा साध्यसामानाधिकरण्यघटितत्वे-नान्वयव्याप्त्योऽनुगमनीयाः प्रातिस्विकरूपेणोपादाय वा तावद्व्याप्त्यवगाहित्वं ग्रहस्य वक्तव्यं साध्याव्यभिचरितसामा-नाधिकरण्यस्य व्याप्ये प्रसिद्धस्य हेतौ विरहोऽप्येतद्विशेष एव विशिष्टसाध्यसाधनवत्त्वग्रहाविरोधिनो ज्ञानस्य विषयतया व्यापकत्वग्रहविरोधितावच्छेदकरूपत्वं वा विभाजकं शेषं पूर्ववत् । साध्य तद्वतोरत्यन्तान्योऽन्याभावौ साध्याभावव्या-प्यादिव्यावृत्तेन साध्यवत्ताज्ञानविरोधित्वेनानुगमस्य तत्र हेतुसामानाधिकरण्याभावग्रहविरोधित्वं साध्यवत्ताज्ञान-

विरोधिनि तादृशाभावग्रहविरोधिहेत्वाभासतावच्छेदकरूपवत्त्वं वा तथा वक्तव्यं साध्याभावव्याप्यादौ तु हेतुसामानाधिकरण्यादिकमविरोधित्वान्नाभासः विरोधित्वं पूर्वोक्तदिशावसेयम् उपदर्शितविशिष्टव्याप्तिविरहो व्याप्यत्वासिद्धिरेवेति व्याप्तिग्रहकारणसहचारग्रह सहकार्य्यभावप्रतियोगिग्रहविषयत्वेनानुगम इत्यपि कश्चित्। प्राचां मतेनोत्तरयति न सर्वेत्यादि। सर्वेति विपक्षेऽप्यन्वेति तेन साध्याभावव्न्नवृत्तेर्व्युदासः विपक्षत्वस्य निश्चयगर्भत्वात् भूरनित्या गन्धवत्त्वात् नित्यः शब्दः शब्दत्वादित्यादौ नाव्याप्तिः पृथिवी रूपवती रसादित्यादौ जलादेर्नीरसत्वभ्रमे पुनरसाधारण्यभ्रम एवेति मन्तव्यम्। तथापीति पक्षत्वं सन्दिग्धसाध्यकत्वं मतं दूषयति अथेत्यादि। व्याप्तेति तथाच स्वतो दूषणाक्षमत्वान्नाभासत्वम् उपाधिवदिति भावः एकधर्म्मिव्यावृत्तत्वञ्च न सामानाधिकरण्यग्रहविरोधिधर्म्मान्तरे तत्सम्भवात् अन्यथा सतोरपि साध्यसाधनयोर्व्यतिरेकित्वं दोषाय स्यात् अथायं शङ्कितुरभिप्रायः पक्षे साध्याभावस्य संशयो निश्चयश्चानुमितिविरोधी विरोधिविषयकत्वात् तत्सामग्री च विरोधिसामग्रीत्वेन तत्रादिमस्य सामग्रीपक्षे सव्यभिचारस्य हेतोर्ग्रहः द्वितीयस्य तु प्रतिहेतोः परामर्शः अतस्तयोराभासत्वम् अतएव सव्यभिचारलक्षणे पक्षवृत्तित्वं विशेषणं साध्याभाववद्वृत्तित्वमात्रं पुनरसिद्धिरेवेति विरोधान्यस्य परामर्शविरोधिनो रूपस्य तत्त्वादिति मैवं बाध-

संशयस्य प्रतिबन्धकत्वानङ्गीकारात् साधारणधर्म्मवत्ताज्ञानस्य संशयसामग्रीत्वाभावात् सामग्रीत्वेन प्रतिबन्धकत्वे हेत्वाभासत्वायोगाच्च अन्यथा पक्षस्य साध्यतदभाववद्वृत्ति प्रमेयत्वादिमत्त्वं सर्वत्र हेत्वाभासोभवेत् तथा कामिनीजिज्ञासाप्रयोजकं तज्ज्ञानेष्टसाधनत्वादिकमपि। एवं विशिष्टस्यानुगताव्यत्वं व्युत्पाद्य केवलस्यापि सपक्षव्यावृत्तत्वस्य तथात्वं व्युत्पादयति किञ्चेति वाद्युपदर्शितदृष्टान्तस्य साधनवैकल्यन्तु नासाधारण्यं सपक्षान्तरवृत्तित्वेऽपि तत्सम्भवात् तद्भावनन्तु तस्य निग्रहस्थानत्वात् तद्विभाजकसूत्रस्यानुक्तसमुच्चायकचकारेण तस्य समुच्चितत्वात् तदाहरणस्याभासताप्रदर्शनायैव वा आवश्यकश्च प्राचां दृष्टान्तप्रयोग इति भावः। माभूत् परार्थानुमानेऽसाधारण्यं दोषः स्वार्थे तु स्यादत आह स्वार्थेति। स्वमते सिद्धान्तमुपक्रमते उच्यत इति। अर्थादिति व्यतिरेकिमुद्रया अर्थादुभयं साधयेत् अर्थवशसम्पन्नमेवोभयसाधकत्वम् उभयसिद्ध्यनुकूलव्याप्त्यादिग्रहादित्यर्थः व्यतिरेकितया वेति पाठे अर्थात् अर्थापत्तिविधयेति परमतेन एवञ्च पक्षधर्म्मतया ज्ञायमानो हेतुः साध्याभावव्यापकीभूताभावप्रतियोगित्वज्ञानात् साध्यस्य साध्यव्यापकीभूताभावप्रतियोगित्वज्ञानाच्च साध्याभावस्य साधनायोन्मुखो मिथो विरोधेन नैकमपि साधयति। न च शब्दे नित्यत्वानित्यत्वसन्देहे तदुभयव्यापकत्वं शब्दत्वाभावस्य ग्रहीतुमशक्यं व्यापकत्वाभिमतशब्दत्वाभावाभाववच्छब्दवृत्ति-

त्वस्य नित्यत्वानित्यत्वयोः सन्दिह्यमानत्वादिति वाच्यं तथात्वेऽपि तादृशसंशयाभावदशायां तथात्वनिश्चये तदुभयव्यापकीभूताभावप्रतियोगिशब्दत्ववत्त्वस्य शब्दे प्रतिसन्धातुं शक्यत्वात् स्वाश्रयमात्रतोऽन्येव प्रतीतस्य सौरभादेरभावस्य पानीयपाषाणादौ पृथिवीत्वतदभावसहचारेण तदुभयव्यापकताग्रहे तादृशाभावप्रतियोगित्वसम्भवा चन्दनादौ परामर्शे पृथिवीत्वादौ साध्ये तदभावसाधकताप्रतिसन्धानत्वाच्च। नन्वयं सत्प्रतिपक्ष एव व्याप्तेरन्वयव्यतिरेकरूपत्वात्... पकत्वेनाप्रयोजकत्वादित्यत आह सत्प्रतिपक्ष इति। नवीन... विभक्तिभेदेन पृथगभिधानेऽपि प्रसङ्गः... ग्रन्थकृतैवाभिधानात् तदभावसाधके न साधकत्वम्... प्रतिविशेषसूचनार्थत्वात् सत्प्रतिपक्षानैकान्तिकासिद्धत्वानामाक्रान्ततया उभयात्मकत्वमविकलाविरुद्धत्वादिदपि कश्चित्। सर्वसपक्षेति सपक्षः साध्यवान् पक्षतुल्ये सति साध्याव्यापकीभूताभावप्रतियोगित्वमित्यर्थः इदञ्च साक्षादनुमितिविरोधि विरोधश्च साध्यासामानाधिकरण्यादिरूपोऽन्वयव्याप्तिग्रहविरोधीति न साङ्कर्य्यशङ्कापि साध्यसमानाधिकरणन्तु नासाधारणं दशाविशेषे तद्ग्रहस्तु पुरुषदोषो व्याप्य इव साधारणभ्रमः। नवीनाः पुनरेवं वर्णयन्ति सामग्रीद्वयविरोधिना हेत्वभावस्य साध्यतदभावव्यापकताग्रहविरोधोऽसाधारणस्य दूषकताबीजं तथाहि वृत्तिमताहेतुना क्वचिदपि वर्त्तितव्यं तत्र चावश्यं साध्य-

तदभावयोरन्यतरेण भवितव्यं न च तत्र हेत्वभावः सम्भवति अतोऽवश्यमन्यतराव्यापकत्वं तस्य एवंविधविरोधध्रौव्ये साध्येन तदभावेन च हेत्वभावस्य सहचारज्ञानं नैकतरनिरूपितामपि व्यापकतां ग्राहयति मिथो विरोधात् विरोधिपरामर्शद्वयमिव साध्यतदभावौ एवञ्च वृत्तिमत्त्वविशेषितं हेतोर्यावद्विपक्षसपक्षव्यावृत्तत्वं वृत्तिमत्प्रतियोगित्वविशेषितं वा हेत्वभावस्य यावत्सपक्षविपक्षवृत्तित्वमसाधारण्यमिति योजयन्ति च ग्रन्थमित्थं ग्रन्थत्वं यदि साध्यतदभाववद्व्यावृत्तत्वेन तदुभयव्यापकीभूताभावप्रतियोगित्वेन ज्ञातं ज्ञानयोग्यं स्यात् तद्वत् स्यादिति यावत् तदा व्यतिरेकितया तादृशव्यतिरेकप्रतियोगित्वेनार्थात् पक्षे तदुभयं साधयेत् तदुभयसहचरितं भवेत् व्यापकाभाववति व्याप्याभावस्यावश्यम्भवात् अतथाभावे पक्षधर्मताया व्याप्तेर्वानुपपत्तिर्न च तथाभावः सम्भवति न वा पक्षवृत्तित्वं बाधितम् अतः साध्यतदभावौ व्यापकतया तदुभयसिद्ध्यनुकूलविरोधिव्याप्तिद्वयग्राहकव्यतिरेकसहचारद्वयग्रहविषयतया असाधारणो दोषो व्याप्तिद्वयग्रहप्रतिबन्धकः । ननु यदि विरोधिव्याप्तिद्वयं न गृह्णाति तदा सत्प्रतिपक्षोच्छेदः गृहीतविरोधिव्याप्तिद्वयहेतुसमुत्थत्वात् तस्येत्यत आह सत्प्रतिपक्ष इति । तत्र हेत्वोर्भिन्नतयाधिकरणभेदेन तथा ग्रहः सम्भवति अत्र पुनरेकस्मिन् हेतौ तदुभयग्रहो विरुद्ध इत्यर्थः । अत्र इदं चिन्त्यम् । एवं सति सपक्षादेर्यावत्त्वविशेषणं व्यर्थं

दूषकतायामनुपयोगात् व्यभिचाराग्रहमात्रोपक्षीणत्वात् वृत्तिमत्त्वादिविशेषितस्यापि चासाधारण्यस्य ज्ञानं न व्याप्तिज्ञानविरोधि विरोधिविषयकत्वाभावात् उपदर्शितविरोधस्य तच्छरीरेऽनन्तर्भावाच्च व्यापकतयोरपि च न स्वतो विरोधः उपदर्शितरीत्या तदवधारणे चावश्यं व्यभिचारज्ञानमेव प्रतिबन्धकमत एव सत्यपि असाधारण्यज्ञाने एकत्रानुकूल तर्कावतारे भवति व्याप्तिधीरिति एतेन तादृशसहचारज्ञानं तुल्यबलविरोधिव्याप्तिग्रहसामग्रीत्वेन प्रतिबन्धकं तर्कावतारे पुनस्तुल्यबलतैव नाप्नोति परास्तं तर्कस्य व्यभिचारशङ्का निवर्त्तकत्वेनैवोपयोगित्वात् सामग्रीत्वेन प्रतिबन्धकत्वे हेत्वाभासत्वायोगाच्च सत्प्रतिपक्षे च विरोधिव्याप्यवत्तानिर्णयत्वेन प्रतिबन्धकत्वं नतु विरोधिसामग्रीत्वेन बाधावतारे त्वापाततः सत्प्रतिपक्षितत्वेऽपि बाधेन प्रतिहेतोरव्याप्यत्वादिज्ञान एव साध्यानुमित्युदयादिति कृतं पल्लवितेन।

केवलान्वयीत्यादि सद्धेतुत्वं साधारणत्वञ्च केवलान्वयिनः साधनस्य व्यतिरेकिणस्तु भागासिद्धत्वं साधारणत्वं विरुद्धत्वञ्च यथासम्भवं बोध्यम्। नाप्नोति केवलान्वयिसाध्यकवारणाय सत्यन्तं व्यतिरेकिसाध्यकसद्धेतुवारणाय केवलान्वयीत्यादि पक्षत्वं साधकबाधकमानशून्यत्वं केवलान्वयिसाध्यकेऽपि बाधकमानप्रसिद्धिरुक्तैवेति न सत्यन्तवैयर्थ्यं निश्चितसाध्याभाववत्तन्मात्रवृत्तित्वे त्वसाधारण्ये विरुद्ध इति साधारण्याद्यग्रहदशायामसाङ्कर्य्यमिति वा हृदयम्। अव्या-

पकत्वादिरिति सद्धेतुत्वञ्च व्याप्तिनिश्चयदशायामेवेति भावः। अथेत्यादि पक्षातिरिक्तेन प्रतीतौ निश्चितौ व्याप्तिग्रहानुकूलोऽन्वयेन व्यतिरेकेन वा सहचारो यस्य स तथा सद्धेतुरेवेति तथाच लक्षणे पक्षातिरिक्तपदं सहचारग्रहस्थलमात्रोपदर्शकं न तु विशेषकमिति विशेषकत्वाभिप्रायेण दूषणदूरमाह तत्रैवेत्यादि असाधारणे सपक्षव्यावृत्ते पक्षतादशायां शब्दोऽभिधेयः शब्दत्वादित्यादौ जलं निःस्नेहं शीतस्पर्शवत्त्वादित्यादौ च रूपं जलं वा द्रव्यभिन्नं गुणवत्त्वात् गुणकर्म्मान्यत्वविशिष्टसत्त्वादित्यादौ विरुद्धे चातिव्याप्तिरित्यर्थः। दूषकताया-मिति सहचाराभावस्यैव ज्ञानं विरोधि न तु तत्प्रत्ययांशस्यापीति अर्थगत्येति अनैकान्तिकशब्दार्थविवेचनेन प्रातिस्विकरूपेणैवप्रतिबन्धकत्वलाभादित्यर्थः। केचित्तु दूषकतायामसाधकतायाम्। अर्थेति अनैकान्तिकशब्दार्थे उभयकोट्युपस्थापकत्वादौ साध्योपस्थापकत्वाद्यंशस्य व्यर्थत्वादित्यर्थ इत्याहुः। विप्रतिपत्तिः पक्षसाध्याभावप्रीतितिः साध्ये पक्षनिष्ठाभावप्रतियोगित्वप्रतिपत्तिर्व्वा आद्ये केवलान्वयीति साध्याभावाप्रसिद्ध्या अव्याप्तिरित्यर्थः। उभयत्र सर्व्वस्येति अतिव्याप्तेरिति पाठे तन्मात्रवृत्तित्वं तत्वव्याप्यवृत्तिकत्वं तदितरावृत्तित्वं वा आद्ये केवलेति इदञ्च यथाकथञ्चिद्व्याप्तिग्रहदशायां द्वितीये सर्व्वस्येति व्याप्तेत्यादि यत्र यस्येत्यर्थः तथाच हेत्वभिमतशब्दोपसन्दानात् तद्धेतुकप्रकृतसाध्यसिद्ध्यौपयिकव्याप्तिग्रहानुकूलोपसं-

हाराभावस्तस्यानुपसंहारित्वमित्यर्थलाभाद्व्यतिरेकिणि नातिव्याप्तिः। ननूपसंहारः सहचारः तन्निश्चयो वा आद्ये तादृशस्याभावो निखिलप्रसिद्धानुपसंहार्य्यव्यापकः अतिव्यापकस्य रूपं द्रव्यभिन्नं गुणवत्त्वाद्गुणकर्म्मावृत्तिजातिमत्त्वादित्यादेः द्वितीये पुनरज्ञानरूपासिद्धिपर्य्यवसायी कारणाभावतया स्वरूपसन्नेव दोषो न हेत्वाभास इत्यत आह केवलान्वयीति पक्षः साध्यनिश्चयविरोधिनः साध्यवान्न वेत्यादेः सन्देहस्य विषयोऽवच्छेदकत्वञ्च स्वान्यूनवृत्तितत्कत्व तच्च स्वरूपसतोऽप्यविरुद्धं तेन प्रातिस्विकद्रव्यत्वादिरूपेण सर्वत्र साध्यसन्देहदशायां नाव्याप्तिः एवञ्च सर्वत्रैव हेत्वादिमति साध्यतदभावसन्देहाद्व्याप्यग्रहेणाभासत्वम। परार्थस्थले बहिर्भावं व्युत्पादयति एवमित्यादिना असिद्धिरनिश्चयः ज्ञाने ज्ञापने स्वार्थस्थलेऽन्तर्भावम् एतेनेत्यादिनाशङ्क्य निरस्यति उपजीव्यत्वादिति अत्रेदं चिन्त्यं हेतुमति साध्याभावसन्देहो नाभासः सत्त्वयैव विरोधित्वात् तद्विषयस्य हेतोः साध्याभावसामानाधिकरण्यं साध्यस्य वा हेतुमन्निष्ठाभावप्रतियोगित्वं नास्त्येव केवलान्वयिसाध्यके व्यतिरेकिसाध्यके तु साधारण्य रूपतया सन्दिग्धानैकान्तिकत्वं पर्य्यवसितं विश्वविषयकसाध्यतदभावसन्देहे च कारणीभूतान्वयव्यतिरेकसहचारग्रहविरहात् संशयसामग्र्या साध्यतदभाववत्त्वनिश्चयप्रतिबन्धाद्वा व्याप्यग्रहेऽज्ञानरूपासिद्धिरेव उपजीव्योऽपि च साध्याभावसन्देहादिर्नाभासः सत्त्वयैव विरोधादिति

यत्तु व्याप्नोति व्याप्तिग्रहानुकूलसहचारनिश्चयत्वावच्छिन्न विरोधिरूपत्वमर्थः विरोधस्तु संशयसाधारणमन्वयमात्रसहचारग्रहं विरुणद्धि असाधारणे व्यतिरेकिणि च न व्यतिरेकसहचारग्रहविरोधः तादृशरूपमन्तरेण लक्षणस्यासम्भवितया तदेव रूपं लक्षणमाह केवलेति तादृशावच्छिन्नः पक्षः सन्दिग्धसाध्यकोयस्याश्रयः स तथा तथाच केवलान्वयिधर्म्मावच्छिन्नसाध्यसन्देहविषयवृत्तित्वमनुपसंहारित्वं व्यतिरेक्यादौ केवलान्वयी न साध्यसन्देहविषयतावच्छेदकः साध्यवत्तानिश्चयसामान्यविरोधिसंशयविषयवृत्तित्वं वा तत्त्वं धर्म्मिविशेषनियन्त्रितस्तु सन्देहो नान्यधर्म्मिकनिश्चयविरोधी साध्यसन्देहविषयताव्याप्य साध्यसिद्ध्यनुकूलव्याप्तिग्रहोपयिकसत्ताकत्वं वा तादृशी च सत्ता अन्वये हेतोर्व्यतिरेके च तदभावस्येति न कश्चिद्विशेषः स्वरूपसत्तादृशसंशयविषये च हेतुमत्ताज्ञानं हेतौ साध्यसामानाधिकरण्यं संशयसामग्रीत्वेन तन्निश्चयप्रतिबन्धकं सर्वत्र संशयसामग्र्या निश्चयप्रतिबन्धकत्वकल्पनात् हेतुमति सर्वत्रसाध्याभावसन्देहे हेतौ साध्यसामानाधिकरण्याभावसंशयस्यौचित्यावर्जितत्वात् साध्याभावेन साध्यसामानाधिकरण्याभावोपस्थापनादिति तन्न सर्वत्र साध्यसन्देहदशायां क्वचिदपि साध्यसामानाधिकरण्यस्याग्रहीतत्वेन तदभावस्य ग्रहीतुमशक्यत्वात् प्रतियोगितावच्छेदकविशिष्टप्रतियोगिनिश्चयस्याभावधीहेतुताया असकृदावेदितत्वात् अस्तु वा स यथाकथञ्चित् साध्ये

हेतुसामानाधिकरण्याभावसंशयहेतुत्वेन वा तथात्वं न तथापि सामग्रीत्वेन प्रतिबन्धकतया हेत्वाभासत्वम् अन्यथा व्यभिचरिता-व्यभिचरितसमानासमानाधिकरणव्याप्याव्याप्यपक्षधर्मापक्षधर्मादिसाधनवत्त्विःसाधनादिसाधारणद्रव्यत्वादिमत्त्वं हेतोः पक्षस्य चाभासान्तरं स्यात् तदुपदर्शितस्यैव तस्यापि ज्ञानस्येतरसाचिव्येन तत्तन्निश्चायविरोधिसंशयसामग्रीत्वात् एवमसिद्धादिनिश्चायकप्रत्यक्षसामग्र्यपि अपि च हेतोः साध्याभावसन्देहविषयमात्रवृत्तित्वं दूषणमिति प्राप्तं तच्च व्यतिरेकिणि हेतौ नियतविषयेणापि सन्देहेन सम्पद्यते दूषकतावीजसत्त्वे चासाधारण्यादिसाधारण्यं न दोषाय न वा अत्रैव निर्भरः कत्तर्थो हेत्वाभासत्वानुपपत्तेरुक्तत्वादित्यलं पल्लवितेन।

व्याप्तिग्रहप्रतिबन्धलक्षणैकप्रयोजनकत्वेन साधारण्यादौ नामैकं हेत्वाभासत्वं साधारणेन व्यापकत्वस्याव्यभिचारित्वस्य वा असाधारणेन सामानाधिकरण्यस्यानुपसंहारिणा च व्यतिरेकव्याप्तिग्रहस्य प्रतिरोधात् लक्षणन्तु विशिष्टसाध्यसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया व्याप्तिग्रहविरोधितावच्छेदकं रूपं व्याप्तिश्चान्वयतो व्यतिरेकतश्च नानारूपा प्रातिस्विकरूपेण उपादाय तावदवगाही ग्रहो वाच्यः साध्यसाधनयोरप्रसिद्धेरसिद्धिभेदस्य वारणायाविरोधिन इत्यन्तं साध्यसाधनभेदेन व्यभिचारभेदाद्यत्र विशिष्टं साध्यं साधनं वाप्रसिद्धं तत्र तद्ग्रहविरोधित्वं नोपादेयम् एवमन्यत्रापि

शेषं हेत्वाभासलक्षणोक्तदिशावसेयम्। व्यर्थविशेषणत्वन्तु न व्याप्तिग्रहविरोधीति वक्ष्यते साध्याव्यभिचरितसामानाधिकरण्यविरहस्य वह्निभावनीयत्वे पुनरन्वयव्याप्तौ व्यापकत्वमव्यभिचरितत्वं वा सामानाधिकरण्यञ्च विशकलितं युगपदुपादेयं तत्र साधारणत्वं वर्णितम् असाधारणत्वन्तु सपक्षव्यावृत्तत्वं सपक्षश्च साध्यवान् तद्व्यावृत्तत्वन्तद्वृत्तित्वग्रहविरोधित्वं प्रकृतसाध्यसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया तदुभयसामानाधिकरण्यग्रहविरोधितावच्छेदकमिति तु निष्कर्षः। संगच्छते चेत्थं साध्यादेः साधनवदवृत्तित्वादिकम्। चाक्षुषस्पर्शवान् स्पार्शनशब्दवत्त्वादित्यादौ विशेष्ययोरसामानाधिकरण्यञ्च बाधासिद्धिभेदस्य च साध्यसाधनयोरवृत्तित्वस्यैव तत्साङ्कर्य्येऽपि न क्षतिः इदमेव च मणिकृतां विरुद्धत्वम् इत्यञ्च तदीयमसाधारणत्वमेवविरुद्धत्वमिति। यत्र च धर्म्मिणि योधर्म्मो यादृशो हेत्वाभासः तद्व्याप्यमपि तद्विशेषोऽन्तरेण प्रकरणसमन्तद्व्याप्यञ्च पृथगुपदेशादविरोधाच्च अनुपसंहारित्वञ्च विशिष्टसाध्यसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया व्यतिरेकव्याप्तिग्रहविरोधितावच्छेदकरूपवत्त्वं तादृशञ्च साधादेरत्यन्ताभावाप्रतियोगित्वादिकं वह्न्यभावाभावत्वेन वह्नेर्धूमाभाववद्वृत्तित्वज्ञानं वह्न्यभावस्य धूमाभावव्यापकताज्ञानं कदाचिद्विरुन्ध्यादपि नतु वह्नित्वेनेति नातिप्रसङ्गः केवलान्वयिनि तत्सम्भवेऽपि अन्वयव्याप्त्युपादानेनानुमितिप्रतिरोध इति दिक्।

साध्यविरोधित्वं साध्यप्रतियोगिकत्वम् एकदेशिमतेनाह अभावेत्यादि न च भावस्य स्वाभावविरहात्मकत्वरूपप्रतियोगित्वग्राहिधर्मिग्राहकमानबाधः प्रतियोगित्वस्य सम्बन्धान्तरत्वात् स्वस्याभावस्येत्यत्र षष्ठ्यर्थस्य तस्यावश्याभ्युपेयत्वात् विरहत्वञ्च नाभावत्वं बाधात् नापि तद्ग्रहप्रतिबन्धकग्रहविषयत्वम् अविरोधात् प्रत्यक्षेण दुर्ग्रहत्वाच्च न चानवस्था अभावस्य स्वाभावाभावत्वे बाधकाभावात्। भावस्य तथात्वे बाधकमाह बाधकं विनेत्यादि अभावप्रतीतेः अभावत्वविशिष्टप्रतीतेः अभावत्वञ्च न भावभिन्नत्वं प्रथमं दुर्ग्रहत्वात् किन्त्वयमभावो न भाव इति प्रतीतिसाक्षिकं पदार्थान्तरं तच्चानुपस्थितं निर्विकल्पकोपस्थितं वा प्रकारः अभाववृत्त्यसमवेतत्वान्न जातिः। अन्यथेति अनतिप्रसक्तैरधिकरणैस्तद्धर्मैर्वा अभावव्यवहारोपपत्तेरिति भावः लाघवादबाधिताभावत्वविशिष्टप्रत्ययबलाच्चातिरिक्ताभावसिद्धिस्तुल्यैव एतेनाभावत्वं सप्रतियोगिकत्वं तच्चाननुगतानामप्यावश्यकानां प्रतियोगिनां कल्प्यते इत्यपास्तं संयोगादिसाधारण्याच्च। गमकत्वभ्रमेति व्यभिचारिण्यव्यभिचारमाले विरुद्धे च सामानाधिकरण्यांशेऽपि भ्रम इति। अशक्तौ विशेष इति दूषकतायामविशेषेऽपि निग्रहस्थानत्वेन विशेषाद्भेदेनोपन्यासः अतएवानैकान्तिकसामान्यलक्षणे साधारणलक्षणे च विरोधवारकं विशेषणं छलजात्योर्निग्रहस्थानविशेषनिरनुयोज्यानुयोगविशेषत्ववदेतस्या नैकान्तिकविशेषसाधारणविशेषत्वेऽ-

प्यदोषोवेति पुनराकरानुसारी पन्थाः। नापीत्यादि व्यापकत्वं व्याप्यव्यापकसामानाधिकरण्यघटितं न वा आद्ये साध्याभावस्येति द्वितीये तु नाभासत्वमविरोधात्। साध्ये-त्यादि हेत्वभावस्य साध्यवन्निष्ठाभावाप्रतियोगित्वज्ञानं वस्तुतस्तत्प्रतियोगिकाभावस्य हेतोः साध्यसामानाधिकरण्य-ग्रहं विरुणद्धीत्यभिप्रायेणेदम्। यदि च तदभावाभावत्वे-नासामानाधिकरण्यग्रहेऽपि तत्त्वेन सामानाधिकरण्यग्रहो न विरुध्यत इति भाव्यते तदाह यद्वेत्यादि। वृत्तिमत इति धर्मेति च पक्षधर्म्मत्वाविरोधित्वप्रदर्शकं न तु विशेषकं दूषकतायामनुपयोगादव्याप्तिकरत्वाच्च वृत्तिविशेषसूचनाय वा तत् तेन समवायेन हेतुतायां धूमेनाव्याप्तिः आद्ययोः साध्यवद्वृत्तित्वतदधिकरणत्वाभावौ चरमयोश्च साध्यवद्वृ-त्तितत्त्वाधिकरणभेदावर्थाविति भेदः। ज्ञानातिप्रसक्तिं निरस्यति न चेत्यादिना। तेनेत्यादि साध्याभाववद्धर्मि-त्वज्ञानं विना वृत्तिमत्त्वविशिष्टसाध्यवद्वृत्तित्वज्ञानापर्य्यव-सानादित्यर्थः। असहचारेति सहचारः सामानाधिकरण्यं व्यभिचारेति व्यभिचारो न ज्ञायते यस्मात्तद्व्यभिचाराज्ञान-मव्यभिचारज्ञानं तदयमर्थः अव्यभिचरितसामानाधिकरण्य-रूपाया व्याप्तेरव्यभिचारांशग्रहविरोधिग्रहविषयतया यथा व्यभिचारो हेत्वाभासस्तथा सामानाधिकरण्यांशग्रहविरोधि-ग्रहविषयतया विरोधोऽपीति सचायं विरुद्धो हेतुः। साध्याभा-वेति तदभावत्वं तद्वृत्ताग्रहविरोध्यभावत्वं तेन साध्यवदन्यत्व-

व्याप्यत्वोपसंग्रहः एवमुत्तरत्रापि। साधाव्यापकेति अत्र व्याप्यपदं स्वरूपपरम्। साधेत्यादि साधव्यापकसामानाधिकरण्यग्रहविरोधिरूपवत्त्वादित्यर्थः तेन साधव्यापकवदवृत्तित्वाद्युपसंग्रहः सर्वत्र चोपलम्भपदं स्वरूपसिद्धिमात्रफलकम्। साधाभावेति व्याप्यपदव्यत्यासेन साधाभावव्याप्यत्वेन साधाव्यापकाभावत्वेन चेत्यर्थः। स्वसमानेति तथाच साधाभावसाधव्यापकाभावयोर्निरुक्तसाधव्यापकाभावत्वेनानुगमान्नाधिक्यमित्यर्थः प्रतियोग्युपलम्भात् स्वरूपतः साधवत्त्वग्रहविरोधित्वात् तेन निर्वह्निकान्यत्वादिसंग्रहः। साधव्यापकेति अत्र व्यापकत्वं भेदाभेदसाधारणं तेन साधाभावव्याप्यत्वसंग्रहः। धूमवत्त्वादिति धूमाभावस्य वह्न्यभावव्यापकत्वग्रहदशायामस्य मधामेऽन्तर्भावो वह्न्यभावव्यापकवह्निसामग्र्यभावाभावव्याप्यत्वग्रहे च चरमे। इदं पुनरिहावधेयम्। कथितरूपाणि किं स्वरूपतो ज्ञातान्येव सामानाधिकरण्यग्रहविरोधीनि असामानाधिकरण्यव्याप्यत्वेन वा नाद्यो व्यापकाभावव्याप्यत्वादेस्तदसम्भवात् न द्वितीयः साधाभावत्वसाधाभावव्याप्यत्वयोः स्वरूपेणैव ज्ञातयोस्तथात्वात् तथात्वेऽपि तत्त्वमविरुद्धत्वमिति चेत् हन्तैवमसामानाधिकरण्यस्य समानाधिकरणावृत्तितत्तद्धर्म्माणाञ्च तथात्वादाधिक्यं न च एतानि धर्म्मिविभाजकान्येव सर्वेषामेव साधाभावव्याप्यत्वेनैकविधत्वादिति विरोधोन्नायकप्रकारत्वैविध्येन धर्म्मिणोऽपि त्रैविध्याभिधानमितिवदन्ति।

अयञ्चेत्यादि बाधस्वरूपासिद्ध्यन्यतरसङ्करस्तु आवश्यकोऽन्य-सङ्करस्तु क्वाचित्को ज्ञानासङ्कराच्च पार्थक्यम्।

एकत्र तदुभय इति व्याप्ये पक्षधर्म्मतायाः पक्षधर्मे च व्याप्यत्वस्यारोपः प्रत्येकमव्यापकोऽतो विशिष्टस्यारोपो वाच्यः स चैकधर्मिणि विरोधिव्याप्यद्वयविरहादिविशिष्टस्याप्रसिद्ध्या न सम्भवतीत्यर्थः। विरुद्धादौ साधने स्वव्यापकसामानाधिकरण्यरूपव्याप्तेरप्रसिद्धेरित्यपि द्रष्टव्यम्। एकत्र भङ्गेति तथाचान्यतरत्वेन तदवधारणमस्तीति भावः सत्प्रतिपक्षित-व्यवहारो हि सत्यसति वा साधने नापरामृश्यमाने नाप्यविद्यमानविरोधिपरामर्शे अतएव सन् प्रतिपक्षो विरोधिव्याप्यादिमत्तया परामृश्यमानो हेतुः विरोधिपरामर्शो वा यस्य परामृश्यमानस्य हेतोरसौ सत्प्रतिपक्ष इति विग्रहमपि वर्णयन्ति अतस्तदनुसारेणैव व्यवहारौपयिकं लक्षणमाह साध्येति बाधाश्रयासिद्धिनिर्णयवारणाय समर्थान्तं न चासौ न व्याप्तिपक्षधर्म्मतात्मकबलोपस्थितिरिति वाच्यं व्याप्तिपक्षधर्म्मताविरहस्य साध्यत्वे पक्षतावच्छेदकत्वे वा तत्सम्भवात् पक्षः साध्याभावव्याप्यवान् साध्यं पक्षवृत्तित्वाभावव्याप्यवदिति पक्षस्य व्यापकभेदेन च अन्वयव्यतिरेकभेदेन च व्याप्तेश्च भिन्नत्वादेकोपादानेऽन्यसंग्रहेण बलस्याविवक्षितत्वाच्च साध्याधीविरोधानुमितिजनकज्ञानविषयत्वेन तदुपादाय तदुपस्थित्यभिधानञ्च शिरोवेष्टनेन नासिकास्पर्श-मनुधावति साध्यस्य साध्यसिद्धेर्विरोधिन्याः पक्षो न साध्य-

वानित्याद्युपस्थितेः साध्यविरोधी साध्यवत्ताज्ञानप्रतिबन्धकज्ञानविषयो बाधः साध्याभावादिमत्पक्षादिस्तदुपस्थितेर्वा जननयोग्यया समानया बलोपस्थित्या तथाविधव्याप्यादिबुद्ध्या प्रतिरुद्धं कार्य्यं यस्य तादृशलिङ्गत्वमित्यर्थः विरोधिव्याप्यादिविषयत्वलक्षणयोग्यताशालिन्या अप्युपस्थितेरप्रामाण्यग्रहे सत्प्रतिपक्षत्वासम्पादकत्वात् कार्य्यप्रतिरोधानुधावनं समानत्वञ्चागृहीताप्रामाण्यकसाध्यसिद्ध्यौपयिकपरामर्श-कालीनत्वम् असति गृहीताप्रामाण्यके वा परामर्शे सत्प्रतिपक्षितत्वव्यवहारविरहात् । यत्तु प्रामाण्यनिर्णयेनाधिकबलतया बाधकस्य विरोधिपरामर्शस्य वारणाय समानेति तदसद्व्यभिचारेण प्रामाण्यग्रहस्याबलत्वात् अन्यताप्रामाण्यग्रहानुकूलत्वेनैव क्वचित्तदुपयोगात् बलपदोपमन्दानार्थोक्तफलाभावात् तद्वैयर्थ्यं लिङ्गपदोपादानाच्च स्वीयलिङ्गतौपयिकपरामर्शलाभादात्मादेर्व्युदासः विरोधिपरामर्शप्रतिरुद्धकार्य्यकविशिष्टपरामर्शविषयत्वन्तु फलितार्थः । अगृहीताप्रामाण्यकत्वमस्खलितयोग्यतोपादाने तु बाधोपस्थितिसमर्थपरामर्शकालीनसाध्यसिद्धिसमर्थपरामर्शविषयत्वं वाच्यं तच्च यदि चायं वह्निव्याप्यवान् वह्न्यभावव्याप्यव्याप्यवांश्चेति परामर्शादयं वह्निमान् वह्न्यभावव्याप्यवांश्चेत्यनुमितिः प्रामाणिकी न तु सत्प्रतिपक्षत्वं तदा कार्य्यप्रतिरोधोऽवश्यमुपादेयोऽजनितविरोधिबोधकत्वेन च विरोधिपरामर्शविशेषणीयः अतएवाग्रिमलक्षणे विरोधिबोधकान्येति फलतो ज्ञानविशेषणं एकस्याप्रामाण्यग्रहेणापरेणानु-

मितिजननात् तद्द्वारणाय वा तत्प्रतिरुद्धकार्य्यत्वञ्च प्रतिरुद्ध-कार्य्यपरामर्शविषयत्वम्। एकदेत्यादि। न च द्वितीयस्य परा-मर्शस्योत्पादनसमये पूर्व्वेणानुमितिजननात् कथं नैरन्तर्य्य-मिति वाच्यं साधकमानादिवशेन क्षणमनुमित्यनुत्पादसम्भ-वात्। स्वपरेति अयं भावः न खलु सम्भवन्तः सर्व एव हेत्वा-भासाः समुद्भाव्याः आधिक्यप्रसङ्गात् परन्तु यथाकालमेकः तथाच प्रतिपक्षोद्भावनेऽपि नाप्रतिषेधमात्रेण व्याप्त्यादाभ्यु-पगम इति। प्रतिरुद्धत्वेति प्रतिरोधप्रयोजकविरोधिव्या-प्त्यादीत्यर्थः। उभयोरिति परस्पराभावव्याप्यत्वं हि हेत्वो-र्विरोधः तद्ग्रहे च तयोरेकत्र निर्णयो न विरुध्यते इति भावः। दूषकतेति विरोधिपरामर्शसत्त्वे नियमेन परामर्शा-न्तरादनुमित्यनुत्पादः तस्यानुमितिविरोधित्वं कल्पयति ननु तेन ज्ञाप्यमानस्य व्याप्त्यादिविरहस्य सद्भूतावपि तस्या-नुमितिविरोधित्वादित्यर्थः। व्याप्त्यादिविरहज्ञानद्वारा अस्य दूषकत्वमाह एकत्रेति वाकारोऽनास्थायां प्राथमिकावश्यका-नुमितिप्रतिरोधेनैव तथात्वात् परमुखनिरीक्षकत्वेन तद्विषय-स्याभासत्वायोगाच्चेति। ननु विरोधि परामर्शो यदि विप-रीतनिर्णयविरोधी कथं तर्हि सति विशेषदर्शने नयना-दिजन्मा पीतत्वादिभ्रम इत्यत आह चक्षुरादेश्चेति चस्त्वर्थः। अथ व्याप्तिपक्षधर्म्मते यदि बलं कथं तर्हि प्रत्यक्षादेः प्रति-रोधकतया कथायामुपन्यास इत्यत आह प्रत्यक्षादेरिति। अत्र हेतुमाह कथायामिति प्रत्यक्षस्य स्वरूपसत्तयैव विरो-

धकत्वात् विरोधिवाक्यमात्रस्यानुमित्यविरोधित्वात् बोध्याभावव्याप्यवत्तानिर्णयेनैव शाब्दादिबोधप्रतिरोधाच्चेति। रत्नकोषकृतामयमभिप्रायः एकधर्मिकाविरुद्धानेकप्रकारक नानाधर्मिकविरुद्धाविरुद्धनानाप्रकारकज्ञानत्वादिवदेकधर्मिकविरुद्धानेकप्रकारकज्ञानत्वरूपं संशयत्वं न जन्यतावच्छेदकं तत्तद्धर्मिकतत्तत्प्रकारकज्ञानत्वप्रयोजकसमाजप्रयोज्यत्वात् समाजस्य क्वचिद्विरोधमानस्यापि तत्प्रयोजकाधीनत्वात् नीलेतरघटत्वपटत्वाप्रकारकज्ञानत्वैकधर्मिकाविरुद्धानेकप्रकारकान्यज्ञानत्वादिवत् संशयान्यज्ञानत्वादिरूपं निश्चयत्वमपि न जन्यतावच्छेदकं तत्त्वप्रयोजकविरहादेव तत्त्वविरहाद्युपपत्तेः एवञ्च तुल्यबलाभ्यां विरुद्धोभयसामग्रीभ्यां जायमानं ज्ञानमर्थात् संशयरूपं भवति अतएवाहत्यैव विप्रतिपत्तिजन्मानं संशयमामनन्ति फलबलकल्प्यजीयस्त्वं न्यूनाधिकगमकलाभावः सत्यामपि पीतत्वशुक्लत्वस्मृतौ सविधवर्त्तिनि शङ्खे सति दोषविशेषे पीतत्वस्यैवासति च शुक्लत्वस्यैव दूरस्थे च धर्मिणि असति विशेषदर्शने स्मृतयोरेव कोट्योः सति च एकस्या एव नयनेन ग्रहात् अथर्वमुद्भूताभ्यां विरोधिसंस्काराभ्यां स्मरणमपि संशयात्मकं स्यात् किं न स्याद्यदि च नानुभवबाधः येन गुरुणापि निश्चयत्वेन संस्कारजनकत्वमुपेयते भवता अथ विरोधिनो निर्णयोऽनुमितिप्रतिबन्धको विरोधित्वञ्च सहानवस्थायित्वं साध्याभावस्यैव तद्व्याप्यस्यापीति चेत् यदि वस्तुतो विरोधिनो निर्णयस्तथा कथं तर्हि पक्षतावच्छेदका-

देस्तादृशस्य निश्चये भ्रमानुमितिः अथ विरोधित्वेन तदा तदग्रहे नेह साध्यमित्यादिनिर्णयेऽप्यनुमितिप्रसङ्गः अथ विशेषदर्शनं विरोधिबुद्धिप्रतिबन्धकं कथमन्यथा तदनन्तरं न भ्रमसंशयाविति चेन्न सत्यपि शुक्लत्वादिव्याप्यदर्शने शङ्खादौ दुष्टेन नयनेन पीतत्वादेरदुष्टेन च पीतत्वादिव्याप्यवत्तानिश्चये सत्यपि शुक्लत्वादेर्ग्रहात् सति च विशेषदर्शने क्वचिदुपनीतभानानुदयात् रतः प्रमितस्य स्थाणुत्वादेः शाखादौ करादिभ्रमेणाग्रहात् तत्तत्स्थलविशेष एव तस्य प्रतिबन्धकत्वमिति । अत्राहुः अनुगतकार्य्यकारणभावानुरोधात् दोषविशेषाद्यजन्ये ज्ञाने कदाचिदनुभवे वा विशेषदर्शनं विरोधि कल्प्यते न च प्रत्यक्ष एव तथा सामान्ये बाधकाभावात् बोध्याभावव्याप्यवत्तानिश्चयेन शाब्दादिधीप्रतिबन्धाच्च अथ विशेषान्तरदर्शनविरहविशिष्टमेव तत्तथा अन्यथा कोटिद्वयविशेषदर्शने संशयो न स्यादिति चेन्न भवत्येव ताव यावदप्रामाण्यं न गृह्यते अगृहीताप्रामाण्यस्यैव विशेषदर्शनस्य विरोधित्वादिति । विरुद्धस्येति साध्याभावव्याप्यस्येत्यर्थः । बाध इति हेतौ प्रकृतेऽन्यत्र वा अपक्षधर्मे च पक्षधर्मताबाध इति शेषो वा तथाच हेतौ व्याप्तिपक्षधर्म्मतान्यतरभङ्ग इत्यर्थः । प्रकृतेति प्रकृतसाध्ययोर्यौ हेतू तयोरित्यर्थः । संशयादिति जन्यदुःखोत्सारणरूपेष्टसाधनताज्ञानात् अन्यत्र चेष्टान्तरसाधनताज्ञानाज्ज्ञानेच्छेति भेदेन विकल्पोपन्यासः । असतीत्यादि हेतुसमीचीनत्वासमीचीनत्वसंशयजन्य-

दुःखाभावरूपेष्टसाधनताज्ञानद्वारेण जिज्ञासोपयोगित्वादित्यर्थः उत्पत्तिकाले उत्पत्तिपूर्वकाले व्याप्तिपक्षधर्म्मताज्ञानयोरुत्पादकत्वानियमादुभयोर्नाशकत्वमुक्तम् उत्पत्तावेव वा तयोरन्वयः यत्र च व्याप्तिपक्षधर्म्मतयोः समूहालम्बनं तत्र द्वितीयपरामर्शोत्पत्तिकाल एव प्रथमपरामर्शनाशः स्वस्य निरुक्तसत्प्रतिपक्षितत्वस्य। जात्यन्येति सत्ता कम्बुग्रीवादिमत्त्वादावेकैकस्य व्यभिचाराद्विशिष्टोपादानम्। घटनिष्ठेति घटनिष्ठात्यन्ताभावत्वेन सामान्यतः पक्षत्वान्न बाधाश्रयासिद्धी। नन्वाद्यस्य समवेतत्वादौ द्वितीयस्य घटाभावादौ व्यभिचार इत्यत आह विशेषादर्शनेति वस्तुतो घटो नाभिधेयः कम्बुग्रीवादिमत्त्वादित्यादि व्यतिरेकिणा सत्प्रतिपक्षः सम्भवत्येव व्यापकाभावेनाप्रसिद्धस्यापि व्याप्याभावस्य सिद्धाभ्युपगमात् प्रत्येकपदार्थप्रसिद्धौ तादृशप्रतिज्ञाद्युपपत्तेर्विशिष्टस्य वाक्यार्थत्वात् सत्प्रतिपक्षस्तु साध्याभावव्याप्यवान् साध्यवदन्यत्वव्याप्यवांश्च पक्षः पक्षनिष्ठौ साध्याभावसाध्यवद्भेदव्याप्यौ इत्येवमादिः प्रत्येकमेव विभाजकन्तु प्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधित्वे सति प्रकृतपक्षसाध्यग्रहाविरोधिप्रकृतपक्षसाध्यवैशिष्ट्यग्रहविरोधिरूपोन्नायकत्वं तदुन्नायकत्वञ्च यादृशविशिष्टविषयत्वेन परामर्शस्यानुमितिजनकत्वं तत्त्वं तच्च साध्याभावव्याप्यवत्पक्षादिकम् असाधारणविरोधयोरन्यतरस्य प्रतिपक्षविधया दोषत्वपक्षे प्रकृतसाधने प्रकृतसाध्यव्यापकाभावप्रतियोगित्वाद्यनवगाही परामर्शो ग्राह्यः

अत्र सत्यन्तेन सत्प्रतिपक्षोन्नायकस्य अविरोध्यन्तेनाश्रयासिद्धाद्युन्नायकस्य विरोध्यन्तेन वह्निव्याप्याभावे साध्ये वह्निव्याप्यवत्पक्षात्मकस्य बाधस्य व्युदासः संगृह्यते चानेन काञ्चनमयवह्निमानित्यादौ वह्न्याद्यभावव्याप्यह्रदत्वादिमान् पक्ष इति। सत्प्रतिपक्षे च यथासिद्धान्तं पञ्चावयवादिप्रयोगमिच्छन्ति अयं हेतुः साध्यव्यभिचारवानित्यादिवदयं पक्षः साध्याभावव्याप्यवानित्यादिकमुद्भावनं पुनरुचितं प्रातिभाति। वस्तुत इत्याद्यभ्युच्चयमात्रं विशिष्टपरामर्शविरोधित्वेन विशिष्टाभावस्य दोषताया दुर्वारत्वात् प्रत्येकाभावमज्ञात्वापि शब्दादिना शक्यग्रहत्वात् व्यर्थविशेषणत्वस्य चासाधकतासाधन एव सम्भाव्यत्वात् न वा तदपि तादृशाभावनिष्ठव्याप्तेर्द्धर्म्मान्तरेणावच्छेत्तुमशक्यत्वात् विशेष्यादिप्रतियोगिकत्वमात्रस्य व्यभिचारिसाधारणत्वादिति। व्यभिचारादेरिति सद्धेतौ सद्धेतुत्वेन ज्ञायमाने तदानीं सिद्धेरप्रतिबन्धेऽपि कालान्तरगृहीतेन व्यभिचारादिना तदानीन्तनाभासत्वं सुग्रहमिति तु ध्येयम्। तेन रूपेण तत्साधारणरूपेण। वह्न्यभावेनेति वह्न्यभावस्तु न प्रतिबन्धकः कारणीभूतो योऽभावस्तत्प्रतियोगिनएव तथात्वात् यदभावत्वेन कारणत्वं तदेव तथेत्यपि कश्चित्। परामर्शेत्यादि। ननु परामर्शविषयाभावत्वमनाभासे आभासत्वविशेषितमपि बाधविशेषे परामर्शविरोधित्वविशेषितञ्च हेतोः साध्यासामानाधिकरण्ये ति प्रसक्तम् अप्रसक्तञ्च साधनाद्यभाववत्पक्षादौ पक्षादे

साधनवदन्यत्वादौ साधनादेः पक्षादिवृत्त्यन्यत्वपक्षनिष्ठाभाव-प्रतियोगित्वादौ अतएव यस्य यद्धर्म्मवत्त्वं परामर्शविषयस्तस्य तदभाववत्त्वं तदिति शब्दमात्रानुगतं प्रत्युक्तं परामर्शविरोधित्वमात्रञ्च सव्यभिचारेऽतिप्रसक्तं न च तदन्यत्वेन विशेषणीयं नित्यो घटो द्रव्यं प्रमेयो वा जलत्वादित्यादौ तदर्थाप्रसिद्धेः। अथ पक्षतावच्छेदकरूपेण पक्षे हेतुतावच्छेदकरूपेण हेतोर्यद्विशिष्टज्ञानं साध्यतावच्छेदकविशिष्टसाध्यावगाहितद्विरोधित्वं तदिति चेन्न पक्षवृत्तित्वविशिष्टसाध्याव्यभिचरितसामानाधिकरण्याद्यभावाव्याप्तेः। न च विशिष्टपक्षविशिष्टसाधनवैशिष्ट्यविशिष्टसाध्यग्रहाविरोधि यद्व्याप्तिग्रहविरोधि तदन्यत्वे सति परामर्शविरोधित्वं तत् विशिष्टपक्षवैशिष्ट्योपादानाद्वह्निमान् वह्निमान् जलह्रदत्वादित्यादौ व्याप्तिग्रहविरोधिन्या अपि स्वरूपासिद्धेर्नासंग्रह इति वाच्यं जलह्रदो वह्निमान् काञ्चनमयवह्निमान् वा धूमात् काञ्चनमयधूमाद्वेत्यादौ व्याप्तिग्रहविरोधिनस्तादृशग्रहाविरोधिनो रूपस्याप्रसिद्धेः। उच्यते [१] साधारण-

(१) जागदीशसम्प्रदायिकः पाठः।

भवानन्दादिसम्मतस्तु।

साधारण्यासाधारण्यभिन्नं तज्ज्ञानस्य विषयतापरामर्शविरोधितावच्छेदकरूपमसिद्धिः। वह्न्यव्यभिचारिमेयत्ववान् वह्निसमानाधिकरणह्रदत्ववान् वा पर्वतो वह्निमान् मेयत्वात् ह्रदत्वाद्वेत्यादौ

कथितासाधारण्यानुपसंहारित्वभिन्नं ज्ञानस्य विषयतया परामर्शविरोधितावच्छेदकं रूपमसिद्धिः यत्र साधारण्यादिकमप्रसिद्धं यत्र च वह्न्यव्यभिचारिमेयत्ववान् वह्निसमानाधिकरणह्रदत्ववान् वह्न्यभावव्यापकीभूताभावप्रतियोगिह्रदत्ववान् वा पर्वतो वह्निमान् मेयत्वात् ह्रदत्वादित्यादौ साधारण्यादिकमप्रसिद्धं तत्र तदन्यत्वं नोपादेयं शब्दानुगमस्याकिञ्चित्करत्वात् परामर्शे च व्याप्तिव्यतिरेकतोऽप्युपा-

---

आश्रयासिद्धिविरहेऽपि न क्षतिः असिद्धित्रयस्यासार्वत्रिकत्वात् आश्रयासिद्धिलक्षणस्य चासिद्धिघटितत्वान्नातिप्रसङ्गः। प्रकृतपक्षाप्रविष्टाभावकसाधारण्यादिभिन्नं वा वक्तव्यम्। परामर्शे चान्वयव्याप्तिरुपादेया तेनानुपसंहारित्वव्युदासः साध्यसाधनभेदेनासिद्धिभेदात् यत्र साधारण्यादिकमप्रसिद्धं तत्र तदन्यत्वं नोपादेयं यथा काञ्चनमयः पर्वतो ह्रदो वा वह्निमान् मेयो वा धूमात् मेयत्वादित्यादौ पर्वतान्यः पर्वतो दहनान्यदहनवान् धूमान्यधूमादित्याद्यसिद्धिसम्पादनाय हेत्वाभासलक्षणेऽक्तरीतिरनुसरणीया। तत्र विशिष्टपक्षग्रहस्य विरोधिन्यसिद्धिर्विरोधिरूपं वाश्रयासिद्धिः प्रकृतपक्षप्रकृतहेतुग्रहाविरोधिनो ज्ञानस्य विषयतया तदुभयविशिष्टग्रहविरोधितावच्छेदकं स्वरूपासिद्धिः संगृह्यते चानेनानित्यं गगनं रूपवत् चाक्षुषस्पर्शाश्रयत्वादित्यादौ निस्पर्शादिकम् एवं शब्दो द्रव्यं गुणान्यत्वे सति सत्त्वात् गुणान्यत्वविशिष्टसत्त्वं द्रव्यत्वव्यभिचारिगुणवृत्तित्वादित्यादावपि नाव्याप्तिः तदुभयभिन्नासिद्धिर्व्याप्यत्वासिद्धिः पक्षादिभेदेनासिद्धिभेदात् यत्राश्रयासिद्ध्यादिकमप्रसिद्धं तत्र तदन्यत्वं न वक्तव्यमिति।

देया नातो व्यतिरेकव्याप्तिविशिष्टपक्षधर्मत्वाभावादावव्याप्तिः साधारण्याद्यनिरूपितया ज्ञानस्य विषयितया परामर्शविरोधितावच्छेदकरूपं वा असिद्धिः अतएव द्रव्यत्वाव्यभिचारिगुणद्रव्योभयसमवेतवान् द्रव्यत्वसमानाधिकरणगुणसमवेतकर्म्मासमवेतवान् वा घटो द्रव्यं सत्त्वात् द्रव्यकर्म्मासमवेतसमवेताद्वेत्यादौ गुणद्रव्योभयसमवेतादिनिष्ठस्य द्रव्यत्वव्यभिचारित्वादेः सत्तादिनिष्ठद्रव्यत्वव्यभिचारित्वाद्यात्मकसाधारण्यादितोऽनतिरिक्तत्वेऽपि न क्षतिः पर्वतान्यः पर्वतो दहनान्यदहनवान् धूमान्यधूमादित्यादावसिद्धिसम्पादनाय हेत्वाभासोक्ता रीतिरनुसर्त्तव्या तत्र ज्ञानस्य विषयतया विशिष्टपक्षग्रहविरोधितावच्छेदकं रूपमाश्रयासिद्धिः। विशिष्टपक्षविशिष्टसाधनग्रहाविरोधिनो ज्ञानस्य विषयतया तदुभयवैशिष्ट्यग्रहविरोधितावच्छेदकं स्वरूपासिद्धिः। संगृह्यते चेत्थमनित्यगमनं रूपवत् चाक्षुषस्पर्शवत्त्वादित्यादौ गगनादेर्निस्पर्शत्वादिकम्। तदुभयभिन्नासिद्धिर्व्याप्यत्वासिद्धिः। पक्षादिभेदेनासिद्धेर्भेदाद्यत्राश्रयासिद्ध्यादिकमप्रसिद्धं तत्र तदन्यत्वं न वक्तव्यमिति"। सविषयवृत्तिप्रकृतसाध्यसाधनग्रहविरोधितानवच्छेदकप्रकृतपक्षप्रकृतसाधनवैशिष्ट्यग्रहविरोधितावच्छेदकरूपस्य शून्यज्ञानस्य विषयोऽसिद्धिर्व्याप्यत्वासिद्धिः साध्यपदोपादानात् पर्वतः पर्वतवृत्तिह्रदत्ववान् ह्रदत्वादित्यादौ साध्याप्रसिद्धेर्नासंग्रहः तस्याः स्वरूपासिद्धौ निवेशादनुपादेयमेव वा साध्यमित्यपि कश्चित्। साध्यत्वे

त्वप्रसिद्धिव्याप्तिविशिष्टपक्षधर्म्मतादि विरहादयश्चैतद्भेदाः । यत्तु हेतुतावच्छेदकस्य व्याप्यतानवच्छेदकत्वम् अपि व्याप्यत्वासिद्धिः नीलधूमत्वादेश्च तथात्वं समानाधिकरणं सम्भवदवच्छेदकान्तरमपेक्ष्य गुरुत्वादिति अत्रावच्छेदकत्वं यद्यनतिरिक्तवृत्तित्वं तदा तस्याप्यस्ति। अथ तादृशेन समानाधिकरणेन तादृशेन वा धर्म्मान्तरेणाघटितत्वे सति तत्त्वं तत्र सत्यन्तस्य गौरवेणानुपादेयत्वात् नापि अन्यूनानतिरिक्तवृत्तित्वम् आलोकाद्यवृत्तेर्धूमत्वादेरप्यतथात्वापातात् । अथ स्वरूपसम्बन्धविशेषः तर्हि द्रव्यं रूपादित्यादौ रूपत्वादेरपि तथात्वं न स्यात् रूपादिषु चतुर्विंशतौ सम्भवदवच्छेदकमेकं गुणत्वमपेक्ष्य रूपत्वादीनां चतुर्विंशतेः षड्विंशतेर्वा गुरुत्वात् एवं पशुमान् सास्नादिमत इत्यादौ सास्नादिमत्त्वादेरपि गोत्वादिकां जातिमपेक्ष्य उपाधेर्गुरुत्वात् हेतुतावच्छेदकविशिष्ट हेतुव्यापक साध्यसमानाधिकरणतादृशहेतोः साध्याव्यभिचरितसम्बन्धितादृशहेतोर्वा ज्ञानस्यानुमितिकारणस्याविरोधिनो निरुक्तानवच्छेदकत्वस्य दोषत्वायोगाच्च। परार्थस्थले तु दृष्टान्तस्य साध्यादिवैकल्यवत् हेतोर्व्यर्थविशेषणत्वमपि निग्रहस्थानविभाजकसूत्रस्थानुक्तसमुच्चयपरेण चकारेण समुच्चितं पृथगेव निग्रहस्थानम् ।

अतिरिक्तविषयतावादिमतेनाह पक्षेति पक्षः साध्याभाववानिति ज्ञाने पक्षनिष्ठविषयत्वस्य प्रकारः साध्याभाव इति लक्षणमन्वयः । विवक्षितेति हेत्वादिविषयत्वेनाप्रतिबन्धक-

त्वादिति भावः। साध्याभावप्रमात्वग्रहे पक्षे साध्याभाव वत्त्वग्रहस्यावश्यकत्वाभिप्रायेण साध्याभावस्य बाधत्ववादिमतेन वा शङ्कते अथेति पक्ष इति व्याप्तौ निश्चितायां पक्ष तत्समयोः साध्याभावसंशयो न दोषायेत्यर्थः। अनुमित्युत्पादेनेति फलतोऽपि विरोधित्वप्रदर्शनाय अतएव ज्यायः स्वरूपतो विरोधित्वं द्रढयति अन्यथेति। हेत्वाभासाधीनमिति न च हेत्वाभासस्यानुमित्याभासताप्रयोजकत्वे साध्यवति पक्षे लिङ्गाभास जन्याया अनुमितेराभासत्वापत्तिः लिङ्गोपधाने तथात्वस्येष्टत्वात् पक्षासिद्धिरित्यस्य बाधकमाननिबन्धनेत्यादिः लिङ्गस्येत्याद्यभ्युच्चयमात्रं वह्नेरपक्षत्वात् काञ्चनमयत्वस्यासाध्यत्वाच्च न च साध्याभाव इति अनुमितेः पूर्वं विशिष्टस्याप्रसिद्ध्या तदभावस्याज्ञानादिति भवतैवोक्तत्वादिति भावः। तथाचेत्यादि अधिकबलत्वेनाधिकरणरूपत्वेनापेक्षणीयोव्यभिचारनिश्चयः। साध्याभावनिश्चयेति साध्याभावो निश्चीयते येन प्रमाणनिश्चयेन तदधीनेत्यर्थः। अत्रेदं तत्त्वम्। साध्याभाववान् साध्यवदन्यो वा पक्षः पक्षावृत्तिसाध्यं पक्षे साध्याभावः पक्षनिष्ठसाध्याभाववत्त्वादिकं साध्यादेः पक्षावृत्तित्वादिकं साध्यवत् सामान्यादेः पक्षान्यत्वादिकं विशिष्टसाध्ये पक्षादेर्विशेष्याभाववत्त्वादिकं यथामतं पक्षे साध्यवत्ताज्ञानस्य साक्षाद्विरोधिप्रत्येकमेव बाधः तन्निश्चयश्च विरोधिनिश्चयत्वेन दोषविशेषाद्यजन्यज्ञानमात्र एव विरोधी अतएवानन्वयनिश्चयविरहो

योग्यतेत्याचार्याः । विभाजकन्तु प्रकृतपक्षप्रकृतसाध्यवैशि-ष्ट्यग्रहविरोध्यनुत्पादकत्वे प्रकृतपक्षप्रकृतसाध्यग्रहाविरोधित्वे च सति प्रकृतपक्षप्रकृतसाध्यवैशिष्ट्यग्रहविरोधित्वं पक्षादेः साध्यासमानाधिकरणधर्म्मवत्त्वादिकमपि बाध एव साध्या-भाववत्पक्षादिज्ञानप्रमात्वन्तु न बाधः तज्ज्ञानस्य पक्षादौ साध्याभावादेरनवगाहित्वे विरोधिविषयत्वाभावात् अव-गाहित्वे तु तद्विषयत्वेनैव प्रतिबन्धकत्वात् प्रमात्वनिश्चय-स्यान्यत्र प्रतिबन्धकत्वाकल्पनाच्च सर्वत्र निश्चयस्य हेतुत्वे प्रति-बन्धकत्वे च भ्रमत्वाग्रहः संशयसाधारणज्ञानमात्रस्य तथात्वे तु भ्रमत्वानिश्चयः प्रयोजकोऽन्यथाकाङ्क्षाकृतिसाध्यत्वादि-निश्चयहेतुप्रतिहेतुपरामर्शादीनां प्रमात्वनिश्चयो योग्यता व्यभिचारज्ञानादीनाञ्च प्रमात्वज्ञानं प्रयोजकौ भवेत् शङ्खादौ शुक्लत्वाभावभ्रमे च शुक्लत्वाद्यनुमितिर्न विना तद-प्रामाण्यग्रहं नहि स्वरूपसत्यपि बाधनिश्चये शाब्दमानसा-दिज्ञानमुत्पद्यते । अथ लाघवेन संशयसाधारणं संसृष्टत्वज्ञा-नमेव शाब्दानुमित्योः कारणम् आस्ताञ्च तस्यैव विरोधितया प्रकरणसमो बाधश्च हेत्वाभासोऽसिद्धिरिव परामर्शस्य विलो-पताञ्चाप्रसिद्धसाध्यकमनुमानमिति चेन्न संशयासत्त्वसमये परामर्शोत्पादे सिद्धिसिषाधयिषे विना अनुमित्यनुत्पाद-प्रसङ्गात् सति विशेषदर्शने संशयायोगादिति एतेन लाघवात् प्रमात्वेन निर्णीयमानं बाधज्ञानं विरोधीति परास्तम् ।

विपरीतमेव लाघवं स्फुटतरञ्च तद्भावसाध्य तत्र हि गोत्वाद्यप्रकारकं गोत्वाभावादिप्रकारकं ज्ञानं बाधनिश्चयः तथाच गोत्वादिमद्विशेष्यकगोत्वाद्यभावप्रकारकत्वज्ञाना-भावोभ्रमत्वग्रहविरहः बाधग्रहश्च पक्षे गोत्वाद्यप्रकारकं ज्ञानं तस्य च गोत्वादिमद्विशेष्यकगोत्वाद्यभावप्रकारकत्वा-द्यप्रकारकं गोत्वाद्यभाववद्विशेष्यकगोत्वाद्यभावप्रकारकत्वप्र-कारकज्ञानं प्रमात्वनिश्चय इत्युक्तप्रायञ्च तत्तत्कार्य्यं प्रति प्रतिबन्धकानां कारणानाञ्च प्रमात्वेन निश्चीयमानतया तथात्वापत्तिरिति। न च सति विशेषदर्शने विपरीतनिश्च-योऽकिञ्चित्करः तत्सत्त्वेऽपि विशेषदर्शनेन प्रत्यक्षोत्पादादिति वाच्यं विशेषदर्शनेन तन्नाशानन्तरमेव प्रत्यक्षोदयात् परेरपि क्वचित् प्रत्यक्षविशेष एव विपरीतनिश्चयविशेषस्यैव तथात्वो पगमाच्च। नहि शाब्दादिबोधेऽपि विशेषादर्शनविशिष्टत्वेन स विरोधी गौरवात् मानाभावाच्च। न वा चाक्षुषादिप्र त्यक्षे मानसादिविपरीतनिश्चयो विरोधी उपयुज्यते च क्वचि द्विशेषदर्शनमप्रामाण्यग्राहकत्वेन बाधबुद्धेः। नचैवं बाधा वतारदशायां पक्षे हेतोरग्रहेऽज्ञानलक्षणासिद्धिः ग्रहे च व्यभिचारधीरेवेति वाच्यं बाधग्रहपरामर्शयोर्भेदात् अभे-देऽपि पक्षः साध्यव्याप्यहेतुमान् साध्याभाववांश्च इति ग्रहस्य परस्परोपरागानवगाहिनोऽव्यभिचाराविषयत्वात् एकत्र व्य भिचाराव्यभिचारयोरेकनिश्चयागोचरत्वात् पूर्णे च करणे साक्षादनुमित्यविरोधिनो व्यभिचारज्ञानादेरकिञ्चित्करत्वात्

उक्तस्य साध्यादेः पक्षाद्यवृत्तित्वादिकमपि बाधः न च हेऽपि व्यभिचारबुद्धिरावश्यकी। यत्त्वनिश्चितप्रामाण्यस्य नस्यार्थनिश्चयरूपत्वे प्रामाण्यनिश्चयवैयर्थ्यमतिप्रसङ्गश्च त पक्षे साध्याभावज्ञानस्य निश्चयत्वसम्पत्तयेऽपेक्षणीयप्र मात्वनिश्चय एव प्रतिबन्धकः प्राथमिकत्वादुपजीव्य न तु चरमभावि तदधीनं व्यभिचारज्ञानमिति तत्तु तस्य प्रतिबन्धकत्वेनाक्लृप्तत्वाद्गृहीताप्रामाण्यकत्वे नैव वि यस्य स्वकार्य्यकारित्वात् अन्यथानवस्थानात् अप्रामाण्यग्र निवर्त्तकत्वेन च क्वचित् प्रामाण्यग्रहोपयोगात् संशयमा रणस्य व्यभिचारज्ञानस्य विरोधित्वाच्चेति यत्तूपनीतकाञ्च मयत्वविशिष्टवह्न्यनुमितिविरोधी व्यधिकरणकाञ्चनमयत्व च्छिन्नप्रतियोगिताकोवह्न्यभावो बाधः। न च विशिष्टसा प्रसिद्धा कथं तद्विशिष्टानुमितिर्विशिष्टे विशेषणमित्या न्यायेन तत्सम्भवात् शुद्धसाध्यव्याप्तिग्रहादेव चोपनयसह रेणाप्रसिद्धविशिष्टानुमितिसम्भवात् तदभावो बाधोऽस्तु वि रूपेण व्याप्तेरनुपादानाच्च तथाव्यभिचारो न दोष उपनीतसकलभाने चाप्रामाण्यं प्रत्यक्षेऽपि तुल्यं अनुद्देश्य चानुमितेरप्रामाण्यं न वादिविजयप्रयोजकमिति तन्न प्रत्य हि विना सन्निकर्षमभानादुपनीतभानस्य प्रत्यभिज्ञादावनु भविकत्वादुपनयोऽपि सन्निकर्षः कल्प्यते अनुमितौ तु फलासिद्धा न सामग्र्यन्तरकल्पना। न खलु वह्निव्याप्य धूमपरामर्शादुपनीतरासभानुमितिरानुभविकी कस्य

यथा पर्वते वह्निसन्देहवतो निश्चितवह्निव्यभिचारकेण
॥ भिधेयत्वादिना पर्वतादौ प्रमेयत्वादिकमनुमितोऽपि
नर्थिनो वह्निमत्वनिश्चयान्निष्कम्पप्रवृत्त्यापत्तेरिति।
र पक्षधर्मताबलेनेत्यादि ननु विशेषतो व्याप्यग्रहात्र
॥थासिद्धि सम्भावना सामान्यतः सिद्धौ न विशेषतो बाधो
तारोधि भिन्नप्रकारकत्वात् न च समानविषयत्वमेव विरोधित्वे
न्वि पृथिव्यादिरूपबाधग्रहेऽपि वायुरूपवान्नवेति संशयात्
॥पवानित्यनुमितेश्च न चारूपमेव रूपत्वेन शङ्कितमारोपितं
ा तद्विषयः तादृशशङ्काविरहेऽपि तयोरानुभविकत्वात्
ोषवशान्नेह श्वेतं द्रव्यमिति भ्रमेऽपि इह पीतः शङ्ख इति
त्ययाद्घटपटौ न स्तः दण्डी चैत्रो नास्तीति ग्रहेऽपि घटोऽस्ति
त्रोऽस्तीत्यवगमात् सल्लिङ्गपरामर्शाद्बाधितविशेषभानप्रसङ्गश्च
वेशेषबाधावतारानवतारयोः समानः समानसमाधानश्च।
अत्र वदन्ति व्यापकतानवच्छेदकमपि रूपं लाघवज्ञानादि
सहकारिवशादनुमितौ प्रकारीभवति यथा जीवनमरणा-
न्यतरप्रतियोगी प्राणित्वादित्यत्र जीवनप्रतियोगित्वम् अन्यथा
जीवित्वे सति गृहासत्त्वस्य हेतोरसिद्ध्या बहिःसत्त्वानुमाना-
योगात् एवं क्षित्यादिकर्त्तुरेकत्वमपि अन्यथा एकोऽनेको
वा क्षित्यादिकर्त्तेति सन्देहप्रसङ्गादनुमितेश्च तादृप्येण
लघ्वर्थाविषयकत्वे तथाविधानुव्यवसायविरहात् सति लाघ-
वप्रतिसन्धाने लघ्वर्थपरिच्छेदकत्वमनुमानस्येत्यपि न सिध्येत्
एवञ्च विशेषतो जायमानानुमितिं विरुणद्धि बाधः प्रमिति-

सल्लिङ्गपरामर्शात् कथं भ्रान्तानुमितिर्जा
कथं यथार्थेति चेत् बाधानवतारे बाधिता
पादेव तथा सामान्यतो दृष्टात्तदितरप्रसि
सहकृतात् शिष्यमाणप्रसिद्धकारिकानुमिति
भोजनसाध्यकपीनत्वाद्दिवासन्ध्याभोजनव
कारिका एवं द्रव्यवृत्तित्वसाध्यिका गुणत्वा
तद्रव्यवृत्तित्वबाधे प्रसिद्धमनोवृत्तित्वानुमिति
ो वृत्तित्वाभावप्रमया बाध्यत इति विशेषबा
साध्येत्यादिकमापाततः वस्तुतस्तु प्रतियोग्य
णसम्बन्धविशेषावच्छिन्नप्रतियोगिताकसाध्य
व्यभिचारः स्वप्रागभावेनेत्यादिकं स्पष्टत्वेनो
तदत्यन्ताभावस्यापि व्युत्पादितत्वात् अतएव
च्छिन्ने घटे पृथिवीत्वादिना रूपादिसाध
धं पदमादधाति एवं साध्यवत्तानवच्छेदक
पक्षत्वेऽपि बाधो बोध्यः ।
ावच्छेदकावच्छेदेन साध्यसिद्धौ तदवच्छेदे
प्रयोजकमन्यथा गृहीतभागासिद्धेर्घटत्वादे
ाद्यवच्छेदेन रूपादिसिद्धिप्रसङ्गात् न च शिख
धूमादिमत्त्वमिति चेन्न अवच्छेदकत्वयोर्वस्तुनो
सामान्यस्याकिञ्चित्करत्वात् अवच्छिन्नावृत्ते
त्त्वेन गृहीताज्जायमानामनुमितिं विरुणद्धि
देऽपि वस्तुनोर्ज्ञानासङ्करात् सुखाद्यनवच्छेद

शरीराद्यवच्छिन्नात्मादौ
कपिसंयोगाद्यनवच्
साध्यकवृत्तविशेषणत्वादे
ः पर्वतो वह्निमानि
कधूमादेरण्ये तत्काला
ष्कवमर्हतीत्यभिप्राय
ईश्वरवादे न च वि
ध्यस्येति शेषः शरीरत
शरीराजन्यस्य न कर्तृज
शरीराजन्यत्वस्य हेतोः
क्तम् अजन्यत्वं नोपाधि
विशेषणवैयर्थ्यं विशिष्य
ध्यनप्रभववह्निरहित
विशेषणत्वम् उपाधि
त्त्वेति । ननु स्वरू
ति न भ्रमः अ
ध्य इत्यत्र गन्धव्य
रयितुं शक्यते त
कत्वरूपस्य गन्धव्य
त्वर्गतगन्धातिरिक्त
कमेव इत्यत आह
वानामेव सामा

। सुखादिसाध्यकदुःखादेर्वर्त्तमान-
च्छेदकमूलाद्यवच्छिन्ने कपिसंयोगा-
वर्त्तमानत्वाच्च अत्र चैतत्कालाव-
ाति शब्दादिवदेतत्कालावच्छिन्नपर्वत-
ावच्छेदेन वह्निमत्ताबुद्धिरनुभवसिद्धा
ाः।

वशिष्यमुपाधिः साधनव्यापकत्वादिति
सहकारेणैव कर्त्तुः कार्य्यजनकत्वात्
जन्यत्वं तथाचाकर्तृकत्वरूपसाध्यव्याप्यस्य
ारव्यापकतया साध्यस्याव्यापकत्वं वि-
धिरित्यर्थः। यदि विशिष्टाभावे हेतौ
ाभावरूपश्च विशिष्यमुपाधिर्भवेत् तदा
ात्वादिना निर्धूमत्वादौ साध्ये व्यर्थ-
ाश्च वह्निरहितत्वादि सम्भवेदित्याह
ापासिद्धिवारकत्वाद्विशेषणस्य न वैयर्थ्य-
पि तु व्यभिचारवारकत्वात् रूपादिषु
यञ्जकत्वस्य हेतोर्व्यभिचारो न शुद्धेनैव
नस्य समभिव्याहारवशाच्छुद्धतिरिक्ताव्य-
यञ्जकोऽसत्त्वेन विशेषणत्वायोगाद्दतोरूपा-
क्ताव्यञ्जकत्वं विशेषणं तच्च व्यभिचारवा-
ः अपि चेति। यत्वित्यादि यावद्विशेषा-
ान्याभावत्वमते अपृथिवीत्वं पृथिवी सा-

ा भावः स च विशेषाभावसमुदायः । बहूनां
न्योऽन्याभावा अपि शरीरजन्यान्योऽन्याभाव
ाभावस्येत्यभ्युच्चयमात्रं जन्यत्वस्याखण्डस्य एक
न्यायतया सामान्याभावस्यापि तत्तज्जन्यत्व
यद्यपि प्रत्येकव्याप्यत्वस्य सम्भवे बहूनामन्
म् एकैकस्यान्योऽन्याभावस्य व्यभिचारित्व
जन्यान्योऽन्याभावसमुदायस्य व्याप्यत्वेन त
न्याभावानां न निवेशो व्यर्थत्वात् तथापि
न्यत्वावच्छिन्नप्रतियोगिताकावतिरिक्ताविवाभा
बहूनामभावसम्भव इत्यत्र तात्पर्य्यमिति ।

विदुषां निवहैरिहैकमत्या-
यददुष्टं निरटङ्कि यच्च दुष्टम् ।
मयि जल्पति कल्पनाधिनाथे
रघुनाथे मनुतां तदन्यथैव ॥

ोपाध्याय श्रीरघुनाथभट्टाचार्य्यशिरोमणि विरचिता
अनुमानमणिदीधितिः समाप्ता ।

